
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीयुध्यकांडप्रारंभः

रा॰ यु॰
१

श्रीगणेशाय नमः यथावदिति १ यदमिनमनसा स्मर्तुमपि न शक्यमित्यन्वयः २ धर्षयितुं अशोकवनिकादिनाशेन ३ सुग्रीवस्येदशादिति मत्पदति शेषः ४ कपीश्वरः सुग्रीवः ५ जानक्याः परिमार्गणरूपं कर्पिमनेनसम्यक्कृतं सम्यक् कृतं एवं हनुमंतं स्तुत्वा प्रकृतमाह समुद्रमित्यादि

श्रीरामाय नमः यथावद्भाषितं वाक्यं श्रुत्वा रामो हनूमतः उवाचानंतरं वाक्यं हर्षेण महतावृतः १ कार्यं कृतं हनुमता देवैरपि सुदुष्करं मनसापि यदन्येन स्मर्तुं शक्यं न भूतले २ शतयोजनविस्तीर्णं लंघयेत्कः पयोनिधिं लंकां च राक्षसैर्गुप्तां को वा धर्षयितुं क्षमः ३ भृत्यकार्यं हनुमता कृतं सर्वमशेषतः सुग्रीवस्येदृशो लोके न भूतो न भविष्यति ४ अहं च रघुवंशश्च लक्ष्मणश्च कपीश्वरः जानक्या दर्शनेनाद्य रक्षिताः स्मो हनूमता ५ सर्वथा सुकृतं कार्यं जानक्याः परिमार्गणं समुद्रं मनसा स्मृत्वा सीदतीव मनो मम ६ कथं नक्रझषाकीर्णं समुद्रं शतयोजनं लंघयित्वा रिपुं हत्वा यां कथं द्रक्ष्यामि जानकीं ७ श्रुत्वा तु रामवचनं सुग्रीवः प्राह राघवं समुद्रं लंघयिष्यामो महानक्रझषाकुलं ८

यतः सीदतीव ६ अतः कथमित्यादि ७ ८ ॥ ॥ ॥ ॥ ॥

राम॰
१

यतश्चेताकार्यविनाशिनीञ्चतस्तांत्यजः ९ त्वन्मियनिमित्तंपावकंप्रविष्टमपिसमुद्युक्तान् १० प्रथमंसमुद्रतरणविषयंनिश्चयमातिष्ठेत्यर्थः
लंकादर्शनोत्तरकालमस्माभीरावणोहतइत्येवमन्महे एवएवषवास्माकंनिश्चयइत्यर्थः ११ कंचित्कमपि १२ निमित्तानिशकुनानि १३

लंकाचविधमिष्यामिहनिष्यामिचरावणं चिंतात्यजरघुश्रेष्ठचिंताकार्यविनाशिनी ९ एतान्पश्यमहासत्वान्शूरान्वान
रान्युगवान् त्वत्प्रियार्थंसमुद्युक्तान् प्रवेष्टुमपिपावकं १० समुद्रतरणेवुनद्धिंकुरुष्वप्रथमंततः दृष्ट्वालंकांदशग्री
वोहतइत्येवमन्महे ११ नहिपश्याम्यहंकंचित्त्रिषुलोकेषुराघव गृहीतधनुषोपत्तेतिष्ठेदभिमुखोरणे १२ सर्वथा
नोजयोरामभविष्यतिनसंशयः निमित्तानिचपश्यामितथाभूतानिसर्वशः १३ सुग्रीववचनंश्रुत्वाभक्तिवीर्यसमन्वि
तं अंगीकृत्याब्रवीद्रामोहनूमंतंपुरःस्थितं १४ येनकेनप्रकारेणलंघयामोमहार्णवं लंकास्वरूपंमेब्रूहिदुःसाध्य
देवदानवैः १५ ज्ञात्वातस्यप्रतीकारंकरिष्यामिकपीश्वर श्रुत्वारामस्यवचनंहनूमान् विनयान्वितः १६ उवाचप्रांजलि
र्देवयथादृष्टंब्रवीमिते लंकादिव्यापुरीदेवत्रिकूटशिखरेस्थिता १७

१४ येनकेनप्रकारेणसमुद्रशोषणेनसेतुनावा देवदानवैर्दुःसाध्यंयोद्धुंप्रवेष्टुंचेतिशेषः १५ प्रतीकारं तत्राशोपायं १६ दिव्यत्वेनत्रिकूटशि
खरस्थत्वेनचेतरासाध्यत्वं १७

प्राकारेण परिवेष्टनभित्तिः परिखाप्राकारसंलग्नाः प्राकाराद्बहिर्देशस्थाः खाताः १८ वाप्यः स्वल्पजलाशयाः अवतरणसोपानसहिताः कू

स्वर्णप्राकारसहितास्वर्णाट्टालकसंयुता परिखाभिः परिवृतापूर्णाभिर्निर्मलोदकैः १८ नानोपवनशोभाढ्या दिव्यवापीभिरावृता गृहैर्विचित्रशोभाढ्यैर्मणिस्तंभमयैः शुभैः १९ पश्चिमद्वारमासाद्यगजवाहासहस्रशः उत्तरेद्वारितिष्ठंतिसाश्ववाहाः सपत्तय २० तिष्ठंत्यर्बुदसंख्याकाप्राचामपितथैवच रथिनोराक्षसावीरद्वारं दक्षिणमाश्रिताताः २१ मध्यकक्षेप्यसंख्याताः गजाश्वरथपत्तयः रक्षंतिसततंलंकांनानास्त्रकुशलाः प्रभो २२ संक्रमैर्विविधैर्लंकाशतघ्नीभिश्चसंयुता एवंस्थितेपिदेवेशशृणुमेतत्रचेष्टितं २३ दशाननबलौघस्यचतुर्थांशोमयाहतः दग्ध्वालंकांपुरींस्वर्णांप्रासादोधर्षितोमया २४ शतघ्न्यः संक्रमाश्चैवनाशितास्तेरघूत्तम देवत्वद्दर्शनादेवलंकाभस्मीकृताभवेत् २५

पविशेषाः १९ सहस्रशस्तिष्ठंतीतिशेषः २० २१ २२ संक्रमाः परिखाः सर्वप्रवेशयोग्यमार्गा मेचेष्टितंमत्कृतोव्यवहारः २३ २४ संक्रमानाशिताः प्राकारपातनेनपूरयित्वासर्वप्रवेशयोग्याः कृताः २५

लवणांवधेस्तीरंगच्छामइत्यन्वयः २६ २७ विजयोन्वर्थनामा २८ सुतराः दुर्धर्षामपिनाशयामि २९ पथपाजांववदाधाः ३० त्वंमयासहपा

प्रस्थानंकुरुदेवेशगच्छामोलवणांबुधेः तीरंसहमहावीरैर्वानरैर्वधैः समंततः २६ श्रुत्वाहनुमतोवाक्यमुवाचरघुनंदनः सुग्रीवेसे
निकान्सर्वान्प्रस्थानायाभिनोदय २७ इदानीमेवविजयोमुहूर्त्तः परिवर्त्तते अस्मिन्मुहूर्त्तेगत्वाहंलंकांराक्षससंकुलां २८
सप्ताकारांसुदुर्धर्षांनाशयातमिसरावणं आनेष्यामिचसीतांमेदक्षिणोक्षिस्फुरत्यधः २९ प्रयातुवाहिनीसर्वावानराणांत
रस्विना रक्षतुपथपाः सेनामग्रेपश्चैवपार्श्वयोः ३० हनुमंतमथारुह्यगच्छमध्येगंदंततः आरुह्यलक्ष्मणोयांतुसुग्री
वत्वंमयासह ३१ गजोगवाक्षोगवयोमैंदोद्विविदएवच नलोनिलःसुषेणश्चजांववांश्चतथापरे ३२ सर्वेगच्छंतुसर्वत्रसेनायाः
मैंदेहिशत्रुघातिनः इत्याज्ञाप्यहरीन्रामः प्रतस्थेसहलक्ष्मणः ३३ सुग्रीवसहितोहर्षात्सेनामध्यगतोविभुः वारणेंद्रनिभा
ःसर्वेवानराःकामरूपिणः ३४ क्ष्वेलंतःपरिगर्जंतोजग्मुस्तेदक्षिणांदिशं भक्षयंतोपययुःसर्वेफलानिचमधूनिच ३५

हीतिशेषः ३१ ३२ सेनापाः सेनापालाः ३३ वारणेंद्राः गजेंद्राः ३४ क्ष्वेलंतः क्ष्वेताः प्लुतार्थंगच्छतांप्लवनगतिविशेषाः ३५ ।।

अ·रा·पु·
३

३६ हरिभ्यां हनूमदंगदाभ्यां तत्तत्र सदृशान्ये हरयः हनूमदंगयोरन्यत्र त्वादेवरस्य चंद्रसूर्योपमा ३७ आदित्य आकाशः प्रस्फोटयंतः शौर्यावेशकृतमास्फोटनं पादपानुद्वहंतः हस्तैर्युद्धार्थमिति शेषः ३८ सर्वत्र यावद्दर्शनमध्यं सर्वदेशे ३९ नयस्तत आसक्ता नामतः अवि

ब्रुवंतो राघवस्याग्रे हनिष्यामो दशाननं एवं ते वानरश्रेष्ठा गर्जंत्यतुलविक्रमाः ३६ ह्यमानौ तौ सुभ्रातरौ रघूत्तमौ नक्षत्रैः सेवितौ पह्वचंद्रसूर्याविवांबरे ३७ आवृत्य पृथिवीं कृत्स्नां जगाम महती चमूः प्रस्फोटयतः पुच्छाग्रानुद्वहंतश्च याद्यान् ३८ शैलानारोहयंतश्च जग्मुर्मारुतवेगतः असंख्याताश्च सर्वत्र वानराः परिफरिताः ३९ हृष्टास्ते जग्मुरत्यर्थं रामेण परिपालिताः गताश्च महद्दिवारात्रं कचित्रासज्जंत तत्तरा ४० काननानि विचित्राणि पश्यन्मलयसह्ययो ते सह्यं संप्रमतिक्रम्य मलयं च तथा गिरिं ४१ आपपुश्चानुपूर्व्येण समुद्रं भीमनिःस्वनं अवतीर्य हनूमंतं रामः सुग्रीवसंयुतः ४२ सलिलाभ्याशमासाद्य रामो वचनमब्रवीत् आगतो स्मा वयं सर्वे समुद्रं मकरालयं ४३

राम०
३

स्तमं जगामेति यावत् ४० ते वानराः ४१ अनुपूर्व्येण क्रमेणापपुः प्रापुः हनूमंतं हनूमतः पंचम्यर्थे आर्षे द्वितीया सुग्रीवयुतो रामः ४२ सलिलसमीपं प्राप्य सुग्रीवं प्रतीरामो वचनमब्रवीदित्यन्वयः आगताः प्राप्ताः स्मः ४३

निरूपणेनउपायं विनाऽस्मत्तारणेऽस्य समुद्रस्य तरणे त्वार्यो गीवाउपायानिति शेषः ४४ ४५ विषेदुर्दुःखिताबभूवुः महीन्द्रेतेस्तरंगे
राघवं संपन्ने ४६ गगनाकारं विपुलं त्वेनतन्मात्सादृश्यं दुःखिता वानराः कथं करिष्यामः अस्य इति चिंताकुलाः इत्यनेनान्वयः ४७ अत्यंधेवहंत

इतो गंतुमशक्यं नो निरूपायेन वानराः अत्र सेनानिवेशोस्तु मंत्रयामोस्य तारणे ४४ श्रुत्वा रामस्य वचनं सुग्रीवः सागरांतिके सेनां न्यवेशयत्क्षिप्रं रक्षिता कपिकुंजरैः ४५ ते पश्यंतो निषेदुस्तं सागरं भीमदर्शनं महोन्नततरंगाढ्यं भीमनक्रभयंकरं ४६ अगाधं गगनाकारं सागरं वरुणालयं दुःखिता तरिष्यामः कथं घोरं सागरं वरुणालयं ४७ हंतव्योस्माभिरद्यैव रावणो राक्षसाधमः इति चिंताकुलाः सर्वे राघवाभ्याशे व्यवस्थिताः ४८ रामः सीतामनुस्मृत्य दुःखेन महताऽऽवृतः विलप्य जानकीं सीतां बहुधा कार्यमानुषः ४९

वधो हंतुमर्हः इति चिंताकुला इत्यन्वयः ४८ दुःखेन महताऽऽवृतः आसीदिति शेषः तत्र हेतुः कार्यमानुषः कार्यार्थं मानुषः नाटितमनुष्यत्वः एवं चेदं
दुःखादित्यनटनमेवेति भावः ४९ वस्तुतो न तस्य दुःखादीत्याहाहितीयदति छिन्तीयाहि भयं भवतीति श्रुतेस्तस्य तत्सुखदुःखादीति भावः तद्दु
पपादकं विदांतोकः इति अनेकचेतनकल्प ४९

नैगोरवात्मो द्वितीय एक इति भावः किंच यो रामस्य स्वरूपं तत्वतः तत्वमस्यादिवाक्यतो जानाति सो पि दुःखादिभयतो मुच्यते स्वयमानंदस्वरूप
स्य भगवतो न दुःखादीति किं वक्तव्यमिति भावः दुःखादीत्यत्रादिशब्दग्राह्यमाह दुःखेति ५० ५१ तत्व इत्यपि तानि कुतो न स्पृशंतीत्यत्रहे

अद्वितीयश्चिदात्मैकः परमात्मा सनातनः यस्तं जानाति रामस्य स्वरूपं तत्वतो जनः ५० तं न स्पृशंति दुः
खादि किमुतानंदमव्ययं दुःखहर्षभयक्रोधलोभमोहमदादय ५१ अज्ञानलिंगान्येतानि कुतः संति चि
दात्मनि देहाभिमानिनो दुःखादेहस्य चिदात्मनः ५२ संप्रसादे हि पाभावात्सुखमात्रं हि दृश्यते वु
ध्याघभावात् संस्पृष्टे दुःखं तत्र न दृश्यते अतो दुःखादिकं सर्वं बुद्धेरेव न संशयः ५३

तुमाह अज्ञानलिंगानीति तस्य तत्वज्ञानेन नाशादिति द्वितिभावः चिदात्मा निसर्वशः ज्ञानरहिते तानि कुतः संति कथं भवंतीत्यर्थः तदेव दा
र्ढ्यायपुनाराहहेति ५२ तस्य सुखरूपत्वे हेतुमाह संप्रसाद इति सुषुप्ताविन्यर्थः हपाभावात् न तु स्वबुद्धिरहिते तत्र न दृश्यते अतो बुद्धेरेव तत्से
र्वमित्यर्थः ५३

नित्योदितत्वेननाशरहितं अबुद्धेर्मायागुणैः संगतः तत्संगतत्वेनकल्पितः सुखीदुःखीवचविभाव्यते ५४ इतिश्रीमत्सकलराजविपद्धर
णसमर्थेत्यादिविरुदावलीविराजमानस्यहिम्मतिवर्मणः पुत्रस्यश्रीरामवर्मणः कृतायांअध्यात्मरामायणप्रकाशिकायांयुद्धकांडेप्रथमः सर्गः १

रामः परात्मापुरुषः पुराणोनित्योदितोनित्यसुखोनिरीहः तथापिमायागुणसंगतोसौसुखीवदुःखीवविभाव्यतेऽबु
धैः ५४ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेयुद्धकांडेप्रथमः सर्गः १ लंकायांरावणोदृष्ट्वाकृतंकर्मसुदु
ष्करं दैवतैर्वापिहिपापाः किंचिद्दवाङ्मुखः १ आहूयमंत्रिणः सर्वानिदंवचनमब्रवीत् हनूमताकृतंकर्मभवद्भिर्दृ
ष्टमेवतत् २ प्रविश्यलंकांदुर्धर्षांदृष्ट्वासीतांदुरासदां हत्वाचराक्षसान्वीरानक्षंमंदोदरीसुतं ३ दग्ध्वालंकामशेषे
णलंघयित्वाचसागरं युष्मान्सर्वानतिक्रम्यस्वस्थोगात्पुनरेवसः ४ किंकर्तव्यमितोस्माभिर्यूयंमंत्रविशारदाः
मंत्रयध्वंप्रयत्नेनयत्कृतंमेहितंभवेत् ५ रावणस्यवचः श्रुत्वाराक्षसास्तमथाब्रुवन् देवशंकाकुतोरामान्नवलोकजि
तोरणे ६

लंकायामितिदैवतैर्वापिदैवतैरपीत्यर्थः वापादपूरणे १ २ अक्षंहजेतिअनुकर्षे ३ स्वस्थाइति अनेनभवत्कृतांगवेकृतरहितस्सूचि
तं ४ यत्कृतंसन्मेहितंभवेत्तन्मंत्रयध्वमित्यन्वयः ५ लोकजितदेवाहेंद्रस्त्विति यत्रने ६ ॥

अ॰ए॰पु॰
५

पुत्रेकुवेरंजित्वापुष्पकमानयिषंभुत्पतदत्यन्वयः ७ यदायमोजितस्तदाकालदंष्टादपिभयंनाभजत्कुतोमानुषादूपमितिभावः सर्वेपिएतस्माद्
त्वस्यत्वदधीनादतिशेषः ८ ९ नोस्माकंयातदवज्ञातस्मिनवज्ञातत्कृतमित्यर्थः अवज्ञाकारणमाहुः अयंवानरः किमस्माकंकरिष्यतीति

इइस्तवध्यानिर्तितिमः पुत्रेणतवपत्तने जित्वाकुवेरमानीयपुष्पकमुज्झितत्वया ७ यमोजितःकालदंष्ट्रामद्धंनाभजत
वमयोवरुणोहुंकृतेनैवजितः सर्वेपिएतस्माः ८ मयोमहासुरोभीत्याकन्यांदत्वास्वयंतव त्वद्वशेवर्ततेद्यापिकिमु
तान्येमहासुराः ९ हनूमद्धर्षणापन्नतदवज्ञाकृतंचनः वानरोयंकिमस्माकमस्मिन्योरुषदर्शने १० इत्युपेक्षितम
स्माभिर्धर्षणांतेनकिंभवेत्वयंप्रमत्ताः किंतेनवंचितास्मोहनूमता ११ जानीमोयदितंसर्वेकथंजीवनामिष्यति आ
ज्ञापयजगत्कृत्स्नमवानरममानुषं १२

शेषः अस्मिन्वानरेयोरुषस्यदर्शनेकिंफलंतिः फलंतत १० इतीत्यादिधर्षणांतेनकिंभविदित्यस्यायगत्वाभावेइत्यादिः अयंकिंकः यद्य
र्थः इतिवयंप्रमत्तास्तेनमनमादेनहनूमतावंचिताः ११ यदितंजानीमः अयमेवंरूपइतियदिजानीमइत्यर्थः गमिष्यतिगतःस्यादित्यर्थे
आर्षे १२

एम॰
५

सर्वान्नात्रापयएकैकं चेत्यर्थः १३ यत्कर्मत्वयारब्धं तत्केवलं त्वात्मनाशाय आरंभकाल एव नाशः प्रसक्तः परंतु भाग्याज्जीवितोसि यत्त्वं रामेणानद
ष्टोसि १४ जीवन्नायासीत्यत्र हेतुभूतं रामस्वरूपमाह राम इति १५ त्वयाऽऽनीतेति खेदः १६ विपर्यये मिवतत्सदृशं वडिशं आगीर्य तिमीये

कृत्वा यास्यामहे सर्वे प्रत्येकं वा नियोजय कुंभकर्णस्तदा त्वाह रावणं राक्षसेश्वरं १४ आरब्धं यत्त्वया कर्म स्वात्मनाशाय केवलं
न दृष्टोसि तदा भाग्यात्त्वं रामेण महात्मना १५ यदि पश्यति रामस्त्वां जीवन्नायासि रावण एषो न मानुषो देवः साक्षान्नाराय
णोऽव्ययः १५ सीता भगवती लक्ष्मीस्तस्य पत्नी यशस्विनी राक्षसानां विनाशाय त्वयानीता सुमध्यमा १६ विषदिग्धमि
वागीर्य महामीनो यथा तथा आनीता जानकी पश्चात्त्वया किं वा भविष्यति १७ यद्यप्यनुचितं कर्म त्वया कृतमजानता स
र्वं समं करिष्यामि स्वस्थचित्तो भव प्रभो १८ कुंभकर्णवचः श्रुत्वा वाक्यमिंद्रजिदब्रवीत् देहि देव ममाज्ञां त्वं हत्वा रामं स
लक्ष्मणं १९ सुग्रीवं वानरांश्चैव पुनर्यास्यामि नेति कुं १९ तत्रागतो भागवतप्रधानो विभीषणो बुद्धिमतां वरिष्ठः श्री
रामपादद्वयएकतानः प्रणम्य देवारिमुपोपवि २०

महामीनो यथा पश्चात्तप्यति तथा त्वया जानकी आनीता अथ किं वा भविष्यतीति पश्चात्तप्स्यसे इति शेषः १७ सर्वं समं करिष्यामि परीक्रमे
णेति भावः १८ १९ एकतानः तन्मात्रविषयधारणवान् देवारिं रावणं प्रणम्योपवत्तत्समीपे भ्रातृत्वादुपविष्टः २०

कुम्भश्रवणः कुम्भकर्णः आदिनेन्द्रजिन्मत्तप्रमत्तान् अतिशयेन मत्तानित्यर्थः कामातुरं दशाननं विलोक्यमत्राह २१ कुंभकर्णेन्द्रजि तोयस्य युधिष्ठिरास्ता तत्र शक्तौ तौ अतिसिद्धौ महापार्श्वमहोदरएवपि नशक्तौ तथा निकुंभकुंभातिकाय अपि न शक्ता अन्येषां का गणनेति भावः

विलोक्य कुंभश्रवणादिदैत्यान् मत्तप्रमत्तानतिविस्मयेन विलोक्य कामातुरमप्रमत्तो दशाननं प्राह विशुद्धबुद्धिः २१ न कुंभकर्णेन्द्रजितौ च राजन् तथा महापार्श्वमहोदरौ तौ निकुंभकुंभौ च तथातिकायः स्थातुं न शक्ता युधि राघवस्य २२ सीताभिधानेन महाग्रहेण ग्रस्तोसि राजन् न च तं विमोक्ष्य तामेव सत्कृत्य महाधनेन दत्त्वाभिरामाय सुखी भवत्वं २३ यावन्न रामस्य शिताः शिलीमुखाः लंकामभिव्याप्य शिरांसि रक्षसां छिंदंति तावद्रघुनायकस्य भो तां जानकीं त्वं प्रतिदातुमर्हसि २४ यावन्नगाभाः कपयो महाबलाः हरींद्रतुल्या नखदंष्ट्रयोधिनः लंकां समाक्रम्य विनाशयंति ते तावद्द्रुतं देहि रघूत्तमाय तां २५ जीवन्न रामेण विमोक्ष्यसे त्वं गुप्तः सुरेन्द्रैरपि शंकरेण न देवराजांकगतो न मृत्योः पातालले लोकानपि संप्रविष्टः २६

२२ न च तं विमोक्षः ततो महाग्रहादिति शेषः महाधने २३ अभिव्याप्येत्यनेन युगपत् सर्वदशावक्त्रयुगपत्सर्वदशावक्त्रच्छेदेन शिरस्थे देन शिरस्थि दस्युच्छेदनतेन तयरक्षमातिशयवर्णनं तां रक्षःकुलस्य कालरात्रिरूपां २४ हरींद्रतुल्याः संहासिंहसिंहसदृशाः स्थु २६ यावद्धिना शयंति तावत्ततः प्रागहि देहीत्यन्वयः २५ सुरेन्द्रैः कुबेरादिभिः देवराजः इन्द्रः न मृत्योः लोकं गतोपीति शेषः २६

२७ दैत्यो रावणः पदत्तैर्भोगैः गौगस्याध्वैः २८ प्रतीपं प्रतिकूलं २९ कृतघ्नत्वादिवानार्येण अन्यत्रार्थो तस्यास्माह विनाशमिति ३१
यो योनिशाचरस्त्वं विधं वाक्यं कुर्यात्तं तस्मिंस्तु एव क्षणकथनकाल एव हन्मि त्वं तु भ्रातृत्वाद्धननायोग्य इति तद्धिक्कारस्य च वधत्वमाह

शुभं हितं पवित्रं च विभीषणवचः खलः मतिजग्राह नैवासौ विषमाणद्देवौषधं २७ कालेन नोदितो दैत्यो विभीषणमथाब्रवीत् मदत्तभोगैः पुष्टाङ्गोसत्समीपे वसन्नपि प्रतीपमाचरत्येष ममैव हितकारिणः मित्रभावेन शत्रुर्मे जातो नास्त्यत्र संशयः २९ अनार्येण कृतघ्नेन सङ्गतिर्मे न युज्यते विनाशमभिकाङ्क्षन्ति ज्ञातीनां ज्ञातयस्तदा ३१ योऽन्यस्त्वेवंविधं ब्रूयात् वाक्यमेतन्निशाचरः हन्मि तस्मिन् क्षणेनैव धिक् त्वां रक्षः कुलाधम ३२ एवमुक्तः सन् पत्न्यस्तं विभीषणः ३३ उत्पपात सभामध्याद्गदापाणिर्महाबलः चतुर्भिर्मन्त्रिभिः सार्धं गगनस्थोऽब्रवीद्वचः ३४ क्रोधेन महताविष्टो रावणं दशकन्धरं मा विनाशमुपेहि त्वं प्रियवादिनमेवमां ॥

धिगित्यादि ३२ पत्न्यं धिगिति वचनं ३३ ३४ एवमुक्तं मन्त्रिवचो ब्रवीदित्यन्वयः यदब्रवीत्तदाह मेति पद्यपि प्रियवादिनमेवमां ३५ ॥

त्वं धिक्कारोपि तथापि तुः समो ज्येष्ठो भ्राता त्वमिति विवहितं त्वं ब्रवीमि इति शेषः तदाह काल इति सर्वसंहर्त्तेत्यर्थः ३६ काली सर्वसंहारे सहीयभूता
शक्ति ३७ तेनैव रामेण प्रेरितमित्यादिति भावः स्वकर्तव्यातिर्वोहार्थं तव तथा प्रेरणेति तात्पर्यं प्रेरणीयमित्वमेव तत्स्य भुत्यादयति श्री
रामइति प्रकृतेः साक्षात्परस्तादित्यर्थः एवं च प्रकृतिकार्यं द्वयस्थूलमर्थात्सिद्धं तत्किं प्रकृतिसंबद्धस्तथा सति तद्धर्मलेपापत्तिः हरिद्रादिसंबंधाद्वस्त्र

धिक्कारोपि तथापि त्वज्ज्येष्ठो भ्राता पितुः समः ॥ कालो राघवरूपेण जातो दशरथालये ३६ काली सीताभिधानेन जाता
जनकनंदिनी ॥ तावुभावागतावत्र भूमेर्भारापनुत्तये ३७ तेनैव प्रेरितं त्वं तु न प्रेरोष विहितं मम ॥ श्रीरामः प्रकृ
तेः साक्षात्परस्मात्सर्वदा स्थितः ३८ बहिरंतश्च भूतानां समः सर्वत्र संस्थितः ॥ नामरूपादिभेदेन तत्तन्मयइवाम
लः ३९ यथा नानाप्रकारेषु दृष्टेष्वेको महानलः ॥ तत्तदाकृतिभेदेन भिद्यते ज्ञानचक्षुषां ४०

स्येवेत्यतआह परस्मात्सर्वदेति यं कप्यन्यायेन तद्धर्मासंबद्धः ३८ प्रकृतिः स्थूलमेवाह बहिरिति समो न न्यूनाधिकभावेनापि वैषम्ये
णाय यथा कर्मफलदत्वादिति भावस्तत्त्व एकस्यानेकरूपत्वं द्वयं वस्तुत्तत्तद्व्यतिरिक्तं नैव किंचित्सदस्तीत्याह नामेति यत्किंचित्सत्त्वेन नामादि
प्रतीयते तत्सर्वं तन्मयत्वादेव तथा प्रतीतिविषय इति भावः ३९ एकस्यानेकरूपत्वं दृष्टांतेन साधयति यथेति ४०

दार्ष्टांतिकोपि तत्पतिपंचति अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाः पंचकोशाः आदिनाभूतादीनि तत्रान्नमयः स्थूलशरीरं ततः क्र
मेणात्मात्मानो दर्शांतोतरमाहनेत्निति ४१ स एषः रामः स्वमायया गुणाः सत्वादयस्तैर्विवितायस्मिन्निति विग्रहः तेषु प्रतिविंबित इतिवा ४२
तत्र रजोगुणात्मनि विंबे प्रधानपुरुषाविन्याह प्रधानेतिः प्रधानं परिणामि पुरुषः स्वभोगापवर्गार्थं तत्प्रवर्त्तकस्तु भाभ्यां सष्टिः तमोगुण

पंचकोशादिभेदेन तत्तन्मय इवावभौः नीलपीतादियोगेन निर्मलः स्फटिको यथा ४१ स एव नित्यमुक्तोपि स्वमा
यागुणविंवितः कालः प्रधानं पुरुषोऽव्यक्तं चेति चतुर्विधः ४२ प्रधानपुरुषाभ्यां स जगत्कृत्स्नं सृजत्यजः कालरू
पेण कलनाज्जगतः कुरुते व्ययः कालरूपी स भगवान् रामरूपेण मायया ४४ ब्रह्मणा प्रार्थितो देवस्त्वद्भूभारार्थमिहा
गतः तदन्यथा कथं कुर्यात्सत्यसंकल्प ईश्वरः ४५

त्मनि विंबे कालं संदत्याह कालरूपेणेति कलना संहारः प्रधानशब्दानीरामसद्+ अथ तीत्सत्वगुणात्मनि विंबितोऽव्यक्तमित्युच्यते समंचीतर्यामित यासर्वपा
सर्वपालको द्रष्टा तया चाव्यक्तमिति भावः तत्र कालरूपी स हा+ दानं समस्त्याह कालेति ४४ ननु सर्वसवस्य भगवतो मध्ये कथं प्रवृत्तिरतस्त्राह
ब्रह्मणेति परिपालनानुग्रहेणेन इष्टनिग्रहेपिन समत्वहानिः कर्मानुरूपफलदातृत्वमेव तस्य समत्वं तदनुरूपफलदाने हि तस्यैवैषम्यमायद्येत तत्र
चादस्तियथा ॥

अ॰रा॰यु॰
८

नैकेषु कर्मानुरूपफलदेरुज्ञासेर्वेयुसमस्त्येवमवहितेनतु विषमस्तीतिभावः अन्यथाकरणाभावेहेतुः सत्यसंकल्पत्वं ४५ हनिष्यतीति
सत्यसंकल्पत्वादिवेतिभावः नन्वेवमवश्यंभाविनिमद्वधेतवगमनेन किं तत्राह हन्यमानमिति हे रावण त्वां त्वामि बुद्धिविषयं रवीयत्वबुद्धिविष
यं च रात्तसकुलं हन्यमानं द्रष्टुं न शक्नोमि अतः त्वयि रात्तसकुले च तां बुद्धिं विहाय रामे वानरेषु चोक्तबुद्धिं कृत्वा राघवं गच्छामि तथा बुद्धि

हनिष्यति त्वां रामस्तु ससुतं सबलवाहनं हन्यमानं न शक्तोस्मि द्रष्टुं रामेण रावण ४६ त्वां रात्तसकुलं कृत्स्नं ततो गच्छामि
राघवं मयि पाते स्तु खीभूत्वा रमस्व भवने चिरं ४७ विभीषणो रावणवाक्यतः क्षणाद्विसृज्य सर्वस्वं परिगृह्य राघवं मयिष्ठ
दृगहं जगाम स्वपदारविंदयोः सेवामिकांत्तीयरिपूर्णमानसः ४८ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकं
डे द्वितीयः सर्गः २ विभीषणो महाभागश्चतुर्भिर्मंत्रिभिः सहखादागत्य गगने रामसंमुखे समवस्थितः १

रा॰म॰
८

कृतमेव च दुःखमिति भावः ४६ ४७ विसृज्य सर्वमित्यनेन वैराग्यमुक्तं भगवद्भजने तस्य मुख्यांगत्वात् परिपूर्णमनसि भवो मानसो मनोरथो
यस्य सः भगवद्भजनं कार्यमिति तस्य सार्वदिको मनोरथ ४८ इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादि विरुदावली विराजमानस्य हिम्म
तिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ युद्धकांडे द्वितीयः सर्गः विभीषणादृति १

तेदारहर्त्तू रावणस्याहमनुजो नाम्ना विभीषणाः इत्यन्वयः २ भ्रात्रा रावणेनाहं निरस्तः धिक्कृतः अविदितात्मनः अविदितस्वस्वरूपस्य ३ प्रेषयस्तत्कृत
मित्येषयेत्यर्थः कालरूपस्य तव पाशः अंतर्यामित्वयोः प्रेरणान वशीनतां मायामः ४ अश्रवणमात्रमेवन किं त्वधिकमपीत्याह हन्तुमितिमयात एवं राजा

तं चैवत्वाच मोस्वामिन रामराजीवलोचन रावणस्यानुजोहं तेदारहर्त्तुर्विभीषणाः २ नाम्नाम्नात्रा निरस्तोहं त्वामेव शरणं गतः हि
तमुक्तं मयादेव तस्य चाविदितात्मनः ३ सीतां रामाय वैदेहीं प्रेषयेति पुनः पुनः उक्तोपि न मम्यणोत्येष कालपाशगतः ४ हंतुं मां
खड्गमादाय प्राद्रवद्राक्षसाधमः ततो विरामसचिवैश्चतुर्भिः सहितोमयात ५ त्वामेव नवमो त्रायमुमुक्षुः शरणं गतः विभी
षणवचः श्रुत्वा सुग्रीवो वाक्यमब्रवीत् ६ विश्वासार्हो न ते राममायावी राक्षसाधमः सीताहर्तुर्विशेषेण रावणस्यानुजो ब
ली ७ मंत्रिभिः सायुधैरस्मान् विवरे निहनिष्यति तदास्यायमेदेव वानरैर्हन्यतामयं ८ ममैवं भाति ते राम बुध्या किं निश्चि
तं वद श्रुत्वा सुग्रीव वचनं रामः सस्मितमब्रवीत ९

त ५ तस्मात्संसारे एवं वैरपेण तस्मादेव भो त्रायत दित्यावान त्वां शरणं गत इत्यन्वयः ६ सीताहर्त्तुः रनुजइति विशेषेण विश्वासाहेनिना
त्वयः ७ विवरे नैतपुरुषसन्नादिरूपेछिद्रे ८ ममैवं बुद्धिः तव बुध्यांतःकरणेन किं निश्चितं तद्वदेत्यर्थः ९ ॥

अ॰रा॰पु॰
९

परीक्षामीतिअनेनसत्यसंकल्पदं भोरोहमितिसूचितंमहेश्वरान् अत्रेश्वराइंद्राद्याः १० अभयमितिछेदः नन्वेवंविधेभ्यो भयदानंनोचि
तमितिचेन्नत्राहसकृदेवेतितवास्मीतिप्रपन्नाय अंगीकृतनवतेयाचतेशत्रवेतं अभयमितिशेषस्सर्वभूतेभ्यः निकृष्टापायीतिशेषः तोद

परीक्षामिकपिश्रेष्ठलोकान्सर्वान्महेश्वरान् निमिषार्धेनसंहन्यांसज्जानितिषार्धतः १० अतोमयाभयंदत्तंशीघ्र
मानयराक्षसं ११ सकृदेवप्रपन्नायतवास्मीतिचयाचते अभयंसर्वभूतेभ्योददाम्येतद्व्रतंमम १२ रामस्यवचनंश्रुत्वास
ग्रीवोहृष्टमानस विभीषणमथानाय्यदर्शयामासराघवं १३ विभीषणस्तुसाष्टांगंप्रणिपत्यरघूत्तमं हर्षगद्गदयावा
चाभक्त्याचपरयान्वितः १४ रामंश्यामंविशालाक्षंप्रसन्नमुखपंकजं धनुर्बाणधरंशांतंलक्ष्मणेनसमन्वितं १५
कृतांजलिपुटोभूत्वास्तोतुंसमुपचक्रमे १६ विभीषणउवाच नमस्तेरामराजेंद्रनमः सीतामनोरम नमस्तेचंडकोदं
डनमस्तेभक्तवत्सल १७

राम॰
९

शरणापन्नमभयंददामीतिव्रतंतत्रासीस्यअभयादानेभवव्रतभंगः स्यादितिनकिंचिद्वाच्यमितिभावः १२ १३ १४ रामंश्याममित्यादिध्यान
प्रकारः १५ १६ अथस्तौति नमस्तेइति ॥

१८ जगदितियतोवाइमानिमज्ञा निज्ञापंतेयेनज्ञाता निज्ञीवंतियत्प्रयंत्यभिसंविशंती तिश्रुतिबोधितजगत्स्थित्युत्पत्तिनाशकारणायेत्यर्थः त्रैलोक्यगुरवे अंतर्यामितयेतिभावः अनादिरहस्याय सदामायारहितायास्वशक्तिरूपपायज्ञायेत्यर्थः १९ तदेवपुनःस्पष्टमाह त्वमादिरिति उत्पत्तिकारणस्थानमित्यर्थः निधनंलयस्थानं एवंचोत्पत्त्यादयोपित्वद्विषन्नेभ ताएवनातिरिक्ताइतिसूचितस्वेच्छाचारत्वेनन

नमोनंतायशंतायपरमायामिततेजसे सुग्रीवमित्रायचतेरघूणांपतयेनमः १८ जगदुत्पत्तिनाशानांकारणीयमहात्मने त्रैलोक्यगुरवेनादिरहस्यायनमोनमः १९ त्वमादिर्जगतांराममत्वमेवस्थितिकारणं त्वमंतेनिधनस्थानंस्वेच्छाचारस्त्वमेवहि २० चराचराणांभूतानांवहिरंतश्चराघव व्याप्यव्यापकरूपेणभवान्भातिजगन्मयः २१ त्वन्मायया हतज्ञानानष्टात्मानोविचेतसः गतागतंप्रपद्यंतेपापपुण्यवशात्सदाः २२

पराधीनत्वंसूचितं २० व्याप्यव्यापकरूपेणेतियथामहामत्स्यस्यजलंतस्योव्यापाः २१ हृतज्ञानास्त्वद्रूपंजगदितिज्ञानहीनाः अतएवनष्टात्मानः अतएवनष्टंकरस्थचामीकरवत् अज्ञातंस्वस्वरूपंयेषांते अतएवविचेतसः विरुद्धेमोक्षविरुद्धेप्रवृत्तिमार्गेचेतोयेषांतेगतागतं जन्ममरणरूपसंसारं २२

यावदनाविषयरहितेन ज्ञातस्वरूपमवद्विषयचित्तेन भवान्न ज्ञायते तावज्जगत्सत्यं भाति त्वत्स्वरूपज्ञाने तु त्वमेव सर्वरूपेणावभासीति ज्ञाने तु भा
समानस्य जगतो मिथ्यात्वं भाति यथा यावत् शुक्तिका स्वरूपेण न ज्ञायते तावत् भ्रमात् रजतं सत्यमिति भाति शुक्तिकाज्ञाने तु जन्मियते ज्ञायते
न हत २२ तदेव दार्ष्टान्ते पुनरह ज्ञानादिति युक्ताः तत्रैव सत्यत्वाभिमानिनस्त्वलीनचित्ताः रते भीता भुंजते ऽश्नंते अतो वियोगे दुःखप्रदान्

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा यावन्न ज्ञायते ज्ञानं चेतसा वन्यगामिना २३ त्वदज्ञानात्सदा युक्ताः पुत्रदा
रगृहादिषु रमंते विषयान्सर्वानंते दुःखप्रदान्विभो २४ त्वमिंद्रोग्निर्यमो रक्षो वरुणश्च तथानिलः कुबेरश्च तथा रु
द्रस्त्वमेव पुरुषोत्तमः २५ त्वमणोरप्यणीयांश्च स्थूलात्स्थूलतरः प्रभो त्वं पितासर्वलोकानां माता धाता त्वमेव हि २६
आदिमध्यांतरहितः परिपूर्णोच्युतोव्ययः त्वपाणिपादरहितश्चक्षुःश्रोत्रविवर्जितः २७

२४ त्वमेव सर्वरूप इत्याह त्वमिति २५ अणीयान् सर्वथा दुर्ज्ञेयत्वात् स्थूलतर विभुत्वात् माता पितृवत्सर्वत्र समः पालने इत्याह त्वं
त्वं पितेत्यादि २६ अच्युतः कदापि स्वरूपाच्च्युतो हीनो न अनेन सर्वशक्तिमत्त्वं अव्ययः व्ययो वृद्धयपक्षयस्तद्रहितः त्वं पाणीति अपाणि
पादो जवनो ग्रहीतेति श्रुतेः २७ ॥

विपरीतक्रमेणाश्रोतित्याद्युक्तः कोशेभ्यः अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेभ्यः पंचकोशेभ्योऽतिरिक्तस्तद्दोषास्पृष्टः नि
र्गुणः स्वतो निर्गुणस्तत्वार्थः मायासंबंधात्गुणवानिव निरूपाश्रयः आधारांतररहितः २८ निर्विकल्पः कुतस्तो निर्धर्मकत्वान्निर्विकल्पकज्ञान
स्यैव विषुणोनसविकल्पकत्वेति भावः अत एव निराकारः स्वत्यज्ञस्यैश्वरांतरस्याभावान्निर्धर्मकत्वान्निरीश्वरः उक्तं निर्विकारत्वं विवृणोति ष
ड्भावरहित इति जायते अस्ति विपरिणमते वर्धते पक्षीयते नश्यतीति निरुक्तोक्तषड्भावविकारहीनः अत एवानादिः जगतस्तदविवर्त एवेति भावः

श्रोताद्ब्राग्रहीताचज्ञवनस्तस्त्वरवरूपंतक कोशेभ्योऽतिरिक्तस्त्वं निर्गुणो निरूपाश्रयः २८ निर्विकल्पो निर्विकारो नि
राकारो निरीश्वरः षड्भावरहितोनादिः पुरुषः प्रकृतेः परं २९ मायया गृह्यमाणस्त्वं मनुष्य इव भाव्यसे ज्ञात्वा त्वां निर्गुण
मजं वैष्णवा मोक्षगामिनः ३० अहं त्वत्पादसद्भक्तिनिःश्रेणीं प्राप्य राघव इच्छामि ज्ञानयोगाख्यं सोपानं परमेश्वर
३१

प्रकृतिसंबंधादपि तेन विकार इत्याह प्रकृतेः परं तद्दोषगुणासंस्पृष्ट इत्यर्थः २९ नन्वीदृशस्य मम ग्रहणं कुतस्तत्राह माययेति इदं त्वदर्शनं मायो
पात्तदेवाहं मनुष्यदेवेति एवं मायिकस्यास्य तव रूपस्य ज्ञानान्न मुक्तिः किंतु पूर्वोक्तरूपज्ञानादेवेत्याह ज्ञात्वेति तज्ज्ञाने कारणं चात्र मायिकत
वरूपे भक्तिरित्येतज्ज्ञानमपि परं परयातदुपयोगीति भावः ३० तदेवाहाहमिति भक्तिरूपां नि श्रेणीं प्राप्य ज्ञानयोगाख्यं सोपानं पूर्वोक्तज्ञा
नयोगाख्यं सोपानं ॥

अ.रा.
११

सर्वविधमनुष्येणेत्यपानतिरूपाभक्तिरेवमुख्येतिध्वनयन्नाहनमइति ३२ वांछितंवरंवृणीष्वयतोहंवरदोस्मीत्यन्वयः ३३ कृतकृत्यत्वसर्व
धर्मजनककर्मकृत्वंअतएवधन्यत्वं भगवद्दर्शनस्यसर्वधर्मरूपत्वमितिभावः कृतकार्यत्वंचधातूनामनेकार्थत्वात्प्राप्तसकलसाध्यत्वंप्रा
प्यंचसकलधर्मफलं तदेवाहत्वत्पादेतिमुक्तिर्हिसर्वपुण्यफलं ३४ ततदेवाहनास्तीति ३५ कर्मकृतोवंधः संसारस्तन्नाशफलंक

नमः सीतापतेरामनमः कारुणिकोत्तमरावणारेनमस्तुभ्यंत्राहिमांभवसागरात् ३२ ततः प्रसन्नःप्रोवाच श्री
रामोभक्तवत्सलः वरंवृणीष्वभद्रंतेवांछितंवरदोस्म्यहं ३३ विभीषणउवाच धन्योस्मिकृतकृत्योस्मिकृतकार्यो
स्मिराघव त्वत्पाददर्शनादेवविमुक्तोस्मिनसंशयः ३४ नास्तिमत्सदृशोधन्योनास्तिमत्सदृशःशुचिः नास्तिमत्स
दृशोलोकेरामत्वन्मूर्तिदर्शनात् ३५ कर्मबंधविनाशायत्वत्ज्ञानंभक्तिलक्षणंत्वद्ध्यानंपरमार्थंचदेहिमेरघुनंदन
३६

भक्तिर्लक्षणंयस्यतादृशंत्वद्विषयज्ञानंदेहिएवंफलंसंप्रार्थ्यतत्स्यकारणंविनाःसंभवात्तत्कारणीभूतांभक्तिंप्रार्थयंव्याचष्टेत्वध्यानमिति ए
तदेवमुख्यभक्तिरित्यर्थः परमार्थंपरमवृत्कृष्टंमोक्षाख्यंपुरुषार्थः प्रयोजनंपरंपरंपरायस्य ३६ ॥

राम०
११

तदेवपुनराहनयाचेइति ३७ ३८ मद्भक्तानामितिसर्वथातवध्यानविषयोभवामीतिभावः ३९ शांतःजितेंद्रियः अतएवसर्वपापरहितः ४०

नयाचेराम राजेंद्र तुच्छंविषयसंभवं त्वत्पादकमलेसक्ता भक्तिरेवसदास्तुमे ३७ ओमित्युक्त्वापुनःप्रीतोरामःप्रोवाचराक्षसं शृणुवक्ष्यामितेभद्ररहस्यंममनिश्चितं ३८ मद्भक्तानांप्रशांतानां योगिनांवीतरागिणां हृदयेसीतयानित्यंवसाम्यत्रनसंशयः ३९ तस्मात्त्वंसर्वदाशांतः सर्वकल्मषवर्जितः मांध्यात्वामोक्ष्यसेनित्यंघोरसंसारसागरात् ४० स्तोत्रमेतत्पठेद्यस्तुलिखेद्यः शृणुयादपि मत्प्रीतयेममाभीष्टंसारूप्यंसमवाप्नुयात् ४१ इत्युक्त्वालक्ष्मणंप्राह श्रीरामोभक्तभक्तिमान् पश्यत्विदानीमेवैषममसंदर्शनेफलं ४२ लंकाराज्येऽभिषेक्ष्यामिजलमानयसागरात् यावच्चंद्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी ४३ यावन्ममकथालोकेतावद्राज्यंकरोत्वसौ इत्युक्त्वालक्ष्मणेनांबुआनाय्यकलशेनतं ४४ लंकाराज्याधिपत्यार्थमभिषेकंरमापतिः कारयामाससचिवैर्लक्ष्मणेनविशेषतः ४५

४२ ममसंदर्शनेफलंतत्तुनंफलंमेत्वत्स्वरूपंकालांतरेभवतिइदानींसांप्रतमेवहिकिंपश्यतु ४२ ४३ ४४ सचिवैश्चतुर्भिर्विभीषणस्यसचिवैः ४५

४६ मुख्यत्वेन हेतुर्भक्त्यारामपरिग्रहः ४७ परमात्मत्वेन महायान्वयेत्तनासु चिन्तात्र मायया त्र प्रयत्नेन ४८ दशग्रीवेणेति त्रस्या अत्रा तोरेत्यादिः ४९ भ्रातरं वालिनाभ्रातृव्यवहारस्य मैत्रीकरणेन तुरेकृतत्वेन तुभ्यात्त्वात भ्रातः ५० दशत्वामित त्रपः वनचारिणां वानरा

साधु साध्विति ते सर्वे वानराः कपिपुंगवाः सुग्रीवोऽपि परिष्वज्य विभीषणमथाब्रवीत् ४६ विभीषण वयं सर्वे रामस्य परमात्मनः किंकरास्तत्र मुख्यस्त्वं भक्त्या रामपरिग्रहात् ४७ रावणस्य विनाशे त्वं साहाय्यं कर्तुमर्हसि विभीषण उवाच अहं कियान्सहायत्वे रामस्य परमात्मनः किंतु दास्यं करिष्येऽहं भक्त्याशक्त्या त्वयामया ४८ दशग्रीवेणसं दिष्टः शुकोनाम महासुरः सुस्थितो ऽम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ४९ त्वामाह रावणो राजा भ्रातरं राक्षसाधिपः महाकुलप्रसूतस्त्वं राजासि वनचारिणां ५० मम भ्रातृसमानस्त्वं तव नास्त्यर्थविप्लवः अहं यद्यहरं भार्यां राजपुत्रस्य किं तव ५१ किष्किंधां याहि हरिभिर्लंका शक्या न दैवतैः सुरैः किंमानवैरल्पसारैर्वानरयूथपैः ५२ तं प्राप्य यंतं वचनं तु र्णं प्लुत्य वानराः प्रापयंत तदा क्षिप्रं निहंतुं दृढमुष्टिभिः ५३

५० अर्थविप्लवो मत्कृतोऽर्थनाशः अहं यद्राजपुत्रस्य भार्यामहरं तत्र तव किं दुःखमिति शेषः ५० दैवतैः दैवतैरपि ५२ निहंतुं प्रापयंत प्रयत्नाः कृताः आरभादित्यर्थः ५३

ध्रुंतिरश्चानइतिशेषः ५४ ५५ ५६ यथावालीतिव्यंग्योक्तिः यथात्वायहारित्वांतस्मेवध्यस्तथास्त्वामिमार्यायहारित्वमपिवध्यइतिभावः ५७ मेत्रा
मित्रेरामचंद्रस्यभार्यात्हृत्वाक्वयास्यसीतिवहीत्यन्वयः शुकमन्वरत्ह्यन्वानरैः सुग्रीवइतिशेषः आयमत्राशयः शुकवचनांत्सुग्रीवस्याभि
दायोगप्लवंनिर्णीयविशकलितंस्थितेषुवानरेषुखनगरघातस्येतैरशक्यत्वंसमुद्रव्यवधानान्निर्णीयधातीदिमाकरोत्विति ५८ शार्दूलो

वानरैर्हन्यमानस्तुशुकोराममथाब्रवीत नइतान्ध्रुंतिरश्चेंद्रवानरान्वारयप्रभो ५४ रामः श्रुत्वातदावाक्यंशुकस्यपरिदेवि
तं मावधिष्टेतिरामस्तान्वारयामासवानरान् ५५ पुनरवरमासाद्यशुकः सुग्रीवमब्रवीत कहिराजन्दशग्रीवंकिंवक्ष्यो
मिब्रूतामपहं ५६ सुग्रीवउवाच यथावालीममभ्राताहतयालंरक्षसधमहंतव्यस्त्वंमयायत्नात्सपुत्रबलवाहनः ५७ क्व
हिमेरामचंद्रस्यभार्याहृत्वाक्वयास्यसि ततोरामाज्ञयाधृत्वाशुकंवध्यान्चरस्त्वयत ५८ शार्दूलोपिततः पर्वदृष्ट्वाकपिवलं
महत् यथावत्कथयामासरावणायराक्षसः ५९ दीर्घचिंतापरोभूत्वानिःश्वसन्राजमंदिरे ततःसमुद्रमावेद्यरामोरक्तो
त्पलोचनः ६० यस्त्वलक्ष्मणज्येष्ठोसौवारिधिर्मामुपागतं नाभिनंदतिदुष्टात्मादर्शनार्थममानघ ६१

दर्शनमात्रेणियुक्तोनतुग्रीवभेदनेरणितस्याग्रहणं ५९ कपिवलस्यापिनिमहत्वश्रवणमात्रेणदीर्घचिंतापरत्वंरावणस्येत्यनेनशौर्यहानिःसू
चिता ६० उपागतंस्वतटंप्राप्तमस्मानभिनंदनचिन्हभाहदर्शनार्थमितिनापातीतिशेषः ६१ ॥

अ.रा.पु.
१३

६२ आरोपितज्यं धनुर्धरतीत्यर्थः ६३ कालाग्नीति कालाग्नितुल्यकांतिं संधाय धनुषि योजयित्वेः त्यर्थः त्यर्थः ६४ भस्मसात्कुर्यां भस्मसात्क
रोमीत्यर्थः ६५ तमसा हृता आसन्निति शेषः सागरस्तो भयेवाह योजनं वेलामत्यगात् अतिक्रांतः वेलामारभ्य योजनपर्यंतं सजलो देशः

जानाति मानुषोयं मे किं करिष्यति वानरैः अपश्य पश्य महाबाहो शोषयिष्यामि वारिधिं ६२ पादेनैव गमिष्यंति वानरा वि
गतज्वराः इत्युक्त्वा क्रोधताम्राक्ष आरोपितधनुर्धरः ६३ तूणीराद्बाणमादाय कालाग्निसदृशप्रभं संधाय चापमाकृष्य रामो
वाक्यमथाब्रवीत् ६४ पश्यंतु सर्वभूतानि रामस्य शरविक्रमं इदानीं भस्मसात्कुर्यां समुद्रं सरितांपतिं ६५ एवं ब्रुवति रामे
तु सशैलवनकानना चचाल वसुधा द्यौश्च दिशश्च तमसा हृताः ६६ चुक्षुभे सागरो वेलां भयाद्योजनमत्यगात् तिमि
नक्रझषा मीनाः प्रतप्ताः परितत्रसुः ६७ एतस्मिन्नंतरे साक्षात्सागरो दिव्यरूपधृक् दिव्याभरणसंपन्नः स्वभासा भासयन्
दिशः ६८ स्वांतस्थदिव्यरत्नानि कराभ्यां परिगृह्य सः पदयोः पुरतः क्षिप्त्वा रामस्योपायनं बहु ६९ दंडवत्प्रणिपत्याह रा
मरक्तांतलोचनं त्राहि त्राहि जगन्नाथ राम त्रैलोक्यरक्षक ७०

राम०
१३

क्षुक्षो जात इत्यर्थः प्रतप्ताः जलोष्मवशात् ६७ ६८ उपायनं रत्नानि पादयोः क्षिप्त्वा ६९ प्रणिपत्य रामम् आहेत्यन्वय ७० ॥ श्रीराम ॥

स्वस्यशीघ्रमवागमनेहेतुमाहजगदिति जगतमस्त्राघ्रादितत्तानः एवंचत्वत्सृष्टत्वभावेनज त्वेनमद्नागमननमितिनमेदोषइतिभाव ७१ न
नुवत्तः त्वंकुतइतिचेत्तत्राहस्थूलानीति स्वभावतोजगन्मेवमभवतासृष्टानि तानमसाहंकारतत्त्वयातत्सृष्टेरितिभावः अतत्त्वदाज्ञारूपंज
उत्वनलंघयंतिनत्यजंतितेमत्वायोरूपंभूतमहमितिभावः ७२ तदेवाहतामसादिति अहमः अहकारात कारणगुणाहिकार्येगुणान

जहीजोहंएमतेसृष्टः सृजतानिखिलंजगत स्वभावमन्यथाकर्त्तुंकाः शक्तोदेवनिर्मितं ७१ स्थूलानिपंचभूतानिजग
न्मेवस्वभावतः सृष्टानिभवंतेतानित्वदाज्ञालंघयंतिन ७२ तमसादहमीएमभूतानिप्रभवंतिहिकारणानुगमात्तेषांज
त्वंतामसंस्वतः ७३ निर्गुणस्त्वंनिराकारोयदामायागुणान्प्रभो लीलयांगीकरोषित्वंतदावैराजनामवान् ७४ गु
णात्मनोविराजश्चसत्वादेवावभूविरे रजोगुणात्प्रजेशाद्याः मन्योर्भूतपतिस्तव ५ त्वामहंमायायाछन्नंलीलयामानु
षाकृतिं ७६

रमंतइतिभावः ७३ ननुनिर्गुणस्यममकथंभूतरवष्टत्वमतआहनिर्गुणइतिनिर्गुणोनिराकारोपिलीलयायदामायागुणानांगीकरो
षितदात्वष्टत्वोवैराजनामाख्योर्थः ७४ तत्रकस्माद्गुणात्कस्यसृष्टिरित्यत्राहगुणात्मनोविराजइतिदेवाअत्रसनकादयः प्रजेशाम
न्वाद्याइंद्राद्याश्चमन्योस्तामसः भूतपतिः संहर्त्तारुद्रः ७५ मायायाछन्नंछवत्रात्मस्वरूपंतदेवाहेलात्वयेति ७६

अ०रा०यु०
१४

जडबुद्धिस्तमोबहुत्वात् जडः स्वरूपेणापि जलरूपत्वात् अत एव मूर्खः त्वां निर्गुणं सर्वनियंतृ परमेश्वरत्वेन कथं जानामीत्यर्थः इदानीं तु त्वत्कृतदंडात्त्वत्स्वरूपं ज्ञातमिति वदन् अर्थांतरन्यासमाह दंड एवेति ७७ भूतानां प्राणिनां ७८ अमोघममनिष्फलं यथा भवति तथा

जडबुद्धिर्जडोहं मूर्खः कथं जानामि निर्गुणं दंड एव हि मूर्खाणां सन्मार्गप्रापकः प्रभो ७७ भूतानाममरश्रेष्ठः पञ्चानां लगुणेषु यथा शास्मि तव जानामि शरणं भक्तवत्सल अभयं देहि मे राम लंकामार्गं ददामि ते ७८ रामस्तु उवाच अमोघोयं महाबाणः कस्मिन्देशे निपात्यतां लक्ष्यं दर्शय मे शीघ्रं बाणस्यामोघपातिनः ७९ रामस्य वचनं श्रुत्वा करे दृष्ट्वा महाशरं महोदधिर्महातेजा राघवं वाक्यमब्रवीत ८० रामोत्तरप्रदेशे तु द्रुमकुल्य इति श्रुतः प्रदेशस्तत्र वहवः पापात्मानो दिवानिशं ८१ बाधंते मां रघुश्रेष्ठ तत्र ते पात्यतां शरः रामेण तत्सृष्टो बाणः क्षणादाभीरमंडलं ८२ हत्वा पुनः समागत्य तूणीर एव स्थितः ततोब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ८३ नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्मणः सुतो धीमान्समर्थोस्मिन्कार्ये लब्धवरो हरिः ८४

पातितः ७९ ८० हे राम उत्तरस्मिन्देशे द्रुमकुल्यसंज्ञ आख्यः ८१ तत्र ते षु पापात्मसु ८२ ८३ ब्रह्मणो लब्धवरत्वादस्मिन्कार्ये सेतुबंधनकार्ये ८४

एम०
१४

कीर्त्तिसेतुबंधनकृतां या कीर्त्तिः सेत्वास्तिकादृष्टा सती सर्वलोकपापहंत्री ८५ वनैरैः सहेतिशेषः ८६ पर्वतपादपैः पर्वतैः पादपैश्च ८७
इति श्रीमत्सकलराजविपक्षकृतासमर्थैत्यादिविरुदावलीविराजमानसमहिम्नातिचर्मराणः पुत्रस्य श्रीरामवर्मराणः कृताव ध्यात्मरामायण सेतौ

कीर्त्तिसेतुबंधनकृतां या कीर्त्तिः सेत्वास्ति ज्ञानं तु ते लोकाः सर्वलोकाः सर्वलोकमलापहां इत्युक्त्वा राघवं नत्वा पर्यो सिंधुर्दशा
तां ८५ ततो रामः ससुग्रीवलक्ष्मणाभ्यां समन्वितः नलमाज्ञापयच्छीघ्रं वानरैः सेतुबंधने ८६ ततोतिहृष्टः प्लवगेंद्रमुख्यैर्म
हानगेंद्रप्रतिमैर्युतो नलः बबंध सेतुं शतयोजनायतं सुविस्तृतं पर्वतपादपैर्दृढं ८७ इति श्रीमदध्यात्मरामायणे उमामहेश्व
रसंवादे युद्धकांडे तृतीयः सर्गः ३ सेतुमारभमाणस्तु तत्र रामेश्वरं शिवं संस्थाप्य पूजयित्वाह रामो लोकहिताय च १
प्रणमेत्सेतुबंधं यो दृष्ट्वा रामेश्वरं शिवं ब्रह्महत्यादिपापेभ्यो मुच्यते मदनुग्रहात् २ सेतुबंधे नरः स्नात्वा दृष्ट्वा रामेश्वरं हरं
संकल्पनियतो भूत्वा गत्वा वाराणसीं नरः ३

युद्धकांडे तृतीयः सर्गः ३ सेतुमिति निर्विघ्नतार्थं दृष्टरागांयुरपार्थं च तदेवाह लोकहिताय चेति १ तदेवस्पष्टयति प्रणमेदिति २ संकल्पनि
यतः संकल्पपूर्वमित्यर्थः मध्ये कार्यांतरमकुर्वन्निति यावत् ३

निम्नतम्रदाः जलानयात्रादिभाः ४ चतुर्दशयोजनानिच्छृतानि सेतुयुक्तानिकृतानि ५ ६ त्रयोविंशदिति त्रयोविंशतिरित्यर्थेऽत्रार्षं

आनीयगंगासलिलं रामेशमभिषिंचच समुद्रेतिप्रतज्ञारिवहस्तोत्पसंशय ४ कृतानिप्रथमेनान्हायोजनानिचतुर्दश
द्वितीयेनतथाचान्हायोजनानितुविंशतिः ५ तृतीयेनतथाचान्हायोजनान्येकविंशतिः चतुर्थेनतथाचान्हाचद्वाविंश
तिरितिश्रुतं ६ पंचमेनत्रयोविंशद्योजनानिसमन्ततः बबंधसागरेसेतुंनलोवानरसत्तम ७ तेनैववज्रमुकपयायो
जनानांशतं द्रुतं असंख्याताः सवेलाद्रिंरुरुधुः प्लवगोत्तमाः ८ आरुह्यमारुतिं रामोलक्ष्मणोंगदंतथा दिद
रुक्षुर्वैलंकामारुरोहाचलंमहत् ९ दृष्ट्वालंकांसुविस्तीर्णांनानाचित्रध्वजाकुलां चित्रप्रासादसंबाधांस्वर्णप्राका
रतोरणां १० परिखाभिःशतघ्नीभिःसंक्रमैश्चविराजितां प्रासादोपरिविस्तीर्णप्रदेशेदशकंधरः ११ मंत्रिभिःसहि
तोवीरैःकिरीटदशकोज्ज्वलः नीलाद्रिशिखराकारः कालमेघसमप्रभः १२ रत्नदंडैः सितच्छत्रैरनेकैः परिशोभितः ए
तस्मिन्नंतरेवक्षोमुक्तोरामेणवैशुकः १३ वनरैस्ताडितः सम्यक्दशाननमुपागतः मंदहसन्रावणः प्राहपीडितःकिंपरैः
शुक १४ शुकउ० सागरस्योत्तरेतीरे ब्रुवंतेवचनंयथा ततउत्प्लुत्यकपयोगृहीत्वामांक्षणात्ततः १५

बबंधएवंक्रमेणबबंधेत्यर्थः ७ ८ महदितिङ्गीबत्वमार्षं ९ तोरणंपुरद्वारं १० ११ १२ १३ हेशुकत्वंपरैर्पीडितःकिं १४ तेनवचनमब्रुवस्तथी
वमतीतिशेषः १५

गुष्टिभिर्हंतुं न खर्वं दैतैर्लोष्टुं मुषैत्वंहे राम मन्मारक्षेति क्रोशंतं मां दृष्ट्वा स्वपविसृष्टतामिति वानराभ्याह १६ १७ त्वदुक्तसंधिभेदादिभ्यसभावित

मुष्टिभिर्निर्वद्दैतैश्चहंतुं तोमुंप्रचक्रमुः ततो मां रामरक्षेति क्रोशंतं रघुपुंगवः १६ विसृज्यतामिति प्राह विसृष्टोहं कपिश्वरैः ततोहमागतो भीत्याहद्घातद्वानरं बलं १७ राक्षसानां वालिनोद्यस्य वानरेंद्र बलस्य च नैतयोर्विद्यते संधिर्देवदानवयोरिव १८ पुरमाकारमारमायातिति हि प्रमेकतरं कुरु सीतां वास्मै प्रयच्छाशु युद्धं वा दीयतां प्रभो १९ मामाह राम स्त्वं क्रूहि रावणं मद्वचः शुक एवं त्वं च समाश्रित्य सीतां येन त्वया हृता २० तद्दर्शय यथाकामं ससैन्यः सह बांधवैः श्वः काले नगरीं लंकां सप्राकारां सतोरणां २१ राक्षसं च त्वया स्पशरैर्विध्वंसितं मया घोरं रोषमहं मोक्ष्यावलं धारयरावण २२ इत्युक्तोपरं रामाय रामः कमललोचनः एकस्थानगतायत्र चत्वारः पुरुषर्षभाः २३ श्रीरामो लक्ष्मणश्चैव सुग्रीवश्च विभीषणः एते एव समर्था स्ति लंकां नाशयितुं प्रभोः २४

मित्याह राक्षसानामिति १८ आर्यीतिवानराद्गतिशेषः १९ २० श्वः कालेरित्यर्थः नगरीं लंकामित्यत्र शरैर्विध्वंसितामिति विभक्तिविपरिणा
मेनान्वयः २२ २४

अ॰रा॰यु॰
१६

लंकानाशस्यप्रकारविशेषमाहउत्पाट्यभस्मीकरणेइतियुक्तविंचार्यएकोरामएवतत्राशेतुमित्याहतस्येति २५ प्रपूरितांप्रकीर्षेणपूरितालं
कायपातांयद्वारामतेनसाप्रपूरितां २६ २७ २८ अग्निनंदनः अग्निपुत्रः अथांगदंदर्शयतिएषइति २९ लांगूलंस्फोटयतिभुग्व्यवा

उत्पाटयभस्मीकरणेसर्वेतिष्ठंतुवानराः तस्यपादस्यबलंदर्पंरूपंप्रहरणानिच २५ विधिष्यतियुरंसर्वंएकस्तिष्ठंतुतेत्रयः
यश्चवानरसेनांतामसंख्यातांप्रपूरितां २६ गर्जंतिवानरास्तत्रयश्चपर्वतसन्निभाः नशक्यास्तेगणयितुंप्राधान्येन
ब्रवीमिति २७ एषयोभिमुखोलंकांनदन्तिष्ठतिवानरः यूथपानांसहस्राणांशतेनपरिवारितः २८ सुग्रीवसे
नाधिपतिर्नीलोनामाग्निनंदनः एषपर्वतशृंगाभः पद्मकिंजल्कसन्निभः २९ स्फोटयत्यभिसंरब्धोनलांगूलंच
पुनःपुनः युवराजोंगदोनामवालिपुत्रोतिवीर्यवान् ३० येनदृष्टाजनकजारामस्यातीववल्लभा हनूमानेषविख्या
तोहतोयेनतवात्मजः ३१ श्वेतोरजतसंकाशोमहाबुद्धिपराक्रमः तूर्णंसुग्रीवमागम्यपुनर्गच्छतिवानरः ३२ यस्त्वे
षसिंहसंकाशः यश्चपत्यतुल्यविक्रमः रंभोनाममहासत्वोलंकांनाशयितुंक्षमः ३३

हंति ३० हनूमंतंदर्शयतियेनेति ३१ श्वेतः तंत्रामायः सुग्रीवसमीपमागम्यपुनर्गच्छतिसश्वेतनामा ३२ रंभाख्यंदर्शयतियस्त्विति ३३

राम॰
१६

शरभंदर्शयतिएषइति ३४ अथपनसादीन्दर्शयति ३५ षएषांनीत्तांगदहनुमतश्वेतरंभशरभ वर्णनेगुणकथनेसंख्यानेगणने ३६
रक्षोगणसहितांलंकामित्यर्थः बलसंख्यापोहगणनं ३७ ॰ मयनसमैंदद्विविदनलानांदशानांनवपचसगणकविंशतिरित्यर्थः ३८

एवपशान्तिर्वेलेकांदिधक्षन्निववानरः शरभोनामराजेंद्रकोटियूथपनायनायकः ३४ पनसश्चमहावीर्योमैंदश्चद्विविद
नलयानलश्चसेतुकर्त्तासौविश्वकर्मसुतोबली: ३५ वानराणांवर्णनेचासंख्यानेवाकईश्वरः सर्वेमहाकायाः सर्वेयुद्ध
निकांक्षिणः ३६ शक्ताः सर्वेचूर्णयितुंलंकांरक्षोगणैः सह एतेषाचलसंख्यानमत्रत्यकांवच्मितेरण ३७ एषाकोटिस
हस्राणिनवपंचचसप्तचतथाशंसहस्राणितथार्बुदशतानिच ३८ सुग्रीवसचिवानांतेबलमेतत्प्रकीर्त्तितं अन्येषा
तुबलंनाहंवक्तुंशक्तोस्मिरावण ३९ रामोनमानुषः साक्षादादिनारायणः परः सीतासाक्षाज्जगद्धात्रीचिच्छक्तिर्जगदात्मि
का ४० ताभ्यामेवसमुत्पन्नंजगत्स्थावरजंगमं तस्माद्रामस्यसीताचजगतस्तस्थुषश्चतौ: ४१

३९ जगतस्तस्थुषश्चस्थावरजंगमस्वरूपामायापरवहतपुंदर्शपंजगदेवस्तस्मद्रूपेणेत्याशयः ४० समुत्पन्नंस्थूलरूपेणेत्यर्थः जगतस्तस्थुषश्चस्था
वरजंगमात्मकस्यसंसारस्यतौसीतारामौ ४१

अ·ए·यु·
१७

पितरौ माता पितरौ तयोर्वैरी तद्देखान् कथं भवेत् कथं जीवेदित्यर्थः जगन्माते वेत्यनेनार्थान्तवपि माते तिच्यंग्यं ४२ क्षणनाशित्वेनात्यंता स्थिरत्वं बोधनं तत्रे हेतुः पंचभूतात्मके इति पंचविंशतितत्वके तदात्मके बुध्यहंकारे कादेशेंद्रियपंचभूततद्गुणरूपादिपंचकात्मकत्वात् विकारद्वारा प्रकृतेरप्यत्रानुगम इति चतुर्विंशतितत्वात्मकत्वं ४३ अहंकारस्यालयेस्थानभूतेतेभ्यश्चतुर्विंशतिभ्यो भिन्नस्य चेतन

पितरौ पृथिवी वाल्लतयोर्वैरी कथं भवेत् अतान नाल्यपानीता जगन्माते वक्तुमानकी ४२ क्षणनाशिनि संसारे शरीरे क्षणभंगुरे पंचभूतात्मके राजन् चतुर्विंशे तितत्वके ४३ मलमांसास्थिविड्गेहभूपिंडेः हंकृतालयेः के वास्या प्रति रिक्तस्य कायेन वज्रात्मके ४४ यत्कृते ब्रह्महत्यादि पातकानि कृतानि ते भोगमोक्षातु यो देहः हस देहोत्र पतिष्य ति ४५ पुण्यपापैः समापन्नो जीवेन सुखदुःखयोः कारणे देहयोगादि नात्मनः कुतस्तो निशं ४६

एम०
१७

स्य जडात्मके देहे के वास्था ४४ यस्य देहस्य कृते तत्पो द्ध्यणादिनिमित्तं यो देहः स्थूलः ४५ सुखदुःखयोः कारणे पुण्यपापेन जीवेन स हसमायातः समायास्य तु रलर्थे आर्षं तत् तेच पुण्यपापे देहयोगादिना आत्मनः सुखदुःखे कुतस्तो नतु स्तस्तिः आत्मनरत्यर्थे ४६

देहयोगः कीदृशस्तत्राह यावदिति अध्यासादहंकारतादात्म्याध्यासात् उक्तरीत्या यावच्च देववशोहंकुरुते तत्पर्यः एतेन ज्ञानिनो देहसंबंधेपि दुः
खाद्यभावाद्देहयोगेनैव दुःखमित्ययुक्तमित्यपास्तं उक्ताध्यासरूपस्यैव योगस्य विवक्षितत्वात् ४७ उपसंहरति तस्मादिति ४८ स्वा
ज्ञानस्वस्वरूपस्य शुद्धत्वादेयं ज्ञानं तद्वशातो वंधशरीरादिसंबंधं प्राप्य विमुह्यति पुनः पुनः कर्मसु प्रवर्त्तते अत आत्मानं शुद्धबुद्धमुक्तस्वभावं ज्ञात्वा

यावद्देहीस्मि कर्त्तास्मीत्यात्माहंकुरुते वशः अध्यासात्तावदेवस्याः जन्मनाशादिसंभवः ४७ तस्मात्त्वं त्यज देहादावभि
मानं महामते आत्मातिनिर्मलः शुद्धो विज्ञानात्माचलोव्ययः ४८ स्वाज्ञानवशतो वंधं प्रतिपद्य विमुह्यति तस्मात्त्वं
शुद्धभावेन ज्ञात्वात्मानं सदा स्मर ४९ विरतिं भज सर्वत्र पुत्रदारगृहादिषु निरयेष्वपि भोगः स्याच्छ्वसूकरतनावपि ५०
देहं लब्ध्वा विवेकाढ्यं द्विजत्वं च विशेषतः तत्रापि भारते वर्षे कर्मभूमौ सुदुर्लभं ५१

सदा स्मरेत्यनेनाविच्छेदेन तत्स्मरणाभ्यासो मोक्षहेतुरित्युक्तं ४९ अथ तादृशज्ञानसाधनं वैराग्यमाह विरतिमिति ननु सर्वत्र विरतो भोगस्तु खंहा
पतेतिति तत्राह निरयेष्वपीति एवं चेदृशभोगोपि हेय एवेति भावः ५० सर्वथा दुर्लभं तत्रापि भारते वर्षे कर्मभूमौ सुतरां दुर्लभं विवेकाढ्यं तदाध्य
तायोग्यं देहं लब्ध्वा विशेषतश्च द्विजत्वं लब्ध्वा ५१

अ०रा०यु०
१८

केचिद्विद्वान्देहमात्मसात् आत्माधीनं कृत्वा अर्थात्स्वयं देहभोगाननुरागो भवेदित्यन्वयः योऽलमत्यन्तं तनयश्चेत्यनेन विचुंबकशतोक्ता ५२ सर्वसंगं त्य
क्त्वा राममेवाश्रयेत्यन्वयः ५३ ५४ पुनराह त्रिवर्जित इति पुनराह त्र्यात् अमलोकादुर्जितः हीनः कातरत्यर्थः ५५ ममरकतोपलो मरकतम

कोविद्वानात्मसात्कृत्वा देहं भोगानुगो भवेत् अनंतत्त्वम्ब्राह्मणो भूत्वा योऽलात्यतनयश्चासन् ५२ अज्ञानीव सदा भोगा
ननुधावसि किं मुधा रतः परं वा त्यक्त्वा त्वं सर्वसंगं समाश्रयः ५३ राममेव परात्मानं भक्तिभावेन सर्वदा सीतां समर्प्य
रामाय तत्पादानुचरो भव ५४ विमुक्तः सर्वपापेभ्यो विष्णुलोकं प्रयास्यसि नो चेत् निष्ठुनिष्ठमिधोधः पुनराह त्रिव
र्जितः अंगीकुरुष्व मद्वाक्यं हितमेव वदामि ते ५५ सत्संगति कुरु भजस्व हरिं शरण्यं श्रीराघवं मरकतोपलकांति
कांतं सीतासमेतमनिशं धृतचापबाणं सुग्रीवलक्ष्मणविभीषणसेवितांघ्रिं ५६ इति श्रीमदध्यात्मरामायणे
उमामहेश्वरसंवादे युद्धकांडे चतुर्थः सर्गः ४

रा०म०
१८

शिरस्तत्कांतश्यामदेह ५६ इति श्रीमत्सकलराजविपद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्य श्रीहिम्मतिवर्मणः पुत्रस्य श्रीराम
वर्मणः कृताव ध्यात्मरामायणसेतौ युद्धकांडे चतुर्थः सर्गः ४

अत्रेति १ स्वतरां दुर्गतिमामनुजीव्यममसेव कोऽभूत्त्वेति यावत् गुरुहत्वे कथं भाषसे सर्वशिक्षकं मां शिक्षन् शिक्षयन् इत्यर्थः २ पूर्वकृतं पूर्वोपकृ
तं धिक् पित्वं वधोचितस्तथापि तेव पूर्वोपकारस्मरणेन त्वां रक्षामि त्वन्वरायः ३ एवं एवंविधं वाक्यं गरुडेन वानेसाश्वसं ४ अमुमेवार्थमितिहास

श्रुत्वा शुकमुखोद्गीतं वाक्यमज्ञाननाशनं गरुडः क्रोधताम्राक्षो दहन्निव तमब्रवीत् १ अनुजीव्य गुरुं बुद्ध्या गुरुत्वं भाषसे
कथं शास्ति त्वाहं द्विजमात्र त्वं मां शिक्षत्वल्लज्जसे २ इदानीमेव हन्मि त्वां किंतु पूर्वकृतं तव स्मरामि तेन रक्षामि त्वां पापधीपिव
धोचितः ३ इतो गच्छ विमूढ त्वमेवं श्रुत्वा तु नमेत्तमं महाप्रसाद इत्युक्त्वा वेपमानो गरुत्पणो ४ शुको पिब्राह्मणः पूर्वं ब्रह्मि
ष्ठो ब्रह्मवित्तमः वानप्रस्थविधानेन वने तिष्ठन् चकर्म कृत ५ देवानाममित्रस्यार्थे विनाशाय सुरद्विषां चकार यज्ञवितति
मविच्छिन्नां महामतिः ६ एतासां नाविरोधी मम शुको देवहितो घतः वज्रदंष्ट्र इति ख्यातः सचैको राक्षसो महान् ७ सं
त्यां प्रेक्षणति ष्ठ शुकाय करणो घतः कदाचिदागतागस्त्यस्तस्याश्रमपदं मुनेः ८

पूर्वसाहाय्य शुको पीति ५ अविच्छिन्नां यज्ञवितति मध्ये विच्छेदरहितं यज्ञविस्तारं ६ शुको देवहितोद्यत इति ज्ञात्वा तं राक्षसानां शुके विरोधो हे
ष्यत्वबुद्धिरभूत ७ शुकाय करणो स्य कस्यापकारे उद्यतः शुकारे प्रतिष्ठत प्रतिज्ञानेवानूपरमेयदमाषतस्य शुकस्य ८

अ॰ ए॰ सु॰
१४

~~पितरौ मातापितरौ तेन पोषितौ तौ देवान् कथं भवेत् कथं जीवेदित्यर्थः जगन्नेत्रौ तौ तेनेत्येतान्याहुर्जनापि मया तेनेति चापि १४~~ अंतरमवसरं ९ सातमिषं समांसं १० मांसमोज्यं मांसयुक्तभोज्यं ११ तां च शुक्रभार्यां चातः इष्टपीयं तमांयमा च दिशाभीहयन् एकशात्वा तीव हिंसिनिः सरः एतान्मा

तेन संपूजितो गस्त्यो भोजनार्थं निमंत्रितः गते स्नातुं मुनौ कुंभसंभवे पाप्मवांतरं ९ अगस्त्य रूपधृक्त्योपिराक्षसः शुक्रमब्रवीत यदि दास्यसि मे ब्रह्मन् भोजनं देहि सामिषं १० बहुकालेन भुक्तं मे मांसं त्यागो गसंभवत थेति कारयामास मांसं भोज्यं सुविस्तरं ११ उपविष्टे मुनौ भोक्तुं राक्षसो तीव सुंदरं शुक्रभार्यावपुर्धृत्वा तां तमोहयन् बलः १२ नरमांसं ददौ तस्मै सूपकं बहुविस्तरं दृष्ट्वैवान्नं देवेशः सत्वतो दृष्ट्वा चुकोपसः १३ अमेध्यमानुषं मांसममगस्त्यः शुक्रमब्रवीत् अभक्ष्यं मानुषं भोरदत्तवान सि दुर्मते १४ मत्यत्वं राक्षसो भूत्वा तिष्ठ त्वं मानुषाशनः इति शापः पुरोभीत्या प्राह गस्त्यं मुने त्वया १५ इदानीं भाषितं मेय मांसं देहीति विस्तरं तथैव दत्तं मे देव किं मे शापं प्रदास्यसि १६

एम॰
१४

कुर्वन् १२ सः आगत्य अमेध्यमांसं दृष्ट्वा चुकोप कुपितः अगस्त्यः शुक्रमब्रवीत् १३ १४ यतस्त्वमत्यं मानुषं मांसं दत्तवानसि अतस्त्वं मानुषाशनो राक्षसो भूत्वा तिष्ठ १५ अद्य मे विस्तरं विस्तरयुक्तं मांसं देहीति दत्तानीमुक्तं तथैव च मया दत्तं अतो मे मम शापं किं प्रदास्यसि आर्षमेतत् १६

१७ १८ पतोमिवचोमोघंननिष्फलमत एवमेवमद्वक्तं भविष्यतितदेवदन् शायांतमाहरणत्तसंधयुरिति १९ २० तदागमनोत्तरं एव
रोनप्रेषितश्चारोभूत्वारघूत्तमं दृष्ट्वा शायाज्ञिनिर्मुक्तः रतः स्वभावादिनिर्मुक्तो २१ एवंणांतत्वज्ञानं बोधयित्वा चततो मक्तः मत्समी

श्रुत्वाशुकस्य वचनं महत्तं ध्यानमास्थितः ज्ञात्वारत्नः कृतं सर्वं ततः प्राह शुकं सुधीः १७ तवापकारिणा सर्वं रावण
सेन कृतं त्विदं अविचार्यैव मेदत्तः शापस्तेमुनिसत्तम १८ तथापि मे वचो ऽमोघमेव भविष्यति एतत्संवयुणस्या
यरावणस्य सहायकृत १९ तिष्ठ तावद्यदा रामो दृशाननं वधायहि आगमिष्यति लंकायाः समीपं वानरैः सह २०
प्रेषितो रावणेन त्वं चारो भूत्वा रघूत्तम दृष्ट्वा शापाद्धि निर्मुक्तो बोधयित्वा च रावणं २१ तन्तु ज्ञात्वा ततो मुक्तः परयदमवा
प्स्यसि इत्युक्तोगस्त्यमुनिना शुको ब्रह्मसत्तमः २२ बभूव राक्षसः घोरो रावणं प्राप्य संस्थितः इदानीं चाररूपेण दृष्ट्वा राम
महानुज २३ एवं तत्वविज्ञानं बोधयित्वा पुनर्ईतं पूर्ववद्ब्राह्मणो भूत्वा स्थितो वैखानसैः सह २४ ततः समागमे दृष्ट्वा
माल्यवान्नादौ सो महान् बुद्धिमान्ज्ञानी तिति निपुणोरत्नो मातुः प्रियः पिता २५

पाद्दष्टेतितेनत्पक्तः परपदं स्वैवैखानसं पदं २२ २३ २४ एतोमातुः पित्राराज्ञः प्रियश्चेत्यर्थः २५ ॥

अ॰ए॰यु॰ २६ मद्रादिजानकीप्रवेशादिना दारभ्य मुर्यां लकायां घोराणि निमित्तानि अत्याता दृश्यंते इत्यन्वः २७ घोरत्वविवरणं नाशहेतूनीति खरं कठोरं स्त निं तगर्जितं तन्निर्घोषः सवज्रपाताः शब्दश्रयेषां ते २८ देवलिंगानि देवानां स्थानस्थताः प्रतिमाः खिद्यंति खिद्यंति २९ अग्रतः प्रतिएत्हं से
२०

प्राहतं राक्षसं वीरं स्त्रशांतेनांतरात्मना शृणु राजन वचो मेद्य श्रुत्वा कुरु यथेप्सितं २९ यदा प्रविष्टा नगरीं जानकी रा मवल्लभा तदादि पुर्यां दृश्यंते निमित्तानि दशानन घोराणि नाशहेतूनि तानि मे वदतः शृणु खरस्तनितनि र्घोषा मेघा अतिभयंकराः २८ शोणितेनाभिवर्षन्ति लंकामुष्णेन सर्वदा रुदंति देवलिंगानि स्विद्यंति प्रचलं ति च २९ कालिकां पांडुरैर्दंतैः प्रहसंत्यग्रतः स्थिता खरा गोषु प्रजायंते मूषका नकुलैः सह ३० मार्जारेण तु युध्यंति पन्नगा गरुडेन तु करालो विकटो मुंडः पुरुषः कृष्णपिंगलः ३१ कालो गृहाणि सर्वेषां काले काले ह्यवेक्षते एता न्यन्यानि दृश्यंते निमित्तान्युद्भवंति च ३२

पुरः स्थिता कामाकुरदंतैः प्रकाशैतैर्हसति सर्वान् मत्त्या भीत्या शयेन हासः नकुलसहिता मूषका मार्जारेण सह मार्जारैर्युध्यंतिते नास्तीभत्ते भोवा नरमतु षेभ्यएव रस्तसांभयमितिसचितं ३० ३१ कालो मृत्युलरूपः कोकालेसायंप्रातश्चेत्यर्थः एतान्युक्तानिए वंजातीयकान्यन्यानि चित्रजातानि दृश्यंते अन्यान्यप्रद्भवतिज्ञायंते ३२
एम॰
२०

शांतिं त्पातस्य चिंता रिष्टनाशकं कर्मतदेव कर्माहसीताम्पिति ३३ रामस्य नारायणत्वेगम कैमाह यत्पादेति यौ तौ नौ कात्तानितत्तरंती त्यत्वयः ३४ भक्त्या पूतं पवित्रं अतः करणं येषां ते भक्तिफताः आर्यैरेफलीयः सर्वेषां तद्धृदयं आत्मयः स्थानं यस्तेन सर्वो नर्मामिए मित्यर्थः ३५ भक्तैत्यस्त थायी त्यादि भक्त्या राम भक्त्या कुलस्य कुशलमेव कौशलं तदेतवेतत्रिमित्तमित्यर्थः ३६ नमर्षमतिन

अतः कुलस्य रक्षार्थं शांतिं कुरु दशानन सीतां सत्कृत्य सधनां रामाया शुप्रयच्छभो ३३ रामं नारायणं विद्धि विद्वेषं त्यज राघवे यत्पादपोत माश्रित्य ज्ञानिनो भवसागरं ३४ तरंति भक्तिफताना स्ततो रामो न मानुषः भज स्वभक्ति भावेन रामं सर्वं त्वदाल्लयं ३५ यद्यपि त्वं दुराचारी भक्त्या रामो भविष्यसि मद्वाक्यं कुरु राजेंद्र कुकौशलहेतवे ३६ तन्नु भाल्यवतो वाक्यं हितमुक्तं दशाननः नमर्षयति दुष्टात्मा कालस्य वशमागतः ३७ मानवं कृपणं रामं एकं शाखामृगाश्रयं समर्थं मन्यसे केनहीनं पित्रा मुनिप्रियं ३८ रामेणा प्रेषितो नूनं भाषसे त्वमनर्गलं गच्छ हे द्वेषिवृंधु स्त्वं सोढं सर्वं त्वयोदितः ३९

हितत्विनगहृणहार्नात्पर्थः ३७ अमर्षमेनप्रकटपतिमानवमितिद यणांअस्मदादिदयायात्रं शाखामृगावानराश्रुनिति प्रियत्वेनातिनि : मारत्वसूचितः ३८ पतरूवं दृद्धोवंधुरनत्तेयोदितसवंसोटं ३९ ॥

अ॰ रा॰ यु॰
२१

ततस्तव वृतक्रात्रिः सतमेतद्वचः कार्गापदवीदहतिमस्थितः समामध्यादावगाइति शेषः ४० समुपस्थितान् संनिहितान् ४१ समाहृतंस
मानीयदत्तं ४२ ४३ स्वेतछत्रसहस्त्राणि अतिमहत्वादेहस्यानेकाछत्रधारणात् ४४ पणवानकगोमुखैः वाद्यशेषैः ४५ कृतवाह

इतोमत्कार्गायदवीदहत्येतद्वचस्तव इत्युक्त्वासर्वेसविवैः सहितः प्रस्थितस्तदा ४० प्रासादाग्रेसमासीनोयशपन्वातर
सैनिकान् युद्धायपीजपातसर्वानुत्तसान्समुपस्थितान् ४१ एभीविधनुरादायपलत्तगोनसमात्दतदृष्टारावणमासी
नकोयेनकल्तुषीकृतः ४२ किरीटिनंसमासीनंमंत्रिभिः परिवेष्टिते शशांकार्धनिभेनैकेनरणद्यवः ४३ श्वेतछत्रस
हस्त्राणिकिरीटदशकंतथा चिछेदनिमिषार्द्धेनतदद्भुतमिवाभवत् ४४ लज्जितोरावणस्तूर्णीविवेशभवनंस्वकं आ
दयराहृसान्सर्वान्प्रहस्तप्रमुखान्बलः ४५ वानरैः सहयुद्धायनोदयामासत्वरः ततोभेरीमृदंगाद्यैः पणवानक
गोमुखैः ४५ गहिषोष्ट्रैःखरैः सिंहैर्द्वीपिभिः कृतवाहनाः खड्गमलधनुः पाशयष्टितोमरशक्तिभिः ४६ लज्जिताः
सर्वतोलंकांप्रतिद्वारमुपायप्रुः तत्कृवंमेवरामेणनोदितावानर्षभा ४७

नाःस्तद्वहनीयरथारूढाखड्गादिभिरायुधैर्लज्जिताः तादृशायुधधरास्त्वर्थः ४६ लंकासर्वत्रः प्रतिद्वारंचोपायप्रुः ४७ ॥

रामं॰
२१

शृंगाणि गृहीतोन्नतभागाः शिखराणि ततो विपुलानि गुहायस्थितानि भातीति शेषः ४८ एवमस्य भागशः तत्तत्प्रदेशं स्वात्स्वरत्तरणीयांशत्वेन
गृहीत्वा स्थितानीति शेषः ४९ तेद्रुमैरित्यादौ रूपलक्षितानीति शेषः सहस्रपृथाः सहस्रसंख्यासंख्यया पृथाः येषां ५० आप्लवंतः ऊर्ध्वं

उद्यमस्य गिरिशृंगाणि शिखराणि महांतिच तरुपत्रोत्पाद्यविविधान् गुहायहरिपृथपाः ४८ प्रेक्षमाणा एव रामस्य तान्यती
कानि भागशः राघवप्रियकामार्थं लंकामारुरुहुस्तदा ४९ ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमाः ततः सहस्रपृथा
श्च कोटिपृथाश्च पृथपाः ५० कोटीशतयुताश्चान्ये रुरुधुर्नगरं भृशं आप्लवंतश्च गर्जंतश्च प्लवंगमाः ५१ रामोज
यत्यतिबलो लक्ष्मणश्च महाबलः राजीजपतिः सुग्रीवो राघवेणानुपालितः ५२ इत्येवं घोषयंतश्च समं युयुधिरे रिभिः
हनूमानंगदश्चैव कुमुदो नील एव च ५३ नलश्च शरभश्चैव मैंदो द्विविद एव च जांबवान् दधिवक्त्रश्च केसरी तार एव च
५४ अन्ये च बलिनः सर्वे पृथपाश्च प्लवंगमाः द्वारएयुत्प्लुत्य लंकायाः सर्वतो रुरुधुर्भृशं तदा वृक्षैर्महाकायाः पर्वता
ग्रैश्च वानराः ५५ निजघ्नुस्तानि रक्षांसि नखैर्दंतैश्च वेगिताः राक्षसाश्च तदा भीमा द्वारेभ्यः सर्वतो रुषा ५६

प्लवंतः पुनरधः पतंतः ५१ ५२ अरिभिः सत्रोभैः ५३ ५४ सर्वतो रुरुधुः यथा रक्षसां बहिर्निर्गमो न भवति तथा स्वयमंतः प्रविविशु रित्यर्थः ५५
५६

निर्गत्य वलितवान् ततो निःसार्य स्वयं च बहिरागत्येत्यर्थः ५७ समरः मांसशोणिताभ्यां कर्दमयुतभूप्रदेशकः ५८ अश्रुतो यमः अश्रु
तायुणमीयं तेनैव मः सकलान्द्रुतयुद्धो यमानभूतः समरः सबभूवेत्यन्वयः ५९ ६० निस्सुदष्टत्वात् वानराणां हृष्टत्वं बलित्वं बतित्वं च सी

निर्गत्य भिंडिपालैश्च खड्गैः शूलैः परश्वधैः निजघ्नुर्वानरानीकं महाकाया महाबलाः ५७ राक्षसांश्च तदा जघ्नुर्वानरा जि
तकाशिनः तथा बभूव समरो मांसशोणितकर्दमः ५८ राक्षसानां वानराणां च सबभूवाश्रुतो यमः ते हयैश्च गजैश्चैव र
थैः कांचनसन्निभैः ५९ राक्षसा व्याघ्रयुयुधिरे नादयंतो दिशो दश राक्षसाश्च कपीन्द्राश्च परस्परजयैषिणः ६० राक्षसा
न् वानरा जघ्नुर्वानराश्चैव राक्षसाः रामेण विष्णुना दृष्टा हरयो दिवि जांशजाः ६१ बभूवुर्वलिनो दृष्टास्तदा पीताम्
ताश्च सीताभिमर्षपापेन रावणेनाभिपालितान् ६२ हतश्रीकान् हतबलान् राक्षसान् जघ्नुरोजसा चतुर्थांशावशे
षेणानिहतं राक्षसं बलं ६३ स्वसैन्यं निहतं दृष्ट्वा मेघनादोऽथ दुष्टधीः ब्रह्मदत्तवरः श्रीमानंतर्धानं गतोऽस्तरः ६४

तापादुष्टभावस्पर्शजनितपापवता रावणेन पालितत्वाद्राक्षसां हतश्रीकत्वाद्यतिरेकालंकारः ६१ ६२ ६३ अंतर्धानमदृश्यत्वं ६४

ब्रह्मास्त्रेण युतानि नानाविधानि शस्त्राणि मुंचन्निति शेषः वानरसेनां पीयन्नामस्योपरि शरजालानि ववर्ष ६५ ६६ वानराणां बलं पतितं द
र्शनात्तस्य कोप ६७ कुपितस्याह चापमिति चापहस्तस्यापि क्रोधातिशयेन तद्विस्तरणादिव चापमानयेत्युक्तिः रघूत्तम लक्ष्मण ६८

सर्वास्त्रकुशलो योऽसौ ब्रह्मास्त्रेण समंततः नानाविधानि शस्त्राणि वानरानीकमर्दयन् ६५ ववर्ष शरजालानि तदद्भु
तमिवाभवत् रामोऽपि मानयन् ब्राह्ममस्त्रमस्त्रविदां वरः ६६ तूष्णीं तस्थौ मुवासाय ददर्श पतितं बलं वानराणां रघुश्रेष्ठ
श्चुकोपानलसन्निभः ६७ चापमानय सौमित्रे ब्रह्मास्त्रेणासुरं ह्यहम् भस्मीकरोमि मे पश्य बलमद्य रघूत्तम ६८
मेघनादोऽपि तच्छ्रुत्वा रामवाक्यमतंद्रितः तूर्णं जगाम नगरं मायया मायिकोऽसुरः ६९ पतितं वानरानीकं दृष्ट्वा रामोऽति
दुःखितः उवाच मारुतिं शीघ्रं गत्वा क्षीरमहोदधिं ७० तत्र द्रोणगिरिर्नाम दिव्यौषधिसमुद्भवः तमानय द्रुतं गत्वा
संजीवय महामते ७१ वानरौघं महासत्त्वान् कीर्तिस्ते सुस्थिरा भवेत् आज्ञाप्रमाणमित्युक्त्वा जगामानि
लनंदनः ७२

रामवाक्यं श्रुत्वा भीतः सन् जगाम मायया पापाः दशाः सन्नेव जगाम ६९ ७० दिव्यौषधिसमुद्भवः दिव्यौषधीनां समुद्भवो यस्मिन्नित्यर्थः संजीवय जी
वनं रोगघ्नानित्यन्वयः ७१

आपणाविति श्रेदः सिदुसंकल्पस्य हनूमतः एकमेन संदेशधयं ७३ ७४ ७५ मंत्रिणोपेचबांधवाः होसकवैगछंतु एतत्तिमत्त्रियकांक्षिणः
७६ प्राणाविक्लवात प्राणनाशभयात एवं च प्राणनाशे सर्वथा प्राप्ते यशोरक्षणाय युद्धार्थं गमनमेव उपाय इति भावः ७७ ७८ ७९ वा

आनीय च गिरिं सर्वान् वनरान् वानरर्षभः जीवयित्वा पुनस्तत्र स्थापयित्वा यथोदितं ७३ पूर्ववन्मद्रवं नादं वानराणां
बलोद्यतः श्रुत्वा विस्मयमापन्नो रावणो वाक्यमब्रवीत् ७४ राघवो मे महान् शत्रुः प्राप्तो दैवविनिर्मितः हंतुं तं सम
रे शीघ्रं गच्छतु मम प्रथयाः ७५ मंत्रिणो बांधवाः शूराः ये च मत्प्रियकांक्षिणः सर्वे गच्छंतु युद्धाय त्वरितं मम शासन
नात् ७६ ये न गच्छंति युद्धाय भीरवः प्राणविक्लवात् तान् हनिष्याम्यहं सर्वान् मच्छासनपराङ्मुखान् ७७ तच्छ्रुत्वा भय
संत्रस्ता निर्जग्मू रणकोविदाः अतिकायः प्रहस्तश्च महानादमहोदरौ ७८ देवशत्रुर्निकुंभश्च देवांतकनरांतकौ अ
परे बलिनः सर्वे ययुर्युद्धाय वानरैः ७९ एते चान्ये च बहवः शूराः शतसहस्रशः प्रविश्य वानरं सैन्यं ममंथुर्बलदर्पिताः ८०
भुशुंडैर्भिंडिपालैश्च बाणैः खड्गैः परश्वधैः अन्यैश्च विविधैरस्त्रैर्निजघ्नुर्हरियूथपान् ८१ तेषां दंष्टैः पर्वताग्रैर्नखैर्दंष्ट्रै
श्च मुष्टिभिः प्राणोविमोचयामासुः सर्वराक्षसयूथपान् ८२

नराणामिदं वानरर्माषीपात् तैसैन्यं प्रविश्य ममंथुः अरर्थात्तत्सैन्यमेव ८० भुशुंडिभिंदिपालास्त्रायुधविशेषाः ८१ ८२

८३ ८४ रामतेजः समाविश्य प्राप्यतत्तेजः समामवेशेन बलवत्वे हेतुमाह रामशक्तीति ८४ सर्वेश्वरः संकल्पमात्रेण सर्वसंहारसमर्थो
पि मायया मायन्मनुष्यत्वविडंबनं तद्नुकरणं तेन हेतुना तत्त्रिर्वोहाय युद्धादिलीलाः हृ यंमायां मायां वितनोति ८५ इति श्रीमत्सकलराजवि

रामेण निहताः केचित्सुग्रीवेण तथा परे हनुमता चांगदेन लक्ष्मणेन महात्मना ८३ कथं यैर्वानराणां ते निहताः सर्वरा
क्षसाः रामतेजः समाविश्य वानरा बलिनोभवत ८४ रामशक्तिविहीनानामेवं शक्तिः कुतो भवेत् ८४ सर्वेश्वर
सर्वमयो विधाता मायया मनुष्यत्वविडंबनेन सदानंदमयो पि रामो युद्धादिलीलां वितनोति मायां ८५ इति श्री
मदध्यात्मरामायणे उमामहेश्वरसंवादे युद्धकांडे पंचमः सर्गः ५ श्रुत्वा युद्धे बलं नष्टमतिकायमुखं महत् रावणो दुःखसं
तप्तः क्रोधेन महताऽवृतः १ निधाय धैर्यं इंद्रजितं लंकारक्षणार्थं द्वाप्यतिः स्वयं जगाम युद्धाय रामेण सह राक्षसैः २ दिव्यं
स्यंदनमारुह्य सर्वशस्त्रास्त्रसंयुतं राममेवाभिदुद्राव रावणस्तत्र सोऽमहाबलं ३

परहरणसमर्थेत्यादिविरुदावलीविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतायामध्यात्मरामायणसेतौ युद्धकांडे पंचमः सर्गः
५ श्रुत्वेति त्रातिकायमुखं तत्प्रधानं १ लंकारक्षणार्थमिंद्रजितं लंकायां निधाय स्थापयित्वा २ ३

अ॰ए॰यु॰
२५

आशीत्पर्णगतां नाल्गतां जिह्वां दंष्ट्राग्ने ४ महासत्वं महाबलं मयदत्तां मयस्त्वां मंदोदरी पित्रदत्तां ५ विभिषणविघातिनीं तस्मात् रामहरां णमदत्ताभयत्वादयमस्तरणः स्वरः ब्रघार्होनशक्तिश्च यादशातिरिक्तेष्वमोघैर्वनि ६ ज्ञात्वा विचार्य विभीषणं पुरतः तं रक्षतः कृत्वा शक्ति

वानरेन्द्रः शोहत्वा वाणेराशी विषोपमैः पातयामास सुग्रीवमनुखान् प्रथनायकान् गदापाणिं महासत्वं तत्र दृष्ट्वा विभीषणं उत्ससर्ज महाशक्तिं मयदत्तां विभीषणे ५ तामापतंतीमालोक्य विभीषणविघातिनीं दत्ताभयो यं रामेणव धार्होनायमास्त्वरः ६ इत्यालक्ष्मणो भीमं चापमादाय वीर्यवान् विभीषणस्य पुरतः स्थितो कंप इवाचलः ७ सा शक्तिर्लक्ष्मणतनुं विवेशामोघशक्तितः पावत्य शक्त्यो लोके मायाः संभवंति हि ८ तासां मायाधारभूतस्य लक्ष्मणस्य महात्मनः मायाशक्त्या भवेत्किंवा शेषांशस्य हरित्वनोः ९

एम॰
२४

संमुखे स्थितः ७ अमोघशक्तितः अमोघसामर्थ्यवत्वात् नत्वेकथं लक्ष्मणस्पर्शाविनं तत्राह पावत्य इति संभवंति मिकटीभवंति ८ ईश्वरे चैतन्य संबंधादिव जगत् पां मायापां सर्वशक्तिप्रादुर्भाव इति तासां मायाधारभूतो लक्ष्मणो नः सर्वशक्तिचालकस्य मायाशक्त्या माया निर्मितशक्त्या न मतिरिति भावः ९

नन्वेवं मूर्छापि कुत इत्यत आह तथापीति नरतुल्यत्वतः नटवत्तत्स्वीकुर्वन् अन्यथा रावणस्यामनुष्यत्वात्तेन मृतिर्दुर्लभेत्याशयेन मूर्छादि नाटनमिति भावः १० तोलयितुं चालयितुं न शक्तोऽभवत् सुतरामुत्थापयितुं तेन चातिविस्मित आसीत् तत्र हेतुमाह सर्वस्येति विराजं

तथापि मानुषं भावमापन्नस्तदनुव्रतः मूर्छितः पतितो भूमौ तमादातुं दशाननः १० हस्ताभ्यां तोलयितुं शक्तो नाभवदति विस्मितः सर्वस्य जगतः सारं विराजं परमेश्वरं ११ कथं लोकाश्रयं विष्णुं तोलयेत्तद्गुणात्मकः गृहीतुकामं सौमित्रिं रावणं वीक्ष्य मारुतिः १२ आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना तेन मुष्टिप्रहारेण जानुभ्यामपतद्भुवि १३ आस्यैश्च नेत्रश्रवणैरुद्वमन् रुधिरं बहु विघूर्णमाननयनो रथोपस्थ उपाविशत् १४ अथ लक्ष्मणमादाय हनूमान् रावणार्दितं आनयद्रामसामीप्यं बाहुभ्यां परिगृह्य तं १५ हनूमतः सुहृत्त्वेन भक्त्या च परमेश्वरः लघुत्वमगमद्देवो गुरूणां गुरुरव्ययः १६ सा शक्तिरपि तं त्यक्त्वा ज्ञात्वा नारायणांशजं रावणस्य रथं प्रागाच्छ्रावणो विशन्नेत्ततः १७ संज्ञामवाप्य जग्राह बाणासनमथोरुषा राममेवाभिदुद्राव दृष्ट्वा रामोऽपि तं क्रुधः १८

सर्वजगद्रूपेण भासमानं अत एव जगतः सारं ११ १२ अपतत् रावणः १३ १४ १५ भक्त पोतस्य लेभक्तत्वादिति भावः गुरूणां गरिष्ठानां १६ नारायणांशजं तत्त्वेन स्वाविषयं ज्ञात्वा १७ बाणासनं धनुः १८

अ॰रा॰यु॰
२५

रावणं रथस्थं दृष्ट्वा लोकदस्यात्तत्साम्यापहन्तुं यं तमाहत्याभिदुद्राव: १९ वज्रस्य निर्घातः घोषो निर्घातः २० मे पुरः स्थित्वा क्व गमिष्यसि
सर्वत्र समदर्शिनः तेनैतो गमदृश्यधिषेयगमनं तत्संभावितमिति भावः किंच यद्यप्यहं सर्वत्र समदर्शी तथापि त्वं प्रथमं क्वल्याञ्जीवनं दुर्ल

आरुह्य जगतां नाथो हनूमंतं महाबलं रथस्थं रावणं दृष्ट्वा अभिदुद्राव राघवः १९ ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिष्ठुरं गंभीरया वाचा राक्षसेंद्रमुवाच ह २० राक्षसाधम तिष्ठाद्य क्व गमिष्यसि मे पुरः कृत्वापराधं मे सर्वत्र समदर्शिनः २१ येन बाणेन निहता राक्षसास्ते जनालये तेनैव त्वां हनिष्यामि तिष्ठाद्य मम गोचरे २२ श्रीरामस्य वचः श्रुत्वा रावणो मारुतात्मजं वहंतं राघवं संख्ये शरैस्तीक्ष्णैरताडयत् २३ हतस्यापि शरैस्तीक्ष्णैर्वायुसूनोः स्वतेजसा ववर्ध तद्गुणं तेजो ननर्द च महाकपिः २४ ततो दृष्ट्वा हनूमंतं सव्रणं रघुसत्तमः क्रोधमाहारयामास कालरुद्र इवापरः २५

भं एतावदेव मे समदर्शित्वं यत्कर्मानुरूपफलदत्वं अन्यथा वैषम्यनैर्घृण्ये आपद्येतामिति भावः २१ अन्यदपि समदर्शित्वमाह येनेति निनु विन
नु विषादिलिप्सादिभिरित्याशयः २२ राघवं वहंतं हनूमंतमताडयत् २३ स्वतेजसा स्वीयेन स्वमतेरोदृग्तेजसा तेजो व्यवर्धत यहा रामः स्वतेजसा
तेजो व्यवर्धत यहा रामः स्वतेजसा हनूमतस्तेजो व्यवर्धयदित्यर्थः २५

राम॰
२५

अंजसाशीघ्रं युगपदेवेतियावत् २६ पाकारिरिंद्रः २७ तंसमीक्ष्य तादृशावस्थंरावणंसमीक्ष्य २८ तादृशावस्थवीरस्यहननान्नि
श्चितस्मात्कार्यशेषंचविचार्यकिरीटमेवचिच्छेद ततोरावणंप्रतिउवाचेतिशेषः तेदेवाहानुजानामीति २९ लंकांप्रविश्याश्वास्य

साश्वंरथंध्वजंसत्वंशस्त्रौघंधनुरंजसा छत्रंपताकांतरसाचिच्छेदसितसायकैः २६ ततोमहाशरेणाशुरावणंरघुस
त्तमः विव्याधवज्रकल्पेनपाकारिरिवपर्वतं २७ रामबाणाहतोवीरश्चचालचमुमोहच हस्तान्निपतितश्चापस्तंसमी
क्ष्यरघूत्तमः २८ अर्धचंद्रेणचिच्छेदतत्किरीटंरविप्रभं अनुजानामिगच्छत्वमिदानींवाणपीडितः २९ प्रविश्यलंका
माश्वास्यश्वः पश्यसिवलंमम रामबाणेनसंविद्धोहतदर्पोथरावणः ३० महत्यालज्जयायुक्तोलंकांप्रविशदातुरः
रामोपिलक्ष्मणंदृष्ट्वामूर्छितंपतितंभुवि ३१ मानुषत्वमुपाश्रित्यत्यलीलयानुशुशोचह ततः प्राहहनूमंतंवत्सेजी
वयलक्ष्मणं ३२ महौषधीःसमानीयपूर्ववद्वानरानपि तथेतिराघवेणोक्तोजगामाशुमहाकपिः ३३ हनूमान्वायुवे
गेनतूर्णमतीत्वामहोदधिं एतस्मिन्नंतरेचारारावणायन्यवेदयन् ३४

श्चावलंपश्यसीत्युक्तरतिशेषः ३० ३१ लीलयेत्यनेनवस्तुतःशोकाभावमुक्तं ३१ वानरानपि अपिनालक्ष्मणं ३३ तूर्णान्
महोदधिंतीर्त्वागत्वोषधीरानयामीतिप्रतिशेषः जगामेत्यनेनान्वयः मस्यानुमुघतइत्यर्थः ३४

अ.रा.पु.
२६

नेतुंस्त्वानेतुं ३५ ३६ स्थितः कालनेतमिः ३७ किमागमनकारणमितिरावणायप्रष्टेतिशेषः ३८ कष्टमेवाहमयेति ३९ गतः युद्धमूमेःप्र
स्थितइत्यर्थः ४० कालात्ययः अस्तनस्तूर्योदयस्तु ४१ हेईशरावणेतिछेदः धादः धारयहृदयेइतिशेषः ४२ ४३ तथैवमेभविष्यतिमत्पु

रामेणप्रेषितोदेवहनूमान्क्षीरसागरं गतोनेतुंलक्ष्मणस्यसंजीवनार्थंमहौषधीः ३५ श्रुत्वातच्चारवचनंराजाचिंतापरोभवत्ज
गामरात्रिविकालेकालनेमिगृहंत्वरणात् ३६ गृहागतंसमालोक्यरावणंविस्मयान्वितः अर्घ्यादिकंततः कृत्वाएवणस्याग्रतः
३७ किंतेकरोमिराजेंद्रकिमागमनकारणं कालनेमिमुखाचेदंरावणोडःखयीऽित्तः ३८ ममापिकालवशतः कष्टमेतदुप
स्थितं मयाशक्त्याहतोवीरोलक्ष्मणः पतितोभुवि ३९ तंजीवयितुमानेतुंमौषधीर्हनूमानगतः यथातस्यभवेद्विघ्नंतथा
कुरुमहामते ४० माययामुनिवेषेणमोहयस्वमहाकपिं कालात्ययोपयथामूयात्तथाकुरुत्वंहिमंदिरे ४१ एवरणस्यवचःश्रु
त्वाकालनेमिरुवाचतं एवमीशवचोघश्रणुधारयतत्वतः ४२ प्रियंतेकारवाण्येवनमप्राणान्धोरयाम्यहं मारीचस्ययथारणे
पुराभूत्मृगरूपिणः ४३ तथैवमेनसंदेहोभविष्यतिदशाननहतोःपुत्राश्चपौत्राश्चबांधवारात्तसाश्चते ४४ घातयित्वासुर
कुलंजीवितेनापिकिंतव राज्येनवासीतयावाकिंदेहेनजनात्मना ४५

रेवमभविष्यतीत्यर्थः ४४ असुरकुलमितिछेदः किंदःकिंफलंजडात्मनाजः स्वरूपेण ४५ ॥

रा०
२६

श्रीसुंदरकांडप्रारंभः

आ॰ रा॰ सु॰ ६ श्रीगणेशाय नमः ॥ शतं ति लिलंघयिषुः स्वार्थे सीता च आनंदसंदोहः तत्सम हनूमत् तत्सम इत्यन्वयः १ २ रामनिर्मुक्तं रामसक्तं पश्यामीति
१
भाविसंपिवन्नेमान त्वां रीयावश्यभाविन्यघातनाम ३ कृतार्थः उगत्मा तदर्शनेनेति भावः ममसमुद्रलंघनमकिंचित्करमित्याह प्राणेति

श्रीगणेशाय नमः ॥ शतयोजनविस्तीर्णमसमुद्रं मकरालयं लिलंघयिषुरानंदसंदोहो मारुतात्मजः १ ध्यात्वा रामं यरा
त्मानमिदं वचनमब्रवीत् पश्यंतु वानराः सर्वे गच्छंतं मां विहायसा २ अमोघं रामनिर्मुक्तं महाबाणमिवाखिलाः पश्या
म्यद्यैव रामस्य पत्नीं जनकनंदिनीं ३ कृतार्थोहं कृतार्थोहं पुनः पश्यामि राघवं प्राणप्रयाणसमये यस्य नाम स
कृत्स्मरन् ४ नरस्तितर्त्यभवांभोधिमपारं पातितस्य दं किं पुनस्तस्य हृत्सो हं तदंगांगुलिमुद्रिकः ५ तमेव त्वदपेक्ष्याता
लंघयाम्यस्ववारिधिं इत्युक्त्वा हनूमान् बाहू प्रसार्यायतवालधिः ६ ६ ६ ६ ६ ६

७ अपारमितसुमपात्वपित्रिविधपरिच्छेदस्यमंततस्यदंतत्त्वरूयंतदंगम तापात्रं गुलिस्तम्भ्रषरामज्जायामुद्रिकामात्र सास्तीस
शेत्राघच ५ अस्मवारिविमितस्यांरभवांभोधिर्मितिरि कालंकारः तं लंघयामीति किं वक्तव्यमित्यन्वयः बाहू इत्यादि वानरो लं
घनजीतितवर्णनं आयतवालधिः प्रसारितपुच्छः ६

राम॰
१

अजग्रीवमूर्ध्वदृष्टिरित्यर्थः क्रमेधारयः अनिलोवायुस्तत्सदृशपराक्रमः ७ आकाशात् आकाशेस्थित्वेत्यर्थः ८ यान
दर्शसत्वस्यवानरीयवलस्यबुद्धेश्च परीक्षणार्थमिदं मनुवचनविचारयामासुरित्यर्थः नदृश्यतीत्येवंविचार्येतिधात् नामतेका

ऊर्ध्वग्रीवोर्ध्वदृष्टिः सन्नाकुंचितपदद्वयः दक्षिणाभिमुखस्तंस्तपुनर्वेगेनिलविक्रमः ७ आकाशाच्चरितं देवैर्वीक्ष
याणाभ्यगायसः दृष्ट्वानिलसुतं देवागच्छंतं वायुवेगतः ८ परीक्षणार्थं सत्वस्यवानरस्येदमब्रुवन् गच्छसेषमहासत्वोवा
नरोवायुविक्रमः ९ लंकांप्रवेष्टुंशक्तोवानवाजानीमहेवलं एवंविचार्यनागानांमातरं सुरसाभिधां १० अब्रवीहेव
ताहेदेवी त्वंहसमन्विता गच्छत्वंवानरेंद्रस्य किंचिद्विघ्नंसमाचर ११ ज्ञात्वातत्सवलंबुद्धिंपुनरेहिलघ्वन्विना इत्युक्तासा
ययौशीघ्रंहनुमद्विघ्नकारणात् १२ आवृत्यमार्गं पुरतःस्थित्वावानरमब्रवीत् एहिमवक्त्रंशीघ्रंप्रविशस्वमहामते १३
देवैस्त्वंकल्पितोभक्ष्यः क्षुधासंपीडितास्मिनः तामाहहनुमान्मातरहंरामस्यशासनात् १४ गच्छामिजानकींद्रष्टुं पुनरागम्य
सत्वरः रामायकुशलंतस्याः कथयित्वात्वदाननं १५ निवेक्षेदेहिमेमार्गं सुरसायैनमोस्तुते इत्युक्तापुनरेवाहसुरसाक्षुधिता
स्म्यहं १६

यत्वात् अंजोपिविचारेहत्तिः ९ लंकाप्रवेशेशक्तोथवानेतिसंदेहस्तस्मात्सवलंजानीमहेनिर्णेष्यामइत्यर्थः १० देवताहं
दः देवतासमहः ११ १२ १३ क्षुधयासंपीडितस्मात्माप्रस्मात्सस्मात्इत्यर्थः १४ १५ निवेक्ष्येप्रवेक्ष्यामि १६

अ० रा० सं०
॥ २ ॥

मेवरनं प्रविश्य तनोनिःसृत्य गच्छेत्पर्यः २७ योजनमात्रदीर्घदेहः १८ १९ त्रिंशद्योजनसंमितं वक्त्रं चकार तिशेषः २० २१ ॥२२॥ २३॥ पुनर्गोत्वानि

प्रविश्य गच्छमेव वक्त्रं नो चेत्त्वां भक्षयाम्यहं इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय १७ प्रविश्य वदनं ते ऽद्य गच्छामि त्वरयान्वितः इत्युक्त्वा यो
जनायामदेहो भूत्वा पुरः स्थितः १८ दृष्ट्वा हनुमतो रूपं सुरसा पंचयोजनं मुखं चकार हनुमान् द्विगुणं रूपमादधत् १९ ततश्चकार सुरसा
योजनानां च विंशति वक्त्रं चकार हनुमान् त्रिंशद्योजनसंमितं २० ततश्चकार सुरसा पंचाशद्योजनायतं वक्त्रं तदा हनूमांस्तु भूत्वां
गुष्ठसंनिभः २१ प्रविश्य वदनं तस्याः पुनरेव पुरः स्थितः प्रविष्टो निर्गतो ऽहं ते वदनं देवि ते नमः २२ एवं वदंतं दृष्ट्वा सा हनुमंतमथाब्रवी
त् गच्छ साधय रामस्य कार्यं बुद्धिमतां वर २३॥ देवैः संप्रेषिताहं ते बलं जिज्ञासुभिः कपे दृष्ट्वा सीतां पुनर्गत्वा रामं दृष्ट्वा प्रयाति गच्छभो २४
इत्युक्त्वा सा ययौ देवलोकं वायुसुतः पुनः जगाम वायुमार्गेणागारुत्मानिव पक्षिराट् २५ ॥ २५ ॥ ॥ २५ ॥

किष्किंधामितिशेषः २४॥ ॥२४॥ ॥२४॥ २४॥ ॥२४॥ ॥२५॥ ॥२५॥ ॥२५॥ २५॥ ॥२५॥ ॥२५

राम०
॥२॥

मणिकांचनपर्वतं मरणादि पुत्रशृंगयुतं पर्वतं २६ सचिवो भव मध्ये विश्रमदानेन सहायो भव समर्थः तन्नाहार्थनिमित्तं मंत्र रणे कोऽसि तु
सखाहसगरैः रितिपुराप्रवेसगरैर्वर्धितइति हितोर हंसागरस्तत्रामाभवं २७ तस्य वंशे चरामस्तत्कार्यार्थं चायं गच्छति २८ अतस्त्वमुत्ति

समुद्रोऽप्याहमैनाकं मणिकांचनपर्वतं गच्छ सेष महा[illegible] हतमान् मारुतात्मजः २६ रामस्य कार्यसिध्यर्थं तस्य त्वं सचिवो
भव सगरैर्वर्द्धितोयस्मात् पुराहंसागरोऽभवं २७ तस्यान्वये बभूवासौ रामो दाशरथिः प्रभुः तस्य कार्यार्थसिध्यर्थं गच्छ सेष महा
कपिः २८ त्वमुत्तिष्ठ जलात्तूर्णं त्वयि विश्रम्य गच्छतु स तथेति प्रादुरभूज्जलमध्यात्महोन्नतः २९ नानामणिमयैः शृंगैस्तस्योप
रिनराकृतिः प्राहयांतं हनुमंतं मैनाकोऽहं महाकपे ३० समुद्रेणा समादिष्टस्त्वद्विश्रामाय मारुते आगच्छामृतकल्पानि जग
ध्वा पक्वफलानि मे ३१ विश्रम्यात्र क्षणं पश्चाद्गमिष्यसि यथासुखं एवमुक्तोऽथ तं प्राह हनुमान्मारुतात्मजः ३२

थेत्सन्वयः २९ नानामणिमयैः शृंगैर्महोन्नतइत्सन्वयः तस्योपरि नराकृतिर्मनुष्याकारेणस्थितो मैनाकः प्राह ३० विश्रामो
थेत्यार्थ ३१ ३२

श्रः राः सुः
३

कथंमेवेदित्पादे रनुचिंतंतदिसथः तत्रहेतुर्गंतव्यंत्वरितेमर्यति ३३ करायेणास्पृष्टशिखरोयपाविस्मयपः छायास्पर्शमात्रेणाज्ञेन नां
गतिनिरोधेनाकर्षकछायाग्रहरसुच्यते ३४ तदेवाहिसिंहिकेतिमस्यंयतमक्षपतीसंर्थश्रार्षं ३५ ३६ विस्मयत्राश्चर्यंयत्कास्पाप्पद

गच्छतोरामकार्यार्थमक्षणांमेकथंभवेत विश्रामोवाकथंमेस्याद्गंतव्यंत्वरितंमया ३३ इत्युक्त्वास्पृष्टशिखरः करा
ग्रेणाग्रयेयोकपिः किंचिद्दूरंगतस्मास्यछायांच्छायाग्रहोग्रहीत ३४ सिंहिकानाममासाघोराजलमध्येस्थितासदा आका
शगामिनांछायामाक्रम्याकृष्यभक्षयेत ३५ तयागृहीतोहनुमान्चिंतयामासवीर्यवान् केनेदंमेकृतंचेगरोधनं
विघ्नकारिणा ३६ दृश्यंतेनैवकोप्यत्रविस्मयोमेप्रजायते एवंविचिंत्यहनुमानधोदृष्टिंप्रसारयत ३७ तत्रदृष्ट्वा
महाकायांसिंहिकांघोररूपिणीं ययातमलिलतृर्णयम्घामेवाहन्दुषा ३८ पुनरुत्लत्यहनुमान्दक्षिणाभिमुखो
ययौततोदक्षिणमासाद्यकूलनानाफलद्रुमं ३९

शनैवेगरोधश्चेत्पाश्चर्यंप्रसारत प्रासारयतश्चद्भावन्मार्षः ३७ सिंहिकातन्नामांराक्षसी ३८ दक्षिणंकूलंसागरस्येतिशेषः ३९

राम:
३

४० बहुभिः प्रकारैः अंतर्दुर्गमध्यदुर्गबहिर्दुर्गैर्मंबंधिभिः परिखाः प्राकारबहिर्गर्त्ताः ४१ वेक्ष्यामि प्रवेक्ष्यामि सूक्ष्मशरीरो भूत्वेत्यर्थः
लंकां जगाम रात्राविति शेषः ४२ सूक्ष्मवपुर्धृत्वा द्वारं प्रविवेश ४३ ४४ रात्रौ चोरवत्प्रविश्य गच्छसीति शेषः सर्त्तेकर इसेकः

नानायक्षिमृगाकीर्णं नानापुष्पलतावृतं ततो ददर्श नगरं त्रिकूटाचलमूर्द्धनि ४० प्राकारैर्बहुभिर्युक्तं परिखाभिश्च सर्वतः
प्रवेक्ष्यामि कथं लंकामिति चिंतापरोऽभवत् ४१ रात्रौ वेक्ष्यामि सूक्ष्मोऽहं लंकां रावणपालितां एवं विचिंत्य तत्रैव स्थित्वा
लंकां जगाम सः ४२ धृत्वा सूक्ष्मवपुर्द्वारं प्रविवेश प्रतापवान् तत्र लंकापुरी साक्षाद्राक्षसीवेषधारिणी ४३ प्रविशंतं ह
नूमंतं दृष्ट्वा लंकाभ्यभाषत कस्त्वं वानररूपेण मामनादृत्य लंकिनी ४४ प्रविश्य चोरवद्रात्रौ किं भवान्कर्तुमिच्छति इत्यु
क्त्वा रोषताम्राक्षी पादेनाभिजघान तं ४५ हनूमान्पतितां वाममुष्टिनावज्ञयाहनत् तदैव पतिता भूमौ रक्तमुद्वमती भृशं ४६
उत्थाय प्राह सा लंका हनूमंतं महाबलं हनूमन्गच्छ भद्रं ते जिता लंका त्वयानघ ४७ पुराहं ब्रह्मणा प्रोक्ता ह्यष्टाविंशतिपर्य
ये त्रेतायुगे दाशरथी रामो नारायणोऽव्ययः ४८ ४८ ४८ ४८ ४८ ४९

किं भवानिसादिप्रश्नांतरं ४५ ४६ ४० अष्टाविंशतिपर्यये इति यद्यपि अस्मन्मते चतुर्विंशतिमे पर्याये त्रेतायां रामावतारोऽष्टा
विंशतिपर्याये द्वापरांते कृष्णावतार इत्युक्तं तथापि कल्पांतरतया विरोधपरिहारो बोध्यः

योगमायाचसीतेतिजनिष्यतइत्यन्वयः क्वचित् अवतारपूर्वकाले प्रार्थितोजनिष्यतइत्यन्वयः ४९ ५० साचित्वंसख्यं ५१ ५२ ५३
पतस्त्वयाहंलंकाजितातस्मात्त्वपासर्वराक्षसकुलंजितं अथसीतास्थितिस्थानमाह रावणांतःपुरेति ५४ ५५ ५६ यतोमेराघव

गनिष्यतेयोगमायापिसीताजनकवेश्मनि भूभारहरणार्थायप्रार्थितोयंमयाक्वचित् ४९ समायोराघवोभ्रान्त्रागमिष्यतिम
हायशं तत्रसीतांमहामायांरावणोयहरिष्यति ५० पश्चाद्रामेणसाचित्वंसुग्रीवस्यभविष्यं सुग्रीवोजानकींद्रष्टुंवानरान्प्रेष
यिष्यति ५१ तत्रैकोवानरोरात्रावागमिष्यतितेंतिकं त्वयाचभर्त्सितःसोपित्वांहनिष्यतिमुष्टिना ५२ तेनाहतात्वंव्यथि
ताभविष्यतियदानघेत देवरावणस्यांतोभविष्यतिनसंशयः ५३ तस्मात्त्वयाजितालंकाजितंसर्वंत्वयानघे रावणांतःपुरेवरे
क्रीडाकाननमुत्तमे ५४ तन्मध्येशोकवनिकादिव्यपादपसंकुला अस्तितस्यांमहावृक्षःशिंशपानाममध्यगः ५५ तत्रास्ते ज
नानकीघोरराक्षसीभिःसुरक्षितादृष्ट्वैवगच्छत्वरितंराघवायनिवेदय ५६ धन्याहमद्यचिरायराघवस्मृतिर्ममासीन्द्भव
याशंभोचनी तद्भक्तसंगोप्यतिदुर्लभोमम भवप्रसीदतांदाशरथिःसदात्म
स्मृतिरासीद्धन्याहमपिधन्यातद्भक्तसंगस्यापिदुर्लभत्वंकिंवक्तव्यमितिभावः प्रसीदतांप्रसन्नःसन्त्रासतां ५७

पुस्फोरस्फुरितमभवत् भुतो वामरावल्लिपानामांगस्फुरणं शुभसूचकं पुंसो शुभदमितिभावः अत्रांग्रिपस्यदं ग्रिपाविषयस्सरामस्यदक्षां
गपुस्फोरः पद्मातमसंबंधि अतींद्रियगुणसंपदि इंद्रियेतस्यदक्षांगं दक्षिणभागः पुस्फोरनतस्फुरणं च स्त्रीणामसूचकं पुंसामिसाहः ५८ इति
श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्याहिम्मतिवर्म्मणः पुत्रस्यश्रीरामवर्मणः कृतावध्यात्मरामायणे से

उतुबंधिते ध्यौपचन्नात्मजेनधः रामसुतायामुद्रदृशानस्य पुस्फोटवामाक्षिभुजस्य नीवं रामस्यदक्षांगमतींद्रियस्य ५९
इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुंदरकांडे प्रथमः सर्गः १ ततो जगाम हनुमान् लंकां परमशोभनां रात्रौ स
क्ष्मतनुर्भूत्वा बभ्रामपरितः पुरीं २ सीतान्वेषणकार्यार्थी प्रविवेश नृपालयं तत्र सर्वप्रदेशेषु विविच्य हनुमान् कपिः २ अं
तःपुरं संशोध्य सयनागारमेव च कोशागारं ततो गत्वा हस्तिशालां कपीश्वरः ३ यस्य नगरमध्ये तु विचार्यं प्रययौ ततः कुं
भकर्णगृहं गत्वा सुप्तं दृष्ट्वा थनिर्भयः ४ गृहं गृहं प्रति गतो दृष्ट्वा च निर्गतः तत्र स्थिता पुरीभत्वा आगतश्च तं प्रति नाप श्य
ज्जानकी स्थित्वा तत्तो लंकाभिभाषितं जगाम हनुमान् शीघ्रमशोकवनिकां शुभां ३ सुरपादपसंबाधा रत्नसोपानवापि
का नानापक्षिमृगाकीर्णा स्वर्णप्रासादशोभिता ४ फलैरानम्रशाखाग्र्या पादपैः परिचारिता विचिन्वन् जानकीं तत्र प्रतिवृ

तो सुंदरकांडे प्रथमः सर्गः १ ततइति सूक्ष्मतनुः सूक्ष्मरूपवामरः १ सीतान्वेषणकार्यार्थी सीतान्वेषणरूपकार्ये इच्छावान् विविच्य दृष्ट्वा २
ततो लंकापाकं समुत्त्वा हनुमान् शीघ्रं जगाम ३ सुरपादपाः कल्पवृक्षादयः ४ फलैरानम्राणि शाखाग्राणि येषां तैः पादपैः ५

अ॰ रा॰ सु॰
५

अभ्रंलिहमत्युच्चं चैत्यप्रासादं देवतास्थानविशेषं असुचत्वान्मणिस्तंभादिघृतत्वाच्च विस्मयं ६ समतीयेति चैत्यप्रासादमिति शेषः ७ अ
संतनिविश्य तत्रादेवादं छन्नातपोपवनैर्नेत्र स्वर्णवर्णविहंगमैः पक्षिभिराकीर्णां व्याप्तमित्यर्थः मरकतं मरकादित्यासमासः ८ एक
वेणीहरणादिना बाधिसंस्काररहितामित्यर्थः यद्वा शोभार्थमसदा वेणीत्रयबंधः युगांतोद्द्ययमश्वादकेतिसं प्राप्तानुसंस्काररहितामात्र एकवेवि

ददर्शाभ्रंलिहं तत्र चैत्यप्रासादमुत्तमं दृष्ट्वा विस्मयमापन्नो मणिस्तंभशतान्वितं ६ समतीत्य पुनर्गत्वा किंचिद्दूरं स
याहतिः ददर्श शिंशुपावृक्षं संस्थितं निबिडच्छदं अदृष्ट्वा कुंभकर्णगृहं गत्वा मुसंदृष्ट्वाथ निर्भयः गृहेगृहमतिगतो द
ष्ट्वा दृष्ट्वा विनिर्गतः तत्र शिंशपां ताभ्यारोहं भूत्वाऽऽगतः स्वत्वं प्रति ७ अदृष्ट्वा तयमाकीर्णां स्वर्णविहंगमैः तन्मूले राक्षसी
मध्ये स्थितां जनकनंदिनी ८ ददर्श हनुमान्वीरो देवतामिव भूतले एकवेणीं कृशां दीनां मलिनांबरधारिणीं ९ भू
मौशयानां शोचंतीं रामरामेति भाषिणीं त्रातारं नाधिगच्छंतीमुपवासकृशां शुभां १० शाखांतरस्थमध्यस्थो ददर्श क
पिकुंजरः कृतार्थोऽहं कृतार्थोऽहं दृष्ट्वा जनकनंदिनी ११ मयैव साधितं कार्यं रामस्य परमात्मनः ततः किलकिलाशब्दो च

नीरुकैवेत्यर्थः दीनां स्वजनविरहादीनामिव ९ शोचंतीमात्मानं शोचंती १० शाखानामंते प्रांते ये छदाः पत्राणि तेषां मध्य
स्थः तेईदृशीं जानकीं दृष्ट्वा आनंदाभिनयः कृतार्थे इत्यादि ११ १२

राम॰
५

किं येतत् किं तन्मायं शंसः २३ अलीपतद्दर्शनेनेदं करिष्यमाणकार्यभंगं भियेत्तिमावः २४ ॥२५॥ इत्येवं चिंतयन्नावणो राघवे रोतिम्लो के
कं चिंतयन्तिं संसदात्तत्तरामभेवध्यायन्नास्ते इति शेष अतस्तस्मिन्दिने दयरात्रौ हनुमत्यवेशदिनरात्रिसंवेध्य परराते इत्यर्थः समासांताभावस्तु
इनित्यत्वात् २६ स्वप्ने निद्रासमये रामादिष्टः कश्चिद्वानरो लंकामागत्य तत्सामन्स्यानुपश्यति सीतामिति निश्चयेति शेषः २७ इति अद्भुतस्वप्नं दृष्ट्वा

किमेतदिति संलीनो ऽहमपत्रेषु मारुतिः आयांतं रावणां तत्र स्त्रीजनैः परिवारितं २३ दृष्ट्वा संविशति भुजंगीलां जनन्च योपमं दृष्ट्वा विस्मयमा
पन्नोयत्र खंडेष्वलीयत २४ रावणो राघवे राणस्य मरणे मे कथं भवेत् सीतार्थमपि नायाति रामः किं कारणं भवेत् २५ इत्येवं चिंतयन्निस्ये राम
मेव सदात्वैदि तस्मिन्दिने इपररात्रौ रावणो राक्षसाधिपः २६ स्वप्ने रामेण संदिष्टः कश्चिदागत्य वानरः कामरूपधरः सत्सोऽसामन्स्यानुप
श्यति २७ इति दृष्ट्वाद्भुतं स्वप्नं स्वात्मनैवानुचिंत्य सः स्वप्नः कदाचित्सत्यः स्यात्सेवं तत्र करोम्यहं २८ जानकीं वाक्कुशरैर्विध्वाः खिन्नां नितरा
॥महं करोमि दृष्ट्वा रामाय निवेदयतु वानरः २९॥

अयं स्वप्नः कदाचित्सत्यो भवेत् अतस्तत्र सीतासमीयं गत्वा सर्वं करोमीति अविसंधीति शेषः २८ ॥ यद्दचिंतयत्तत्सह जानकी क्षितिविश्चोतिल्स्य वाग्बेः
तां वाक्कुशरैर्विध्वा निःशंकं दुःखितां करोमि तद्दृष्ट्वा वानरो रामाय निवेदयतु श्रावेहि रामः शीघ्रमागच्छेदिति भाव ॥ २९॥ ॥२८॥ ॥२९॥

नूपुरारणिपादस्य पराणि किंकिणीजघनस्य पराणि निस्मिंजितशब्दं २० भीताभीतारूपांगनात्वात्मस्यैव स्वशरीरेण पत्नी पमाना स्थिते सन्दयः
रामे यदि जंस्यापि न मां तरं चिंतयमा २१ किमाहत दाहसुमध्ये मे इत्यादि २२ २३ लोकाः चारुरूपाः प्रयत्नेन समं ततो वीक्षमाणा अपि राम नयन
ति २४ त्वयि निस्पृहेणाइच्छाहीनेन एर्ताकाम त्वादि स्यांतरोर्धः त्वपासदालिंगितोपि ध्यानेन सदा त्वहृदि चिंतनात् अत एव समा य स्यापि पद्धा
शक्ति शक्तिमतोरभेदात् सदालिंगितो विभुत्वाच्च समीपस्थोपि यदपि २५ तथाप्यस्माकमस्पत्त्वहृदये त्वयि त्वद्विषयः स्नेहो न ज्ञापयते अत एव पत्नी

इत्येवं निंद्य पत्नी सीतां समीयमगमद्दुतं नूपुराणां किंकिणीनां झत्वा सिंजित मंजुना २० सीता भीता लीयमाना स्वात्मस्य वसु
पध्यमा अधोमुखस्यं क्रन्दपना स्थिता रामार्पितांतरा २१ रावणोपि तदा सीतां माला लोक्याह सुमध्यमे मां दृष्ट्वा किं वृथा सुभ्रूः लात्म
वविलीयसे २२ रामो वनचराणां हि मध्ये तिष्ठति सानुजः कदाचिद् दृश्यते केश्चित्त कदाचित्रैव दृश्यते २३ मया तु बहुधा लोकाः
प्रेषितास्तस्य दर्शने न पश्यंपति प्रयत्नेन वीक्षमाणाः समंततः २४ किं करिष्यसि रामेण निस्पृहेण सदा त्वयि त्वपास दालिं
गितो यि समीयस्थोपि सर्वदा २५ त्वद्दयेऽस्य न चंस्नेह स्त्वयि राम सदा ज्ञापयेत् त्वं त्वत्कृतान् सर्वभोगांश्च त्वद्गुणान पि राघवः २६ भुं
जानोपि न जानाति कृतघ्नो निर्गुणोधमः त्वमानीता यया साध्वी दुःखशोकसमाकुला २७ २७ २७

लेत्व दुये क्षात स्पेति भावः सर्वत्र समत्वात् न स्पन क्वापि स्नेहः हृदिस्थितं त्वं किं च सत्कृतीन्स्वर्वभोगान् त्वया स्व हृन्निद्धारोयनीजान्सर्वभोगान् सर्वविषु
यान् तथा त्वद्गुणान् सुखसंकल्प कामादीन् भुंजीनोपि अरूं भोक्तेति न जानाति तथाभिमान राहित्यात् अत एव कृतघ्नः अत एव च निर्गुणः योहि
गुणावान् सउपकारमनुतर एव अधमः उपरविस्मरणात् किंचन धमति शब्दविषयीभवतीसधमः शब्दावाच्य इति यावत् कृतघ्नत्वात् पुय

पतत्स्वपिभक्तिहीनोतः कथंव्रजेत्स्वस्थाननत्स्वसरित्राणाथमिमंदेशमिसर्थः निःसत्वोनिर्वलः निर्ममोममत्वाहीनः त्वयिइयंयमेतिवुद्धिहीनः २८ नरा
धमंधेचमर्थेवहद्मीहिरितिकश्चित्किंकरिष्यसिताहशेः नुरागेणकिंप्रयोजनमिसर्थः अमुरोत्तमसितिनराधमव्यतिरेकउक्तः २९ देवगंधर्वना
गानात्तघोषितामिसर्थः नियोक्त्रीप्रमुत्तयाज्ञाज्ञापयित्रीप्रतिघधमेत्रंगीकरोषि ३० निधायतरुणमंतरे पतिव्रतायाः सास्मासमयुहवेणाचाज्ञीला
यखानोचिरसादितिभावः ३१ भुनीचेसुपमयाज्ञसेनेयराक्रमराहिंसमचिते ३२ अचिरादितिछेदः अल्पेनैवकालेनेत्सर्थः पदाणमशरा

दद्यानीमयिनायातिभक्तिहीनःकथंव्रजेत निःसत्वोनिर्ममोमानीमूढः पंडितमानवान् २८ नराधमंत्वद्दिमुखंकिंकरिष्यसिभामिनित्वष्यमी
चसमामसक्तंमांभजत्स्वामुरोत्तमं २९ देवगंधर्वनागानांपक्षकिनरयोषितां भविष्यसिनियोक्त्रीत्वंपदिमांप्रतिपद्यसे ३० एवरणस्यवचः श्रुत्वा
सीताः मर्षसमन्विताउवाचाधोमुखीभूत्वानिधायतरुणमंतरे ३१ एवघातविभ्रतान्नंनमिसरूप्यधनंत्वयारहितेराघवाभ्यां त्वंमुनीवहविरध्वंर
३२ हतवानसिमांनीचतत्फलंप्राप्स्यसेविरात पदाराणमशराघातविदारितवपुर्भवान ३३ तामसेमानुषेरामेगमिष्यसियमांतिकं समुद्रंशो
षयित्वावाशरैर्वध्वाथवारिधिं ३४ हंतुंत्वांसमरेरामोलक्ष्मणेनसमन्वितः आगमिष्यसंदेहोदुःसहसेराक्षसाधम ३५ त्वांसपुत्रंसहवलंहत्वा
नेष्यतिमांपुरं श्रुत्वारक्षःपतिः क्रुद्धोजानकाः परुषाक्षरं ३६ वाक्यंक्रोधसमाविष्टः खड्गमुद्यम्यसत्वरः हंतुंजनकराजस्यतनयांताम्रलोचनः ३७ मं
दोदरीनिवार्याहपतिंपतिहितेरता सजेनामानुषीदीनांदुःखितांकृपणांकृशां ३८ देवगंधर्वनागानांवन्यः संतिवरांगनाः त्वामेवरयंसुधर्मदमत्तवि
लोचनाः श्रुत्वामंदोदरीवाक्यंरावणः शांतमानसः ३९ ततोत्रवीद्दशग्रीवोरा क्षसीर्विकृताननाः पथायमवशगासीताभविष्यतिसकामना तथापतध्वं

धा तैर्विदारितवपुर्भवान्भाविष्यतीतिशेषः ३३ तदारामेमानुषंत्वासमीयमांतिकंचगमिष्यसि शरैःसमुद्रंशोषयित्वावाअथवावारिधिंवध्वासेतुंवध्वेति
शेषः ३४ तदागमनंचत्वमनुपदमेवद्रक्ष्यसेइत्यन्वयः ३५ जानक्याः परुषाक्षरंवाक्यंश्रुत्वाक्रुद्धोभवत इतिशेषः ३६ ततः क्रोधसमाविष्टः खड्गमुद्यम्यजनकरा
जतनयांहंतुमुद्यतोभवदितिशेषः ३७ अस्मानुरक्तात्वात्तदित्योगात्त्वंदेत्यादिविशिष्टा ३८ याः त्वामेवचरयंतितावन्त्यः संतीतियोजना मंदेनकाममद्पुत्रेइवैवि
लोवनेयासांताः ३९ सकामनामद्विषयकामनासहितामतीयथामेवशगाभविष्यतितथात्वरात तथायतध्वमिसन्वयः तर्जनभीषणाभ्यांआद्दरणांमातं ४०

रा०मु०

४१ ४२ कुरुत यत्कार्यं कुरुतेत्यर्थः ४३ स्वतर्जनैः स्वबुद्धिकल्पितभाषणोपायैः स्वकीयैर्योग्यैर्वा इदं सांत्वं सामापूर्वमुपलक्षणं तैस्तर्जनैः कर्तितं ४४ भीषणाः प्राह अपरा चेति किंचिल्लंबून अस्याः वधे इति शेषः जानकीं इदानीमेव छेदितां ४५ ४६ ४७ महाप्रभे पृथक्पृथक् विभज्याय अस्मान् इति शेषः ४५ ४६ ४७ महाप्राणा चेयत सुतं सत् तवाहितमेवेत ४८ वाक्यमाहेत्यादि इदानीमेवमम याराम सम्प्रदर्शनः सन्नयः ४९ कथं दृष्टवदाह आगतेत्याह आरुह्य चेति समागतः सं

दिमासा संप्रतीता सीता यदि मम वशगा भवेत् तदा सर्वसुखोपेता राज्यं भोक्ष्यति मामया ४१ यदि मामसह्याद् ध्वंसं महत् तयानाभिमन्यते तदामिम प्रातराशाय हत्वा कुरुत मानुषीं ४२ एवमुक्त्वाथ ययौ स्त्रीभी रावणोऽन्तःपुरालयं राक्षस्यो जानकीं अभिभीषयंत्यस्तर्जनैः ४३ तीक्ष्णां जानकीमाह यौवनं ते ह्ययोग्यते रावणेन समं भोगसमेफलं तु भविष्यति ४४ अपरा चाह कोपेन किंचिल्लंबेन जानकीं इदानीं छेदयतां अंगं विभज्य च पृथक्पृथक् ४५ अन्यास्तु खड्गमुद्यम्य जानकीं हंतुमुद्यता अन्या करालवदना विद्राव्यास्यमभीषयत् ४६ एवं तां भीषयंतीः ताः राक्षसीर्विकृताननाः निवार्य त्रिजटा वृद्धा राक्षसी वाक्यमब्रवीत् ४७ शृणुध्वं दुष्टराक्षस्यो महाकामं वा हितं भवेत् ४८ न भीषयंत ईदृशेन नमस्कुरुत जानकीं इदानीमेव मे स्वप्ने रामः कमललोचनः ४९ आरुह्यैरावतं शुभ्रं लक्ष्मणेन समागतः दग्ध्वा लंकापुरीं सर्वां रावणमाहवे ५० आरोप्य जानकीं स्वांके स्थिता दृष्टोगमूर्धनि रावणो गोमये कुंडे तैलाभ्यक्तो दिगंबरः ५१ अगाहत् पुत्रपौत्रैश्च कृत्वा वदनमालिकां विभीषणस्तु रामस्य सन्निधौ हृष्टमानसः ५२ सेवां करोति रामस्य पादयोर्भक्तिसंयुतः सर्वथा रावणं रामो हत्वा सकुलमंजसा ५३ विभीषणायाधिपत्यं दत्वा सीतां शुभाननां अंके निधाय स्वपुरीं गमिष्यति न संशयः ५४ त्रिजटायाः वचः श्रुत्वा भीतास्ताः राक्षसस्त्रियः तूष्णीमासं

युक्तः ५० स्वांके जानकीमारोप्य अगस्य पर्वतस्य मूर्धनि ऊर्ध्वभागे स्थितो दृष्ट एवं राम विजयं ॥ तत्र तत्र निद्रावशमुपागताः ५५ ५५ ॥ः शुभस्वप्नमुक्त्वा रावणविषयमनिष्टस्वप्नमाह रावण इति ५१ वदनमालिकां स्वमुखमालां स्वहस्ते कृत्वा ऽगाहत् इत्यर्थः नन्वेवं किं लंकोऽराक्षसैव भविष्यती त्याशंकनेत्याह विभीषण इति रामस्य सेवां करोति एवंविधः स्वप्नो दृष्टः ततः सोत्रासं कंटेत्याह सर्वथेत्यादि ५२ ५३ ५४ ५५ ५५ रामः ०

त्रातारमप्राप्नुवतीदुःखेनमहतामूर्छितामूर्छिते बाष्पपूर्णनेत्राचिंतयंतीदमात्मनामहाब्रवीत् ५६ ५७ मृतीकृतनिश्चयामरणस्यकंचिदुपायंकमप्युपाय
मजानतीशाखामालंब्यचिरयामिष्टदितिशेषः ५८ इतिश्रीमत्सकलराजविमदुद्दूररागेषम थैत्यादिविरुदावलीविराजमानस्यहिम्मतिवर्मणः पु
त्रस्यश्रीरामवर्मणः कृतावध्यात्मरामायणसेतौसुंदरकांडेद्वितीयः सर्गः २ ततस्तद्रूपापंतिश्चिसाहीहृद्ध्वनेनेवेति १ उद्बंधनसाधनमाह दीर्घावेणी
त्र्ययानंतरंएवंमरणायनिश्चितबुद्धिंजानकींविलोक्यमन्वयः किंचिद्विचार्य २ किंचिद्विचार्यप्रियवचनावसरइतिनिश्चित्य स्वरूपः मन

तर्जिताराक्षसीभिः सासीतामीतातिविह्वला त्रातारंनाधिगच्छंतीदुःखेनपरिमूर्छिता ५६ अश्रुभिः पूर्णनयनाचिंतयंतीदमब्रवीत्
प्रभातेभक्षयिष्यंतिराक्षस्योमांनसंशयः ५७ इदानीमेवमरणंकेनोपायेनमेभवेत् एवंसुदुःखेनपरिश्रुतासाविमुक्तकंठरुदतीचिराय
आलंब्यशाखांकृतनिश्चयामृतौनजानतीकिंचिदुपायमंगना ५८ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेद्वितीयः
सर्गः २ उद्बंधनेनवामाशुत्यजाम्यद्यशरीरंराघवंविना जीवितेनफलंकिंस्यान्ममरक्षोधिमध्यतः १ दीर्घावेणीममात्यर्थमुद्बंधायभविष्यति एवं
निश्चितबुद्धिंतांमरणायाथजानकीं २ विलोक्यहनुमान्किंचिद्विचार्यैतदभाषतशनैःशनैः तरुस्थःसोजानक्याःश्रोत्रगंवचः ३ इक्ष्वाकुवंशसंभू
तोराजादशरथोमहान् अयोध्याधिपतिस्तस्यचत्वारोलोकविश्रुताः ४ पुत्रादेवसमाः सर्वेलक्षणोपलक्षिताः रामश्चलक्ष्मणश्चैवभरतश्चैवश
त्रुघ्नः ५ ज्येष्ठोरामः पितुर्वाक्याद्दंडकारण्यमागतः लक्ष्मणेनसहभ्रात्रासीतयाभार्ययासह ६ उवासगौतमीतीरेपंचवट्यांमहामनाः तत्रनीता
महाभागासीताजनकनंदिनी ७ रहितेरामचंद्रेणरावणेनदुरात्मना ततोरामोतिदुःखार्तोमार्गमाणोथजानकीं ८ जटायुषंपक्षिराजंदृष्ट्वाप
तितंभुवि तस्मैदत्वादिवंप्राप्तः ऋष्यमूकमुपागमत् ९ सुग्रीवेणकृतामैत्रीरामस्यविदितात्मनः तद्भार्याहारिणंहत्वावालिनंरघुनंदनः १० ११
जानक्यास्तस्याएवश्रोत्रगंयथाभवतितथाशनैःशनैरभाषतेत्यन्वयः ३ तदेवस्पष्टमाहइक्ष्वाक्वित्यादिना ४ लक्षणैः सामुद्रिकोक्तैः शत्रुहा शत्रुघ्नास्य स
थैः ५ ६ रावणेननीतेत्यन्वयः ७ मार्गमाणः अन्वेषयन् ८ दिवंस्वर्लोकंतत्सोकाख्यासमितिपावत् ९ पमस्यसकल्पपात्रात्मस्वसाधकमिनवानरमैत्रीप्र
पोऽयनमिपीडनंतस्यपरिहारायसुग्रीवेणकृतेत्युक्तं तत्तुरमिणकृतेतत्तितस्तद्भार्याहारिणंसुग्रीवभार्याहारिणं १० १० १०

श्रीरा॰ सु॰
८

मित्रकार्यं सुग्रीवस्य कृतमिति सकार्यं समानीय नानावानरान् दिक्षु प्रेषयामास तेषु ये दक्षिणां दिशं गताः ११ तान् वानरान् सीतायाः परिमार्गणे तत्रितं परितः प्रेषयामास तेन्वयः १२ समुद्रमुल्लंघ्य लंकानगरीं दृष्ट्वा तत्र जानकीं विचित्य नत्वा चैषु पथ तत् शनैः क्रमेण शोकवनिकां स्थितां ताविविचिन्वन् शिंशपायां तहं दृष्ट्वा नम्रत्र शिंशपायामहं जानकीमद्राक्षं मतोत्रागतोहं इति तत्क्रमः सह रामं इति शेषः १३ १४ १५ वायुतनयस्य कथामाकर्ण्य तेन कथि

राजेयमपि च सुग्रीवं मित्रकार्यं चकार सः सुग्रीवस्तु समानीय नानावानरान् वानरप्रभुः ११ प्रेषयामास परितो वानरान् मार्गणे सीतायाः
तत्र चैकोहं सुग्रीववचसा प्रेषितो हरिः १२ संपातिवचनाच्छीघ्रमुल्लंघ्य शतयोजनं समुद्रं नगरीं लंकां विचिन्वन् जानकीं शुभां १३ शनैः शोकवनि
कायां विचिन्वन् शिंशपातरौ अद्राक्षं जानकीमत्र शोचन्तीं दुःखसंप्लुतां १४ रामस्य महिषीं देवीं क्रमप्राप्तोहमागतः इत्युक्त्वोपरराम स
मारुतिर्बुद्धिमत्तरः १५ सीता क्रमेण तत्सर्वं श्रुत्वा विस्मयमाययौ किमिदं मे श्रुतं व्योम्नि वायुना समुदीरितं १६ स्वप्नो वा मे मनोभ्रान्तिर्यदि वा
सत्यमेव तत् निद्रा मे नास्ति दुःखेन जानाम्येतत् कुतो भ्रमः १७ येन मे कर्णपीयूषं वचनं समुदीरितं स दृश्यतां महाभागः प्रियवादी ममाग्रतः १८
श्रुत्वा तज्जानकीवाक्यं हनुमान् पत्रखंडतः अवतीर्य शनैः सीतापुरतः समवस्थितः १९ कलविंकप्रमाणाङ्गो रक्तास्यः पीतवानरः ननाम शनकैः
सीतां प्राञ्जलिः पुरतः स्थितः २० दृष्ट्वा तं जानकी भीता रावणोयमुपागतः मां मोहयितुमायातो मायया वानराकृतिः २१ इत्येवं चिंतयित्वा सा तू
ष्णीमासीदधोमुखी पुनरप्याह तां सीतां देवि यत्त्वं विशंकसे २२ ॥२२ ॥२२ ॥२२ ॥२२ ॥२२ ॥२२ ॥२२

तत्संभावना १६ स्वप्नोवेत्यादि विकल्पत्रयं स्वप्नः स्वप्नमात्रे तिरिक्तं किंचित्कल्पकं प्रमाजनकं वाक्यमित्यर्थः तत्र दुःखेन तु न निद्राभावात् स्वप्नसंभवः भ्रमो
पि नेत्याह ज्ञातमेतत् एतत्सदर्थे ज्ञातं यथास्थितवस्तुरूपेण जानामि भ्रान्तो न भ्रमसंभवः यही भ्रान्तः स्वज्ञाने भ्रमत्वं न विकल्पयति मम च तत्त्वाविक
ल्पितो न भ्रम इति भावः १७ तस्मात्सत्यमेव निश्चित्याह येनेत्यादि सम्यक् स्पष्टं प्रियवादी ममाग्रतो दर्शयत्वात्मानं दर्शयत्वित्यर्थः १८ पत्रखंडतः पत्रस
मूहतः १९ भाषया चिमनाचियनो कलविंकः चटकः चटकाः कलविंकस्तासु स्त्री चटका तयोः सुभयसे ॥ चटकेरस्मयमे चटकैवहि ॥ रक्तास्यः
पीतवर्णो वानरं यातवानरः २० २१ २२

राम॰
८

शंकां रावणात्त्वच्छंकां यस्मात्स्मन इति तत्स्वरूपाभिज्ञत्वेन तच्छंसत्वमतात्प्रस्मायनाम २३ २४ २५ यथा त्वं दासोहमिति भाषसे तथा वानरमनुष्ययोः
संगतिः प्रतीयते सात्र कथं घटतेत्यर्थः २६ शर्वर्येति भगवता त्वद्दर्शने तेशा वेहा प्रतिपृष्टवेत्ति तया सुग्रीव समीपं गच्छेत सीतामार्गणोकरिष्यतीति
योक्तरसार्थः २७ भीतो वालिप्रेरितत्वशंकया २८ तौ रामलक्ष्मणौ सख्यं च अकरव कारितवानित्यर्थः अंतर्भावितणार्थः २९ तेवालिनं जघान

नाहं तथाविधो मातस्त्यज शंकां मयि स्थितां दासोहं कोसलेंद्रस्य रामस्य परमात्मनः २३ सचिवोहं हरींद्रस्य सुग्रीवस्य शुभप्रदे वायोः पुत्रो
हमखिलप्राणभूतस्य शोभने २४ तच्छ्रुत्वा जानकी प्राह हनुमंतं कृतांजलिं वानराणां मनुष्याणां संगतिर्घटते कथं २५ यथा त्वं रामचंद्रस्य
दासोहमिति भाषसे तामाह मारुतिः प्रीतो जानकीं पुरतः स्थितः २६ ऋष्यमूकमगाद्रामः शबर्या नोदितः सुधीः सुग्रीवो ऋष्यमूकस्थो दृष्ट
वान्राघवलक्ष्मणौ २७ भीतो मां प्रेषयामास ज्ञातुं रामस्य हृद्गतं ब्रह्मचारिवपुर्धृत्वा गतोहं राममंतिकं २८ ज्ञात्वा रामस्य सद्भावं स्कंधोपरि नि
धाय तौ नीत्वा सुग्रीवसामीप्यं सख्यं चाकरवं तयोः २९ सुग्रीवस्य हृता भार्या वालिना तं रघूत्तमः जघानैकेन बाणेन ततो राज्येभ्यषेचयत् ३० सु
ग्रीवं वानराणां स प्रेषयामास वानरान् ३१ दिक्षु सर्वासु महाबलान्वीरान्भवत्याः परिमार्गणे गच्छंतं राघवो दृष्ट्वा मामभाषत सादरं ३२ त्वयि का
र्यमशेषं मे स्थितं मारुतनंदन ब्रूहि मे कुशलं सर्वं सीतायै लक्ष्मणस्य च ३३ अंगुलीयकमेतच्च परिज्ञानार्थमुत्तमं सीतायै दीयतां साधु मन्नामा
क्षरमुद्रिके ३४ इत्युक्त्वा प्रददौ मह्यं कराग्रादंगुलीयकं प्रयत्नेन मयानीतं देवि पश्यांगुलीयकं ३५ इत्युक्त्वा प्रददौ देव्यै मुद्रिकां मारुता
त्मजः नमस्कृत्य स्थितो दूराद्बद्धांजलिपुटो हरिः दृष्ट्वा सीता प्रमुदिता राममुद्रांकितां तदा मुद्रिकां शिरसा धृत्वा बाष्पवदाननेत्रजा ३६ ३६

वानराणां राज्येभ्यषेचयत् सुग्रीवमिसन्वयः ३० स सुग्रीवो भवत्याः परिमार्गणात्त्रिभिर्वानरान्प्रेषयामास ३१ ३२ अशेषं कार्यं त्वयि स्थितं त्वमेव सकल
कार्यसाधनसमर्थ इत्यर्थः मम ३३ यदेतदंगुलीयकं सीतायै परिज्ञानार्थं [illegible] यमिति निश्चित्य पार्थे दीयतां मन्नामाक्षरमुद्रयांकितं ३४ नमस्कृत्वा
मुद्रिकां दत्वा पुनर्नमस्कृत्वा च दूरात्स्थितः अनेन तदा न वेला या काचित्तस्मीयमुपस्थमर्त्य ज्ञायते ३५ मुद्रिकां दृष्ट्वा प्रमुदिता जाता ततः शिरसा धृत्वा
बाष्पवदाननेत्रजा जात इति आनंदनेत्रजातास्रुपूर्णा इत्यर्थः ३६ ३६ ३६ ३६

कथं मुद्रिकारक्षणाद्बुद्धिमांस्त्वं मे प्राणदाता सि राघवे भक्तो सि तस्य प्रियकारी चासि अतो राघवस्य त्वं वे वविश्वासो स्तीति मम मे ३७ विश्वासमन्तरा मुक्तासाधयति नो चेदिति नो चेत्तत्त्वयि विश्वासश्चोत्रस्यात्तदा ममविश्वस्तं युरुषरूपेत्वां कथं मत्सन्निधिं प्रेषयेत् ३८ ३९ यथा मे मयि राघवस्य दया तथा स्त्वेतत्तथा स वेगास्योरु ततर्जनादिकथये सर्थः मासद्वयेति अग्रे मरणमेव लक्ष्यत्वेन तथा प्रतिज्ञातत्वादिति भावः ४० तदेवाह नागमिष्यतीति ४१ वानरानीकपैः सार्धमत्रा गत्य रावणमुक्तविशेषणं हत्वा पदिमां प्रभुर्मोचयेत तत्कृत बंधनादिति शेषः ४२ तत्सदृ वीरैर्वर्णीय आलसो स्त्ववर्णितं तत्सवीर्यं सदृशं भवेत् यथा वर्णितं

कथं मे प्राणदाता त्वं बुद्धिमानसि राघवे भक्तोसि प्रियकारी त्वं विश्वासो स्ति तवैव हि ३७ नो चेन्मत्सन्निधिं चामं पुरुषं प्रेषयेत्कथं हनुमन्‌दृष्टा मखिलं मम दुःखादिकं त्वया ३९ सर्वं कथय रामाय यथा मे जायते दया मासद्वयावधि प्राणाः स्थास्यन्ति मम सत्तम ४० नागमिष्यति चेद्रामो भक्षयिष्यति मां खलः अतः शीघ्रं कपींद्रेण सुग्रीवेण समन्वितः ४१ वानरानीकपैः सार्द्धं हत्वा रावणमाहवे सपुत्रं सबलं रामो यदि मां मोचयेत्प्रभुः ४२ तत्तस्य सदृशं वीर्यं वीरवर्णय यथा तथा यथा मां तारयेद्रामो हत्वा शीघ्रं दशाननं ४३ तथा यतस्व हनुमन्वाचा धर्ममवाप्नुहि हनुमानपि तामाह देवि दृष्टो यथा मया ४४ रामः सलक्ष्मणः शीघ्रमागमिष्यति सायुधः सुग्रीवेण ससैन्येन हत्वा दशमुखं बलात् ४५ समानेष्यति देवि त्वामयोध्यां नात्र संशयः तमाह जानकी रामः कथं वारिधिमाततं ४६ तीर्त्वायास्यत्यमेयात्मा वानरानीकपैः सह हनूमा नाह मे स्कन्धावारुह्य पुरुषर्षभौ ४७ आयास्यतः ससैन्यश्च सुग्रीवो वानरेश्वरः विहायसा क्षणेनैव तीर्त्वा वारिधिमाततं ४८ निर्दहिष्यति रक्षौघान्त्वत्कृते नात्र संशयः अनुज्ञां देहि मे देवि गच्छामि त्वरयान्वितः ४९

भवेत् अन्यथा विपरीतमेवेत्यर्थः ४३ अतस्तथेति वाचा वचनकृतरामप्रेरणया धर्मं वंदीमोक्षजं यथा हृष्टो यथा स्योद्दृष्टस्तथा जाने शीघ्रमागमिष्यतीत्यादि ४४ ४५ तं हनुमन्तं जानक्याह किमाह राम इत्यादि ४६ हनुमानुत्तरयति मे स्कंधावित्यादि ४७ आततं विस्तीर्णं ४८ ४९

भ्रात्रा सह रामं द्रष्टुं गच्छामि गत्वा च तवांतिकमागंतुं त्वरयामि पथा मां विश्वसेत् ज्ञानकीं संबंध्यादरस्त्वानितितथा किंचिदभिज्ञानं देहि ५० ततोऽहं समुत्सुकः राम दर्शनोत्सुकः प्रयत्नेन तत्वदत्ताभिज्ञानं रक्षयन् गंता राघवसमीपमिति शेषः किंचिद्विचार्य तद्वचसो युक्तत्वं विचार्य ५१ ५२ ५३ ऐंद्रः इंद्रलोकस्थः काक रूपधरः इंद्रपुत्रस्तस्य र्थः आमिषं मांसं ५४ एतत्त्वत्सादांगुष्ठविदारणरूपं ५५ मां पुनः पुनरभिद्रवंतमिसवयः रक्षमासंनस्तत्तु उद्दिष्यते ५६ ५७ त्वत

द्रष्टुं रामं सह भ्रात्रा त्वरयामि त्वं वांतिकं देवि किंचिदभिज्ञानं देहि मे येन राघवः ५० विश्वसेन्मां प्रयत्नेन ततो गंता समुत्सुकः ततः किंचिद्विचार्याथ सीता कमललोचना ५१ विमुच्य केशपाशांते स्थितं कनकमणिं ददौ अनेन विश्वसेद्रामस्त्वां कपीद्र सलक्ष्मणः अभि ज्ञानार्थमन्यच्च वदामि तव सुव्रत ५२ चित्रकूटगिरौ पूर्वमेकदा रहसि स्थितः मदंके शिर आधाय निद्राति रघुनंदनः ५३ ऐंद्रः काक स्तदागत्य नखैस्तुंडेन चासकृत् मत्पादांगुष्ठमारक्तं विददारामिषेच्छया ५४ ततो रामः प्रबुध्याथ दृष्ट्वा पादं कृतव्रणं केन भद्रे कृतं चैतद्विप्रि यं मे दुरात्मना ५५ इत्युक्त्वा पुरतोऽपश्यद्वायसं मां पुनः पुनः अभिद्रवंतं रक्तास्यं नखैस्तुंडे च कोपन ५६ तृणमेकमुपादाय दिव्यास्त्रेणाभि योज्य तत् चिक्षेप लीलया रामो वायसोपरि तज्ज्वलत् ५७ अभ्यद्रवद्वायसं भीतो लोकान्भ्रमन्पुनः इंद्रब्रह्मादिभिस्त्यायिन शक्तो रक्षि तुं तदा ५८ रामस्य पादयोरग्रे पतद्भीत्या दयानिधेः शरणागतमालोक्य राम स्तमिदमब्रवीत् ५९ अमोघमेतदस्त्रं मे दत्वैकाक्षिमितो व्रज स त्यं दत्वा ततः काकः स्वं पोरुषवानयि ६० उपेक्षसे किमर्थं मामिदानीमपि राघवः हनूमानपि तामाह श्रुत्वा सीतानुभाषितं ६१ देवि त्वां यु दि जानाति स्थितामत्र रघूत्तमः करिष्यति क्षणाद्भस्म लंकां राक्षसमंडितां ६२ जानकी प्राह तं वत्स कथं त्वं योत्स्यसे प्लवैः अतिसूक्ष्मवपुः सर्वे वानराश्च भवादृशाः ६३ श्रुत्वा तद्वचनं देव्यै पूर्वरूपमदर्शयत् मेरुमंदरसंकाशं रक्षोगणविभीषणं ६४ दृष्ट्वा सीता हनूमंतं महापर्वतसन्निभं

तत् अभिमंत्रितं तृणं वायसमभ्यद्रवत् सयवासोभीतः लोकान्द्रंद्राद्यालोकांतान् भ्रमन् तत्र तैरपि परारक्षितुं शक्तो नाभवत् तदा ५८ रामपादस्यैव अपतत् ५९ ततः काको गतः इति शेषः स्वं यो रुषवानपि सराघवः इदानीमपि एवमवस्थां मामपि पदं उपक्षिप्तेत किमर्थं ६० ६१ जानाति चर्तमानसामाप्यं लइलाख्यातास्ततः ६२ यथा तेऽसूक्ष्मवपुस्तथा सर्वपि वानराः भवादृशाः भवद्देव सूक्ष्मवपुषः इति महाबलयुग्मिः राक्षसैर्युद्धं संसमेवी सेर्थः ६३ श्रुत्वा तद्वचनं सीतापार्थ इति शेषः देव्यै

श्री ७३

रामा ७३

तां राक्षसस्त्रीः रक्षंति दृष्ट्वा वराः वशोकव्यथिष्यंति एवं मति कीं चरेत् किं भाकं स्याशापः अतोऽप्यांति कुरुतं गच्छेतेयं याः स्मुमोरुक्त इति शेषः ६६ कपिर्जगतकीमाहा हं बुभुक्षितोस्मि अनस्तव दर्शनान्मम पारणा मुचितमिति शेषः नचहं रिक्तो केनत्वां पारयामीति शंकायामाह तव दर्शनादस्थितेः फलैर्मे पारणा भविष्यतीत्यर्थः ६७ ततस्तयाप्रस्थापितो जानकीं प्रणिय स्यागच्छत् अनुचिंतयत अचिंतयत अउभावआर्षः ६८ अस्माकिंचित् स्वाम्या समादिष्टक मुत्तमं कर्मेत्यर्थः ६९ अस्माकिंचित् वीरकर्म रावणं दृष्ट्वा संभाष्य चेत्स चयः ७० इत्थं रामस्य समग्रहान् उत्साहनि शेषामकरोत् ७१ सीताश्रपनशिशपारूप अशोकवृक्षमिति

४ सीतामाश्रयतं गंसस्त्वावनं अमं संचकारसः उत्पारपतं विपिनं दृष्ट्वारा क्षसयोषितः ७२ अपृच्छ जानकी कोसौ वानराकृतिरुत्कटः ७३ जा नकुवाच भवस्या वजानं तिमायोरा क्षसनिर्मिता नाहं मेनं विजानामि दुःखशोकसमाकुला ७४ इत्युक्तास्त्वरितं गत्वा राक्षस्यो भयपीडिताः हनुमता कृतं सर्वं रावणाय न्यवेदयन् ७५ देवकश्चिन्महासत्वो वानराकृतिदेहभृत् सीतया सह संभाष्य त्वशोकवनिका सहसागत् उत्पाद्य चैत्यप्रासादं ववंजाभ्रितविक्रमः ७६ प्रासादरक्षिणः सर्वान् हत्वा तत्रैव तस्थिवान् तच्छ्रुत्वा तत्र रामुत्थाय वनभंगं महाप्रियं ७७ किंकराणप्रे षयामास नमुतं रा क्षसाधिपः निर्भयं चैत्यप्रासादप्रथमांतर संस्थितः ७८ हनूमानथ वेगाकारो लोहस्तंभकृतायुधः किंचिल्लांगूलचलनो रक्तास्यो भीषणाकृतिः ७९ ४ समर्थोसि महासत्व रक्षंति त्वां महाबल [illegible] त्वं सुखं पंथा गच्छरामांतिकं द्रुतं ६६ बुभुक्षितः कपिः प्राह दर्शनात्सारंगं मम भविष्यति फलैः सर्वैस्तथ रक्षस्थिते हि मे ६७ तथेत्युक्तः स जानक्या भक्षयित्वा फलं कपिः ततः प्रस्थापितो गच्छत् जानकी प्रणिपत्य सः किंचित् मथो गत्वासौ तां मेवानुचिंतयत् ६८ कार्यार्थमागतो हत्तः स्वामिकार्याविरोधतः अन्यत् किंचित् संपाद्य गच्छेत्स क्षमरक्षकः ६९ अतोऽहं किंचिदस्य चक्षुदृष्ट्वा यरावणं संभाष्य चततो राम दर्शनार्थं व्रजाम्यहं ७० इति निश्चित्य मनसा वृक्षषंडान् महाबलः उत्पाद्याशोकवनिकां निर्वृक्षामक

शोषः विपिनं वतरक्षाग ७२ ७३ दुःखशोकाभ्यां पुक्ता हमेनं नजानामि ७४ वानराकृति देहभृतयानरे हे हरस्यर्थः वानरेरेव वंपराक्रमस्येमवांदे वमुक्तिः अशो कवनिकां सराणा इत्याद्येनेरेवं चैत्यसमाप्राप्तादृश्यभंजत् ७६ तस्थिवान् स्थितः महाप्रियं महद्यतदप्रियं चेत्सर्थः ७७ मिपुतं रक्षःकोटर्फ निर्भयो पच्चैत्यप्रासादस्तस्यप्रथमं यदंतरं प्रथमाया भूमिस्तत्र संस्थितः ७८ लोहस्तंभएव कृतमायुधं येनसः किंचिल्लिंगूलचलन इति स्वभावोक्तिः ७९ ७९

नैकिकरानामराक्षसाः ८० भीषणाकृतिं हनूमंतं दृष्ट्वेत्यन्वयः ८१ मुहुरोन्नलोहस्तंभः ८२ ८३ सरावणः ८४ राक्षसान् रावणप्रेषणीयान् ८६
आकाशे प्रथममुत्पपात ततो गगनादवतरन् मध्येमुहुरेणातोऽयत ८७ ८८ ८९ इंद्रजित्प्रतिपत्तेनं हनुं गच्छेति मंपंतेरेणाह पुत्रेति हत्वेत्युक्तो हननाशक्तत्वे

आयांतं तं महासंघं राक्षसानां ददर्श सः चकार सिंहनादं च कृत्वा तेषु मुहुर्भृशं ८० हनूमंतमथो दृष्ट्वा राक्षसा भीषणाकृतिं निर्जघ्नुर्विविधा
स्त्रौघैः सर्वराक्षसघातिनं ८१ ततस्तूत्थाय हनुमान् मुहुरेणासमंततः निष्पिपेष स्फाणाद् देवमशकानिव पक्षयः ८२ निहतान् किंकरान् श्रु
त्वा रावणः क्रोधमूर्छितः पंच सेनाग्रतीस्तत्र प्रेषयामास दुर्मदान् ८३ हनूमानपि तान् सर्वान् लोहस्तंभेन चाहनत् ततः क्रुद्धो मंत्रिसुतान् प्रे
षयामास सप्त सः ८४ आगतानपि तान् सर्वान् पूर्ववद् दानवेश्वरः क्षणानिःशेषतो हत्वा लोहस्तंभेन मारुतिः ८५ पूर्वस्थानमुपाश्रित्य प्रतीक्ष
न् राक्षसान् स्थितः ततो जगाम बलवान् कुमारो ऽक्षः प्रतापवान् ८६ तमुत्पपात हनुमान् दृष्ट्वाऽकाशे समुद्गरः ८७ गगनात्त्वरितो मूर्ध्निमुद्
रेणाभ्यताडयत् हत्वा तमक्षं निःशेषबलं सर्वं चकार सः ८८ ततः श्रुत्वा कुमारस्य वधं राक्षसपुंगवः क्रोधेन महताविष्टः इंद्रजितमथाब्रवीत् ८९
पुत्र गच्छाम्यहं तत्र यत्रास्ते पुत्रहा रिपुः हत्वा तमथवा बध्वा आनयिष्यामि ते ऽंतिके ९० इंद्रजित् पितरं प्राह त्यज शोकं महामते मयि स्थिते किमर्थं
त्वं भाषसे दुःखितं वचः ९१ बध्वानेष्ये द्रुतं तात वानरं ब्रह्मपाशतः इत्युक्त्वा रथमारुह्य राक्षसैर्बहुभिर्वृतः ९२ जगाम वायुपुत्रस्य समीपं वीरविक्र
मः ततोऽतिगर्जितं श्रुत्वा स्तंभमुद्यम्य वीर्यवान् ९३ उत्पपात नभोदेशं गरुत्मानिव मारुतिः ततो भ्रमंतं नभसि हनूमंतं शिलीमुखैः ९४ विध्वा तस्य शि
रोभागं इषुभिश्चाष्टभिः पुनः हृदयं पादयुगलं षड्भिरेकेन वालधिं ९५ भेदयित्वा ततो घोरं सिंहनादमथाकरोत् ततोऽतिहर्षाद् हनुमान् स्तंभमुद्यम्य वी
र्यवान् ९६ जघान सारथिं साश्वं रथं चाचूर्णयत् क्षणात् ततोऽन्यं रथमादाय मेघनादो महाबलः ९७ शीघ्रं ब्रह्मास्त्रमादाय बध्वा वानरपुंगवं
निनाय निकटं राज्ञो रावणस्य महाबलः

विचार्याहवृत्वा चेति ९० दुःखितं वचः आत्मनः कर्तुरभावेनैवेतिभावः ९१ ब्रह्मपाशतः ब्रह्मास्त्रमभिमंत्र्येति
याशेषितस्पर्धः ९२ ९३ हतप्रयत्नं तं शिलीमुखैर्विध्वा सिंहनादमकरोदिति तान्वयः विध्येत्यस्यैव विवरणं शिरोभागमित्यादिभेदयित्वेत्यंतं ९४ ९५ सिंहनादम

॥ रा॰ ७१ ... ॥

यस्य राम स्य नाम मे मारिणो जपंति ते । ज्ञानजन्मकर्मकृतं च बंधनं संसारं परिमुच्य सघर एव अखिल व्याख्यं तस्य दं सघिद्दानंद स्वरूपं यांति ९९ तस्य रामस्य परां बुद्धध्याता मारुतिमतः स एव निर्मुक्तानि समस्तानि बंधनानि कर्माणि यस्य ताद्दशो भवति अतस्तस्य पाशैरितरैर्बंधनैः किं दुःखमिति शेषः १०० इति श्रीमन्मकरध्वजान्वि पद्मु द्वरगंगम मर्थे सादि विरुदावली विराजमान स्वहिम्मति वृ र्मणः पुत्रस्य श्री राम वर्मणः कृतायां व्याख्यायां रामायणे सेतौ सुंदरकांडे तृतीयः सर्गः ३ धनं स्वहस्ते नया श बंधनं येन तादृशं विशेषणं भीतं जनतनगरं लंकां विलोकयंतं रक्षिनुकपां द्दद्दूतं मे वानुपश्चा धांन इति पौर विशेषणं १ स्मरणमात्र संगमं स्मरणमात्र संगमः स्म संबंधो यस्य ताद्दशमेनं हनूमंतं त्रस्यात्मकं कौतुकतया सर्वे राक्षसा मद्दस्वंनपीउ यिष्यतीतिभ्र स्वद्दत्त वरेण सत्वरं गमं हनूमान नृतु मनं ज्ञात्वापि फलु

यस्य नाम सततं जपंति ये ज्ञानकर्मकृतबंधनं क्षणात् सद्य एव परिमुच्य तस्य यांति कोटिरविभासुरं शिवं ९९ तस्य वै यरमस्य पद्दांबुजं सदा हृत्सवमध्ये सुनिधाय मारुतिः सैव विमुक्तसमस्तबंधनः किं तस्य पाशैरितरैः स बंधनैः १०० इति श्रीमदध्यात्मरामायणे उमामहेश्वर संवादे सुंदरकांडे तृतीयः सर्गः ३ पौतं कपींद्रं धृततपा शवबंधनं विलोकयंतं नगरं विभीतवत् अताउयन्मुष्टिनलैः सुकोपनाः पौराः समंतादनुयांतईसन्तु १ ततस्त्वमेन स्मरणमात्रसंगमं कृत्वा गतस्त्वत्सवरेरा सत्वरं ज्ञात्वा हनूमानपि फलुरमुष्टिधतोपि पौ कार्यविशेषगौरवात् २ सभांतरस्यस्य च रावणस्य तं पुरो निधाया हवलारिजित्तदा बद्धो मया ब्रह्मवरेण वानरः समागतोनेन हताः महासुराः ३ यद्वत्त मंत्रार्थ विचार्य मंत्रिभिर्विधीयतामेष मलौकिको हरिः ततो विलोक्याह स राक्षसेश्वरः प्रहस्तमग्रे स्थितमंतनाद्रिभं ४ प्रष्टव्य एषोद्य कुतः किमागतः किमत्र कार्यं कुत एव वानरः वनं किमर्थं सकलं विनाशितं हताः किमर्थं मम राक्षसा बलात् ५ ततः प्रहस्तो हनुमंतमादरात् पप्रच्छ केन प्रहितोसि वानर भयं च ते मास्तु विमोक्ष्यसे मया सत्यं वदस्वाखिल राजसन्निधौ ६ ततोतिहृष्टो पवनात्मजो रिपुं निरीक्ष्य लोकत्रयकंटकासुरं वक्तुं प्रचक्रे रघुनाथसत्कथां क्रमेण रामं मनसा स्मरन्मुदा ७ गः रज्जुभिर्बद्धो धृतोपि कार्यविशेषस्य कर्तव्यस्य गौरवात् बद्धः स्वयं यावित्स्वर्थः २ सभांतरस्थस्य सभामध्यस्थस्य पुरो तं हनूमंतं बलारिजित् इंद्रजित् ब्रह्मवरेण ब्रह्मास्त्रावरलब्ध ब्रह्मास्त्रेण समागतः बंधपीडामसहिष्णुः स्वयमेवागत इत्यर्थः तं हनुमंतं माह अनेनेत्यादि ३ एष हरिः अलौकिक इति तस्य राक्षसेश्वरं कथनं अंजनाद्रिभं अंजनाचलवद्व्योमकांतिं ४ कुतः कस्माद्देशादागत इति शेषः विमोक्ष्यसे अस्मात् धनात् प्राणभयादिति शेषः अखिलराजसन्निधौ अखिललोकरा

देवगणादीनाममित्रशत्रो आदिनानागादिसंग्रहः अशेषतत्त्वस्थितेः अशेषतत्त्वदये षु स्थितिर्यस्य सर्वान्तर्यामिण इत्यर्थः अनेन तत्त्ववेत्ता कथमपि न मोक्ष्यति
सूचितं किंच तन्म से चिकीर्षा तस्य सेवकेरणया सीतान्वेषणमिति सूचितं ८ स राघवः सुग्रीवेण मैत्रीं कृत्वा वालिनं निहत्य तत्प्रसिद्धयत्नाक्रमं सुग्रीवमेव वानराणामधि
पतिं चकार अनेन नरायस्य कृतोपकारत्वात् तन्निमित्तं सुग्रीवः सर्ववानरैर्लंकां रोत्स्य सेवेति सूचितं मित्रभार्याहारिणं त्वयोऽप्यधिकबलं वालिनं मोहतवान् स त्वां स
र्वथा हनिष्यसि एवेति च सूचितं ९ भो इति रावणसंबोधनं प्रवर्षणो नदास्य पर्वतः मर्षयुतः स्वाद्विषयको स सुतो वर्तते १० धरापुत्री जानकी अनेन कि

परराभस्फुरद्देवगणाघमित्र हे राम स्पष्ट हो हमशेषतत्त्वस्थितेः यस्माखिलेशस्तत्त्वनाधुनात्वयाभार्यास्वनाशायमुनेच सद्भुविः ८ स
राघवोऽप्यस्मत्तं गपर्वते सुग्रीवमैत्रीमनलस्य सन्निधौ कृत्वैकवाणेन निहत्य वालिनं सुग्रीवमेवाधिपतिं चकार तं ९ स वानराणामधि
पो महावली महाबलैर्वानरयूथकोटिभिः रामेण साकं सह लक्ष्मणेन भो प्रवर्षणे मर्षपुतो वर्तिष्ठते १० स चोदितस्तेन महाहरीश्वराध
रासुतामार्गयितुं दिशो दश तत्राहमेकः पवनात्मजः कपिः सीतां विचिन्वन् दशमे कं समागतः ११ दृष्टा मया पद्मपलाशलोचना सीतापि
त्वद्वृद्धिविनाशितं रक्षांसितोहरस मयासमागतान्मांहंतुकामान्धृतवायसायकान् १२ मया तोंनेकेपरिरक्षितं वपुः प्रियो हि देहो खिल
देहिनां प्रभो अस्मान्स्वपाशेन निबध्य मां ततः समागमन्नेघ निनाहनामकः १३ स्पृष्टस्त्वेवमां न स्म वरप्रभावतस्तस्सत्कागतं सर्वमवेभिरावण
तथाप्यहं बद्ध इवागतो हितं प्रवक्तुकामः करुणारसार्द्रधीः १४ विचार्य लोकस्य विवेकतो गतिं नरास संसीबुद्धिमपुये हि रावणो दैवीं गतिं संस
तिमोक्षहेतुकीं समाश्रयासंतहिताय देहिनः १५

मागतं इत्यस्य कृतं इत्यस्य चोत्तरं दत्तं ११ वननाशकारणमाह कपित्वादिति चंचलस्वभावत्वादित्यर्थः राक्षसमदमनहेतुमा इदमिति १२ वपुः स्वशरीरं परि
रक्षितं तत्र हेतुः प्रियो हीति १३ सत्कागतं न स्वाहामिति शेषः बद्ध इवागतः तथागमने हेतुर्हितं प्रवक्तुकाम इति तत्र त्वद्वचनेन किं निमित्तमत आह करुणेति
१४ विवेकतः विवेकतः विवेकेन सदसद्विवेकेन लोकस्य गतिं धर्मात्स्वर्गो ऽधर्मान्नरक इत्येवं रूपां विचार्य रामसीतामं सीबुद्धिं संत्यजेत्यर्थः संस्कृतेः संसारादो
मोक्षस्तस्य हेतुकीं हेतुभूतां विनयादित्वादिककरदर्शीदेवीं दैवं वर्णाकांगतिमार्गं यथा रयो ज्ञानतो निवृत्तिरूपं मार्गं समाश्रय देहिनः स्वस्मात्संतहितीयेत्यर्थः १५

अ॰रा॰सु॰
१२

ननु तस्मिन्मार्गे मम नाधिकार इति चेन्न ब्राह्मणत्वादिमात्रं न तत्त्वमित्याह त्वमिति न त्वं वैश्यः संभवत्वस्य विप्रवर्णोऽपि ब्रह्मपुत्रोऽसीति यदि त्वं देहएवात्मेति बुद्धिस्तथापि एवं विचारय स्तुरां क्षसो नामास्ति न ममवंशसंभवत्वेन ब्राह्मणत्वादिति भावः आत्मबुध्या देहातिरिक्तात्मेति बुध्या राक्षसो नदि भवसीति किमु वक्तव्यमिति शेषः १६ एवं सर्वथा राक्षसत्वाभावं प्रसाध्याह शरीरेति शरीरस्थत्वबुद्धिः सूक्ष्मशरीर इंद्रियाणि च सुरासुरनिताज्ञानादुःखसंततिरा

संब्राह्मणोत्कृत्तममवंशसंभवः योऽलसपुत्रोऽसि कुवेरबांधवः देहात्मबुध्यापि च यस्य राक्षसो नास्यात्मबुध्या किमु राक्षसो नहि १६ शरीरबु
द्धींद्रियदुःखसंततिर्नतेन यत्त्वं तव निर्विकारतः अज्ञानहेतोश्च तथैव संततेरसत्तमस्याः स्वपतोहि दृश्यवत् १७ इदं तु सत्संतवनास्ति विक्रि
याविकारहेतुर्नचतेः द्वयसतः यथा नभः सर्वगतं न लिप्यते तथा भवान्देहगतोऽपि सूक्ष्मकः देहेंद्रियप्राणशरीरसंगतस्त्वात्मेति बुध्या खिल
बंधभाग्भवेत् १८ तेच विकारा असंगएवं प्रीवात्मनोऽधिक्रियत्वमप्रतीयादेकाभूतिविरोधस्त्वाश्रु अज्ञानपः पूर्वं वह शालिखिताः नचैवमहं दुः
खी सादिः प्रतीतेः का गतिस्तत्राह अज्ञानहेतोरिति स्वयतः पुरुषस्य प्रतिभासमानस्यापि दृश्यस्य स्वाप्न पदार्थस्य यथाऽसत्यं तथा आत्मस्वरूपा
ज्ञानरूपाद्धेतोर्भासमानाया अस्याः संततेर्दुःखसंततेर्वस्तुतोऽसत्त्वमेवेवं चाहं दुःखी मा भादि प्रतीतिः स्वप्रकालिकतत्प्रतीतिः स्वप्नकालिकतत्प्रतो
तिवद्भ्रमएवेति भावः १७ नन्वेवं संसंवस्तु किमपि नास्येव किं त्वसत्याह इदं तु सत्यमिति सत्त्वरूपं पत्वित्यर्थः एतत्तव विक्रिया नास्ति अविकारी
चेतनएवैकः सत्यः ननु विकारहेतुरज्ञानमपि समस्येवेत्याह ते विकारहेतुर्नच सत्सदिति शेषः तत्र हेतुमाह अद्वयत्वातःएकमेवाद्वितीयं ब्रह्मेत्यद्वैतप्र
तिपादकश्रुतिविरोधात् तथाहि मत्तो द्वितीयस्य निषेधरति भावः ननु चितसंबंधान्ममदुःखादि स्वीत्वमिति चेन्नत्राह यथा सर्वगतमपि नभः पृथिव्यादि
पंकधारिभिर्न लिप्यते सूक्ष्मत्वात्तथा देहगतोऽपि चित्सु समानाधिकरणोऽपि यतः सूक्ष्मकोऽतिसूक्ष्मात्मकतदुःखादिभिर्वस्तुतो न लिप्यते एवं च नील
नभ इत्यादिप्रतीतिवदहं दुःखीत्यादिप्रतीतिर्भ्रमएवेति भावः ननु तर्हि मुक्तसंसारिव्यवस्था किं नास्येवास्ति सा हरदेहेत्यादि देहात्रस्यूलः सूक्ष्मः शरीरस्थ
लेत तद्विवेकाग्रहात्तद्धैव मात्मबुद्धिस्तया अखिलबंधभाग्भवेत् अविवेकएव मुख्यं संसारकारणमिति भावः १८ १८ १८
धियाधिताद्दुःखे सुमलस्त्रणाकामोहरपि सात्त्वं न तेषां चितधर्मत्वात् संचतदाश्रयप्रिन्त्वं नेतिशेषएरणोनव्याख्येयं तस्याचेतनत्वादिति भावः तन्वात्मनएव
दुःखाघस्माइतिमैवत तत्र अहतस्य विविकारतःपिकाराभावो निर्विकारं ततः तवविकाराभावात् दुःखादिम १८ १८ १८ १२

ननुतर्हिमुक्तिर्दुर्लभेतिशंकापांतत्कारणमाहचिन्मात्रमिति विवेकज्ञानएवमोक्षकारणमितितमाहतत्राद्यार्थेनात्मनितत्त्वैवम्पमुक्तंअजत्वेनोत्पत्तिराहित्यं
अक्षरत्वेनाविनाशित्वंआनंदभावःतद्रूपःदेहदोतद्धर्म्ममाहदेहोपीति पृथिवीविकारेत्तसरमाणभिन्नेनिजरुत्तिअनात्मा अनेनाचेतनत्वजन्मत्वादि
देधर्म्ममुक्तं प्राणोप्यात्मानयतएषोबाहदृश्यमानोऽङ्गेनिलएवसः प्राणःपःप्राणाःसवायुरितिश्रुतेः १९ मनोपिनात्मेत्याहमनोपीति नोऽहंसत्याभेति
दोषःतत्तत्तत्अहंकारस्यविकारःनचापिबुद्धिरिति बुद्धिरहंकारोपिनात्मायतःसायतःसाप्रकृतेर्विकारान्महतोजापत्तइतिप्रकृतेर्विकारजा आत्मानिउ
क्तमेवुवैधर्म्यंदर्शयन्नाय पुनराहआत्मेत्यादि सर्वेश्वरः अनेनचेतनानेकत्वंनेतिदर्शितं २० निरंजनइत्यस्यैवव्याख्यामदाउपाधिताःमुक्तः उपाधिभि
नचित्तधर्मैर्दुःखादिभिरलिप्तइत्यर्थः एवमात्मानंज्ञात्वाऽतःसंसाराद्विमुच्यतेनन्वीदृशज्ञानमेनकथंस्यात्तत्राहाहमोहमिति मोक्षस्यासंति कं साधनंनि

चिन्मात्रमेवाहमजोहमक्षरोह्यानंदभावोहमितिप्रमुच्यते देहोप्यनात्मापृथिवीविकारजोनप्राणआत्मानिलएषएवसः १९ मनोप्यहं
कारविकारएवनोनचापिबुद्धिःप्रकृतेर्विकारजा आत्माचिदानंदमयोऽविकारवान्देहादिसंघातव्यतिरिक्तईश्वरः २० निरंजनोमुक्तउ
पाधितःसदाज्ञात्वैवमात्मानमितोविमुच्यते अतोहमात्यंतिकमोक्षसाधनंवक्ष्येशृणुष्वावहितोमहामते २१ विशुद्धिभक्तिःसुविशोधनंधि
यस्ततोभवेत्ज्ञानमतीवनिर्मलं विशुद्धतत्वानुभवोभवेत्ततःसम्यग्विदित्वापरमंपदंव्रजेत् २२ अतोभजस्वाघहरिंममायतिरामंपुराणंप्रकृ
तेःपरंविभुं विसृज्यमोक्षत्वहृदिशत्रुभावनांभजस्वरामंशरणागतप्रियं सीतापुरुद्धत्स्यसमस्तबोधवोरामेननमस्कृत्यविमुच्यसेभयात् २३ रामं
परात्मानमभावयज्जनोभक्त्यात्हृदिस्थंसुखरूपमद्वयं कथंपरंतीरमवाप्नुयाज्जनोभवांबुधेर्दुःखतरंगमालिनः २४ २४ ॥

यमन्यसाधनमित्यर्थः २१ भक्तिज्ञानमाहविशुद्धोहोति धियपश्चित्तस्यनित्यानित्यविवेकद्वारा ज्ञानंआत्माचिदानंदमयइत्यादिनोक्तंततःतद्विषयनिदिध्या
सनतःविशुद्धतत्वानुभवोभवेत् अपरोक्षात्साक्षात्कारोभवेत् तंपरमंपदंब्रह्मसायुज्यं २२ अथसंहरतिअतइति यस्मात् भक्तिज्ञानसाधनंतस्माद्विशुद्धोऽयमेवतदो
षकेचिदोषसौहरिरमायतिमिति ननुदशरथपुत्रोपनसइत्यत्राहप्रकृतेः परमित्यादिदशरथपुत्रःस्वरितुकल्पितमिमिमायाः भोस्यैअर्थमनुष्यइतिबुद्धिरू
पंचलंत्याज्यत्वेनभावनांचविसृज्यभजस्वंप्रतियुक्तंभजनप्रकारमाह सीतामिति २३ अथव्यतिरेकमुखेनतद्भावनाप्रकारमाहरामिति हृदिस्थमित्यनेनांत
र्यामित्वयाप्रत्यक्त्वमुक्तं सुखरूपोमस्त्वेकइस्येवमभावयन्नितिपाठःदुःखरूपात्तरंगमयलायस्यतस्य २५ २५

नोचेत् मद्भुज्ञाकरणेऽनेन ज्वलंतमात्मानमरसि ता सुरिरूपंकिंचस्वकृतैः पातकैः सीताहरणादिभिरिव तत् आत्मानमधोधोनयसि नपिष्यसीत्यर्थः आ
र्थविमोक्षणकातत्संभावनापि न भविष्यतीत्यर्थः २५ अमृतावाद्येतितदास्यैरेनममानन्यास्वादोयस्मात् दशभाषितमित्यर्थः २६ वनेचर सुग्रीवः
केषांमध्येऽतिशयितानकषामयासर्यः २७ विहृद्धकोयेन विह्रहूनकोयेनकरणेनेत्यर्थः अमुंरहूनिवाहेतिशेषः २८ अत्रैवेमेसत्रक्रोधातिशय
येनदशास्योबोधने सस्मृतः २९ पार्श्वेस्थितंराक्षसमितिमनयः स्वडशः कृविति शेषः अमुरस्यममस्त्राणिबोधवास्त्वपश्यंतु ३० हेराजन् अपरराजस्यो
क्षप्टराजस्य शत्रुराजस्यवावानरोवधयोग्योनभवेत् प्रतापयुक्तेराजनिवधेयोग्यतासंभावनमप्यनुचितंदृतत्वात् किंपुनर्वधइतिभावः अयंप्रतापयुक्ते

नोचेत्त्वमत्तानमयेनवह्निनाज्वलंतमात्मानमरस्मितारिवत् नयस्वबोधः स्वकृतैःस्वपातकैर्विमोक्षशंकानवृतेभविष्यति २५ आत्मा
ऽमृतास्वादसमानभाषितंतन्महापुरुषोदृशकंधरोमुरः अमृष्यमाणोऽतिरुषाकपीश्वरं जगादरक्तांतविलोचनोज्ज्वलन् २६ कथंममा
ग्रेविलपस्यभीतवत्त्वमेवं गमनानामधमोऽसिदुष्टधीः कएषरामः कतमोवनेचरोनिहन्मिसुग्रीवयुतंतराधमं २७ त्वांचाद्यहृत्वाजनकात्मजांततो
निहन्मिरामंसुहृतस्मरांततः सुग्रीवमग्रेवलिनंकपीश्वरंसवानरैर्हन्म्यविरेणवानरश्रुत्वादशग्रीवद्वचः समाहतिविरूद्धकोयेनरहविवासुरं २८
नेनिममारावराकोटयोधमारामस्यदासोहमयारिविक्रमः श्रुत्वातिकोपेनहनूमतोवचोदशाननोराक्षसमेकमब्रवीत् २९ पार्श्वेस्थितंमारय
खंडशः कपिंपश्यंतुसर्वेसुरमित्रबांधवाः निवारयामासततोविभीषणोमहासुरंसायुधमुद्यतंवधे ३० एतन्नवधार्हीनभवेत्कथंचनप्रतापयु
क्तैःपरराजवानरः हतेस्मिन्वानरेहतेवार्त्तांकोवानिवेदयेत् रामायत्वंयमुद्दिश्यवधायसमुपस्थितः ३१ अतोवधसमंकिंचिद्दृश्यचिह्नंतयवाने
ऽसविन्होगच्छतुहरिर्यंदृष्ट्वायास्यतिद्रुतं ३२ रामःसुग्रीवसहितस्ततोयुद्धंभवेत्तव विभीषणवचःश्रुत्वारावणोप्येतदब्रवीत ३३ वानराणां

रिंद्रजिदादिभिरयिवृषंयोग्योनेतितथाप्रयासइति संपंवधेवाधकांतरमथाहहतेइति हिलांगूलेमहामानीभवेद्धिलत्रातोवस्त्रादिभिः सुष्ठुवेष्टयित्वा
वार्त्तांसीतावार्त्तांनिवेदयेत् रामायेत मयः यंरामसत्वंवधायसमुपस्थितः यंराममुद्दिश्यत्वमात्मवधायसमुपस्थितः आत्मवधार्थंतदागमनेच्छावानसएतद्वधे
कथमत्रागच्छेदितिसूचनायेः ३१ आपाससमीतिच्छेदः ३२ ततोयुद्धंत्वरमिलसितं ३३ महामानःप्रीतिपूर्वकामभेदमसुपादेयमिति समिमान ३४

राम॰
१३

सर्वे वानर सूथयाः पश्यंतु दग्धसुरुमेनमितिशेषः ३५ ३६ ३७ ३८ किंचित्तु नगरं दाहं ३९ स क्षोभ त्वाक्ष्मोभत्वा वंधाद्विःसृतः जातः पुनरपि पर्वता
कारो बभूव ततो गोपुरं पुरद्वारमुत्तमं तत्र विद्यमानमेकस्तंभं ४० कार्यशेषं लंका दाहरूपं ४१ ४२ हा तात तस्मादित्क्रं दमानाः मा मा रोशि सर्वेभ्यो रुह्या
क्षयिष्यामा वाहून्निशेषः ४३ वन्होमत्तः सोदेवमारवद्दृश्यते ४४ जलधौ नत्ता यी येहु सांतः समुद्रमध्ये लांगूलं मज्जयित्वा स्वस्थचित्तो बभूव

वह्निनायोजयित्वैनं भ्रामयित्वा पुरेभितः विसर्जयिष्यनु पश्यंतु सर्वे वानर सूथयाः ४५ तथेति शरणापैदेश्च बबन्धुरनेकशः तैलाक्ते
वेष्टयामासुर्लांगूलं मारुतेर्द्दढं ३६ युद्धाग्रे किंचिदनन्तं दीपयित्वाथ राक्षसा रज्जुभिः सुदृढं बध्वाधृत्वा तं बलिनो सुराः ३७ समंतात् भ्रा
मयामासुश्चौरोयमिति वादिनः तूर्यघोषैर्घोषयंतः स्ताड्यंतो मुहुर्मुहुः ३८ हनूमतापि तत्सर्वं सोढं किंचिच्चिकीर्षुणा गत्वा तु पश्चिम द्वार
समीपं तत्र मारुतिः ३९ स क्ष्मोव भूवं वंधेभ्यो निःसृतो पुनरप्यसौ बभूव पर्वताकार स्ततस्तु गोपुरं ४० तत्रैकं स्तंभमादाय हत्वा तान् रक्षि
णः स्वराणतः विचार्य कार्य शेषं सः प्रासाद प्रासादारुह्य ४१ उत्सृत्य सुमहदग्निरस्य पुच्छे महता कपिः ददाह लंकामखिलां साट्टप्रासाद तो
रणां ४२ हा तात पुत्रनाथेति क्रंदमानाः समंततः व्याप्ताः प्रासाद शिखरे थारूढा दैत्ययोषितः ४३ देवतास्विव दृश्यंते पतंत्यः पावकेखिलाः
विभीषणगृहं त्यक्त्वा सर्वं भस्मीकृतं पुरं ४४ ततः उत्प्लुत्य जलधौ हनूमान्मारुतात्मजः लांगूलं मज्जयित्वा तः स्वस्थचित्तो बभूव सः ४५ वायोः
प्रियसखित्वाच्च सीतया प्रार्थितोनलः न ददाह हरेः पुच्छं बभूवात्यंत शीतलः ४६ यन्नाम संस्मरणधूत समस्त पापास्तापत्रयानलमपीह तरंति
सद्यः तस्यैव किं रघुवरस्य विशिष्टदूतः संतप्यते कथमसौ प्रकृतानलेन ४७ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे सुंदरकांडे चतुर्थः

४५ वायोः प्रियमित्रत्वात्सीता प्रार्थनेन चानलो ग्रिवापुत्रस्य हरेः पुच्छं दहन् नाबन्माश्रमे वनं किं त्वसंततं शीतलश्च बभूव ४६ धूतानि हराकृतानि समस्त
पापानि येस्तापत्रयमाध्यात्मिकाधिभौतिकाधिदैवभेदान् तत्त्ज्ञं संवह्निमपि तरंति तेन नयीसंतरसद्यः ४७ इति श्रीमत्सकललोकविपदृद्धरणसमर्थसा
दिविकृतपद्धतीविराजमानस्य हिमतिवर्मणः पुत्र स श्रीरामवर्मणः कृतावध्यात्मरामायणसेतौ सुंदरकांडे चतुर्थः सर्गः ४ ४ ४

कारवृत्तिविशेषः बुद्धिरध्यवसायात्मकं अंतःकरणं कर्मेन्द्रियाणि श्रोत्रेन्द्रियाणि तान्येतानि लिंगं लिंगदेहः एव प्राज्ञैर्जन्ममृत्युसुखादिमदुच्यते इत्यर्थः २१

श्रीराम·
२

स एव लिंगदेहाभिमान्येवेत्यर्थः जगन्मयः जगन्मयो हिरण्यगर्भः तत्समष्टिरूपत्वात्तस्येत्यर्थः अवाच्या सत्वासत्वाभ्यामनिर्वाच्या
अनादिरुत्पत्तिरहिता कारणोपाधिः संसारकारणरूपकूटस्थस्य ब्रह्मण उपाधिः २२ स्थूलं स्थूलदेहस्तन्मयस्तमुपाधिर्विराट् सूक्ष्मं
लिंगदेहस्तन्मयस्तमुपाधिर्हिरण्यगर्भः कारणोपाधिरीश्वरः एतैर्विशिष्टो जीवः अंतर्यामित्वेपि तस्याप्युपहितत्वाज्ञानभावात् उपाधित्रयवि
मुक्तोपः परमेश्वरः तुरीय इत्यर्थः विराड्हिरण्यगर्भश्च कारणं चेत्स्यापादयः ईशस्य पत्त्रिभिर्हीनं तुरीयं तत्पदं विदुरिति वार्त्तिकोक्तेः २३

स एव जीवसंज्ञस्तु लोके भाति जगन्मयः अवाच्यानाद्यविद्यैव कारणोपाधिरुच्यते २२ स्थूलं सूक्ष्मं कारणाख्यमु
पाधित्रितयं चितेः एतैर्विशिष्टो जीवः स्याद्वियुक्तः परमेश्वरः २३ जाग्रत्स्वप्नसुषुप्त्याख्यं संसृतौ यत्प्रवर्तते तस्यावि
लक्षणः साक्षी चिन्मात्रस्त्वं रघूत्तम २४ त्वत्त एव जगज्जातं त्वयि सर्वं प्रतिष्ठितं त्वय्येव लीयते कृत्स्नं तस्मात्त्वं सर्वकार
णं २५

तत्र स्थूलसूक्ष्मोपाधिकाभ्यां कारणोपाधेः साक्षिणो भेदक्रममाह जाग्रदिति इंद्रियादिवृत्तिमती जाग्रदवस्था विश्वसाक्षिणी इंद्रियवृत्त्यभाव
कालिकी स्वप्नः करणवासनानिमित्तार्थोपलंभरूपा तैजससाक्षिणी स्वप्नावस्था प्राज्ञसाक्षिणी निद्रा वृत्त्यतिरिक्तसर्ववृत्त्यभावरूपा सुषु
प्त्यवस्था एतत्त्रयात्मिका या संसृतेरविद्यात्मकत्वात्ततो विलक्षणश्चिन्मात्ररूपः साक्षी कारणोपाधिस्त्वमित्यर्थः २४ जगज्जन्मादिका
रणमपि त्वमेवेत्याह त्वत्त इति कृत्स्नमविद्यासहितं २५ ॥

रज्जावित्तिरज्जोरहित्वेन ज्ञानाद्यथाभयं न तथा भयं न तथात्मानं जीवत्वेन ज्ञानतो भयं संसाररूपे तस्मात्स्वरज्जो रज्जुत्वेन ज्ञानात्तद्यथाभयनिवृत्तिस्त
थात्मस्वपरात्मत्वेन ज्ञानात्तन्निवृत्तिरित्यर्थः २६ चिन्मात्रज्योतीरूपेणाभवता सर्वे देहेषु वर्त्तमानाः सर्वा बुद्ध्योतः करणानि यस्मात्प्रकाश्यंते तेन त्व
ह निर्मितिस्तपापोयेः तो भवानात्मवेस्यात्मातत्परमीस्यर्थः २७ अज्ञानात्स्वनन्वरूपात्ताना त्वयि सर्वं जगत्स्यमते आरोप्यते रज्जुपेणतेरूपस्यवेइत्यर्थः य
था च रज्जुतत्वाज्ञानात्भ्रमात्मानस्यभुजंगस्य रज्जुज्ञानाल्लयः एवं त्वत्स्वरूपज्ञानाज्जगमोलयो तत्त्वज्ञानं सदाभ्यसेत न चिंतनेन तत्कथ

रज्जावहिमिवात्मानं जीवं ज्ञात्वा भयं भवेत् परात्माहमिति ज्ञात्वा भयदुःखैर्विमुच्यते २६ चिन्मात्रज्योतिषा सर्वाः सर्व
देहेषु बुद्धयः त्वया यस्मात्प्रकाश्यंते सर्वस्यात्मा ततो भवान् २७ अज्ञानान्न्यस्यते सर्वं त्वयि रज्जौ भुजंगवत् त्वज्
ज्ञानाल्लीयते सर्वं तस्माज्ज्ञानं सदाभ्यसेत् २८ त्वत्पादभक्तियुक्तानां विज्ञानं भवति क्रमात् तस्मात्त्वद्भक्तियुक्ता ये मु
क्तिभाजस्त [illegible] एव हि २९ अहं त्वद्भक्तभक्तानां तद्भक्तानां च किंकरः अतो मामनु
गृहाण मोहयस्व न मां प्रभो ३० त्वन्नाभिकमलोत्पन्नो ब्रह्माहं जनकः प्रभो अतस्त्वाहं पौत्रोस्मि भक्तं मां पाहि राघव ३१

नमस्योस्यं तत्त्वबोधनं एकांते तस्मात्त्वं च तदभ्यासं विदुर्बुधाः सुक्रमभ्यासं कुर्यात् २८ त्वत्पादभक्तियुक्तानां श्रवणं कीर्त्तनं विष्णोः स्मर
णं पादसेवनं अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनमिति नवविधभक्तियुक्तानां क्रमात् वैराग्यश्रवणादिक्रमेण विज्ञानं अपरोक्षसाक्षा
त्कारो भवत्यतस्तएव मुक्तिभाजइत्यर्थः २९ न मोहयस्व त्वमायया इत्यर्थः ३० ॥ ३१ ॥ ३१ ॥ ३१ ॥

नोदितोस्मीत्यन्विकरैसंदेशं वक्तुं प्रेरितोस्मि ३१ ३२ भूभारहरणाय कृता ते प्रतिज्ञा मर्था स्यादिति दोषः ३४ तस्मात्तत्प्रतिज्ञां नेव
चः सत्यं कुरु एतत्रुवेव सत्यसंधः सत्यप्रतिज्ञः ३५ अविदितमिति छेदः विद्यते इत्यत्र काकुः क्वचिद्देशे काले वा किंचिद्वस्तु मे ऽ

इत्युक्त्वा बहुशो नत्वा स्वानंदाश्रुपरिप्लुतः उवाच वचनं रामं ब्रह्मणा नोदितोस्म्यहं ३२ रावणस्य वधार्थाय जातोसि र
घुसत्तम इदानीं राज्यरक्षार्थं पिता त्वामभिषेक्ष्यति ३३ यदि राज्याभिसंसक्तो रावणं न हनिष्यसि प्रतिज्ञा ते कृता राम भू
भारहरणाय वै ३४ तत्सत्यं कुरु राजेंद्र सत्यसंधस्त्वमेव हि श्रुत्वैतद्गदितं रामो नारदं प्राह सस्मितं ३५ शृणु नारद
मे किंचिद्विद्यते ऽविदितं क्वचित् प्रतिज्ञातं च यत्पूर्वं करिष्ये तन्न संशयः ३६ किंतु कालानुरोधेन तत्तत्प्रारब्धसंक्षयात् हरिष्ये
सर्वभूभारं क्रमेणासुरमंडलं ३७ रावणस्य विनाशार्थं श्वो गंता दंडकाननं चतुर्दश समास्तत्र ह्युषित्वा मुनिवेषधृक् ३८
सीतामिषेण तं दुष्टं सकुलं नाशयाम्यहं एवं रामे प्रतिज्ञाते नारदः प्रमुमोद ह ३९ प्रदक्षिणत्रयं कृत्वा दंडवत्प्रणिपत्य
तं अनुज्ञातश्च रामेण ययौ देवगतिं मुनिः ४० ॥ ४०

विदितं विद्यते ऽपि तु नेत्यर्थः सर्वं विदितमेवास्तीत्यर्थः ३६ कालानुरोधेनेति कालस्य मुख्यता णामैव स्थापितत्वादिति भावः
असुरमंडलं रक्षोमंडलं क्रमं पंच भूभारं ३७ ३८ ३९ देवगतिं देवलोकमार्गं ४०

कैवल्यं विमोक्षं ब्रह्मैकत्वलक्षणं मोक्षं विरतिर्वैराग्यं ॥ ४१ ॥ इति श्रीमत्सकलराजविपदुद्धरणसमर्थत्यादिविरुदावलीविराजमानस्मृ
त्यतिवर्णाः पुत्रस्य श्रीरामवर्मणः कृतावध्यात्मरामायणसेतावयोध्याकांडे प्रथमः सर्गः ॥ १ ॥ अथ राजेति रहसि एकांते ॥ १ ॥ नै
गमाः निगमे वणिक्पथे भवाः पद्यानि गमं वेदं तदर्थं वा विदंतीति नैगमाः ॥ २ ॥ ततः सर्वप्रजानुरागात् ॥ ३ ॥ भरतो मातुलमिति

संवादपठनं शृणोति यः स्मरेद्वा यो नित्यं मुनिवररामयोः स भक्त्या संप्राप्नोत्यमरसुदुर्लभं विमोक्षं कैवल्यं विरतिपुरः
सरं क्रमेण ॥ ४१ ॥ इति श्रीमदध्यात्मरामायणे अयोध्याकांडे उमामहेश्वरसंवादे प्रथमः सर्गः ॥ १ ॥ अथ राजा दशरथः क
दाचिद्रहसि स्थितः । वसिष्ठं स्वकुलाचार्यमाहूयेदमभाषत ॥ १ ॥ भगवन्राममखिलाः प्रशंसन्ति मुहुर्मुहुः । पौराश्च निगमा वृद्धाः
मंत्रिणश्च विशेषतः ॥ २ ॥ ततः सर्वगुणोपेतं रामं राजीवलोचनं । ज्येष्ठं राज्येऽभिषेक्ष्यामि वृद्धोऽहं मुनिपुंगव ॥ ३ ॥ भरतो मातुलं
द्रष्टुं गतः शत्रुघ्नसंयुतः । अभिषेक्ष्ये श्वो रामं भवांस्तत्रानुमोदतां ॥ ४ ॥ संभाराः संभ्रियंतां च गच्छ मंत्रय राघवं । उच्छ्रीयंतां प
ताकाश्च नानावर्णाः समंततः ॥ ५ ॥ तोरणानि विचित्राणि स्वर्णमुक्तामयानि वै । आहूय मंत्रिणं राजा सुमंत्रं मंत्रिसत्तमं ॥ ६ ॥

अनेन कैकेयीप्रतिबंधशंका निरासः भरतागमनपर्यंतमेनमभिषेचेत्तदागमनोत्तरमुपायो विमार्गं करिष्यामीत्येवं तन्मानमाशास्येदृनिभा
वः ॥ ४ ॥ संभाराः अभिषेकसामग्रीं मंत्रयेति अभिषेचनार्थमिति शेषः उच्छ्रीयंतां उच्छ्रायंतामित्यर्थः ॥ ५ ॥ तोरणानि उच्छ्रीयंतामित्यत्र

७ ८ मध्यकक्षे मध्यद्वारे षोडशेतिकन्यकाश्चापि वाल्मीकिनापिकन्यानामष्टसंख्यादिहृत्त्वा अष्टौ कन्याश्च ऽ चितामेनस्वर्णवा
रणाः अष्टौकन्याश्चमंगल्याः सर्वाभरणभूषितास्तथाभूषिताइति गजइत्युक्तत्वाच्चापि ९ नानातीर्थोदकैः प्रयागादितीर्थोदकैः १०

स्वाज्ञापयतिपधत्वांमुनिस्तैत्समानय यौवराज्येभिषेक्ष्यामिश्वोभूतेरघुनंदनं ७ तथेतिहर्षात्तमुविंकिंकरोमीस
भाषत तमुवाचमहातेजावसिष्ठोज्ञानिनांवरः ८ श्वःप्रभातेमध्यकक्ष्येकन्यकाःस्वर्णभूषिताः तिष्ठंतुषोडशगजःस
र्णरत्नादिभूषितः ९ चतुर्दंतःसमायातुऐरावतकुलोद्भवः नानातीर्थोदकैःपूर्णाःस्वर्णकुंभाःसहस्रशः १० स्था
प्यंतांनववैयाघ्रचर्माणित्रीणिवानघ श्वेतच्छत्रंरत्नदंडंमुक्तामणिविराजितं ११ दिव्यमाल्यानिवस्त्राणिदिव्या
न्याभरणानिच मुनयःसत्कृतास्तत्रतिष्ठंतुकुशपाणयः १२ नर्तक्योवारमुख्याश्चगायकावेणुकास्तथा नाना
वादित्रकुशलाःवादयंतुनृपांगणे १३ हस्त्यश्वरथपादाताबहिस्तिष्ठंतुसायुधाः नगरेयानितिष्ठंतिदेवतायतनानि
च १४ तेषुप्रवर्तंतांपूजाबलिभिःशोभनैः राजानःशीघ्रमायांतुनानोपायनपाणयः १५ ॥ १५ ॥

व्याघ्रचर्माणिनववात्रीणिवा भद्रपीठास्तरणार्थः ११ दिव्यान्याभरणानिचेत्यत्रस्थाप्यतामित्यनुकर्षः १२ वारमुख्याःवारः
संकेतदिनमेवमुख्यंभर्तृनियमेयासांताःदेश्याइत्यर्थः वेणुकाःवेणुवादनशीलाः १३ हस्त्यश्वरथपादाताःहस्त्यश्वपदातिरूपाः

१६ १७ आचार्यत्वादनिवृत्तत्वाद्द्वारपालैरवारितो भवने प्रविश्याथ अंतःपुरं प्रविष्ट इति शेषः १८ पानीयमानिनाय अर्घ्यपाद्याद्यर्थमिति भावः १९ तदपः तत्पादप्रक्षालनजलं २० अब्रवीत् वसिष्ठमिति शेषः २१ त्वत्पादसलिलं गंगारूपं ज

इत्यादिश्य मुनिः श्रीमान्सुमंत्रं नृपमंत्रिणं स्वयं जगाम भवनं राघवस्यातिशोभनं १६ रथमारुह्य भगवान्वसिष्ठो मुनिसत्तमः त्रीणि कक्षाण्यतिक्रम्य रथात्क्षितिमवातरत् १७ अथ प्रविश्य भवनं स्वाचार्यत्वादवारितः गुरुमागतमाज्ञाय रामस्तूर्णं कृतांजलिः १८ प्रत्युद्गम्य नमस्कृत्य दंडवद्भक्तिसंयुतः स्वर्णपात्रेण पानीयमानिनाय स्वजानकी १९ रत्नासने समावेश्य पादौ प्रक्षाल्य भक्तितः तदपः शिरसा धृत्वा सीतया सह राघवः २० धन्योस्मीत्यब्रवीद्रामस्तव पादांबुधारणात् श्रीरामेणैवमुक्तस्तु प्रहसन्मुनिरब्रवीत् २१ त्वत्पादसलिलं धृत्वा धन्योभूद्गिरिजापतिः ब्रह्मापि मत्पिता ते हि पादतीर्थहताशुभः २२ इदानीं भाषसे यत्त्वं लोकानामुपदेशकृत् जानामि त्वां परात्मानं लक्ष्म्या संजानकीश्वरं २३ देवकार्यार्थसिद्ध्यर्थं भक्तानां भक्तिसिद्धये रावणस्य वधार्थाय जातं जानामि राघव २४

लं २२ उपदेशकृत् ब्राह्मणेष्वेवं भक्तिः कार्येति लोकाननुपदिशन्नित्यर्थः २३ भक्तिसिद्धये इत्यनेन सर्वेतरस्वरूपापेक्षया रामस्व रूपे भक्तिरेव सर्वेष्टसाधनमिति सूचितं २४

त्वं मायेति मायया छादितस्वस्वरूपो यथा बहुरूपिणेत्येवं तत्र पि शिष्यत्वेन गुरुर्भूत्वाहं ब्रह्म शिष्यामीत्यर्थः २५ वात्सल्यमर्यमाह गुरुरिति गु
रूणां ब्रह्मगुरूणां ब्रह्मादीनां २६ तथैव हेतुमाह तन्मयामीति अन्तःस्थित्वात् सर्वनियामकाः अगोचरः वाङ्मनसयोरविषयः स्वाधी
नसंभवत्वं मायाधिष्ठानत्वात् २७ तृष्ण्यजीवने दुष्टजीविकारूपयोरोहितं राजपुरोहितत्वं २८ २९ त्वत्संबंधाकांक्षारूपाशा सं

तथापि देवकार्यार्थं गुह्यं नोद्घाटयाम्यहं यथा त्वं मायया सर्वं करोषि रघुनंदन २५ तथैवानुविधास्येहं शिष्यस्त्वं गुरुरप्यहं
गुरुर्गुरूणां त्वं देव पितॄणां त्वं पितामहः २६ अंतर्यामी जगद्यात्रावाहकस्त्वमगोचरः शुद्धसत्त्वमयं देहं धृत्वा स्वाधीनसंभवं २७
मनुष्य इव लोकेस्मिन् भासि त्वं योगमायया पौरोहित्यमहं जाने विगर्ह्यं दूष्यजीवनं २८ इक्ष्वाकूणां कुले रामः परमात्मा ज
निष्यते इति ज्ञातं मया पूर्वं ब्रह्मणा कथितं पुरा २९ ततोहमाशया राम तव संबंधकांक्षया अकार्षं गर्हितमपि तवाचार्यत्वसि
द्धये ३० ततो मनोरथो मेद्य फलितो रघुनंदन त्वदधीना महामाया सर्वलोकैकमोहिनी ३१ मां यथा मोहयेन्नैव तथा गु
रु निष्कृतिकामस्त्वं यदि देह्येतदेव मे ३२ प्रसंगात्सर्वमप्युक्तं न वाच्यं कुत्रचिन्मया राज्ञा दशरथेनाहं प्रेषितोस्मि रघूद्वह
३३

बंधमाहाचार्यत्वसिद्धये इति ३० लब्धाचार्यकत्वात् गुरुदक्षिणां याचते त्वदधीनेत्यादि ३१ गुरुनिष्कृतिकामस्त्वमस्यार्थः
गुरोः प्रत्युपकारकरणेच्छुः ३२ एवमप्येतत्स्वरूपमन्यत्र चापि प्रकटयिष्यामीति शंकायामुक्तं प्रसंगादिति ३३ ॥ ३३

श्वोमंत्रयितुंबोधयितुं ३४ प्रातर्गमिष्यसि राजसंनिधिंवनेचेतिभावः ३५ ३६ एतद्राज्यप्राप्तिफलंनैवेत्याह निमित्तमात्रमिति क
र्तारंकर्तारंभोक्तारंसुखभोक्तारंत्वमेवनतुस्वस्यकर्तृत्वादिरहितत्वमपिध्वनितं ३७ ममत्वंहिबहिःप्राणाइतित्वमेवनशेषांशरीरान्तस्थप्रा

तामामंत्र्यपितुंराज्येश्वोभिषेक्ष्यतिराघव स्वंत्वंसीतयासार्धमुपवासंयथाविधि ३४ कृत्वाशुचिर्भूमिशायीभवरामजितेंद्रियः
गच्छामिराजसान्निध्यंत्वंतुप्रातर्गमिष्यसि ३५ इत्युक्त्वारथमारुह्यययौराजगुरुर्द्रुतं रामोपिलक्ष्मणंदृष्ट्वाप्रहसन्निदमब्रवी
त् ३६ सौमित्रेयौवराज्येमेश्वोभिषेकोभविष्यति निमित्तमात्रमेवाहंकर्ताभोक्तात्वमेवहि ३७ ममत्वंहिबहिःप्राणोनात्र
कार्याविचारणा ततोवसिष्ठेनयथाभाषितंतत्तथाकरोत् ३८ वसिष्ठोपिनृपंगत्वाकृतंसर्वंन्यवेदयत् वसिष्ठस्यपुरोराज्ञाह्युक्तं
रामाभिषेचनं ३९ यदैवनगरेश्रुत्वाकश्चित्सुमानसंगतो कौशल्यायैराममात्रेसुमित्रायैतथैवच ४० श्रुत्वातेहर्षसंपूर्णे
ददतुर्हारमुत्तमं तस्मैततःप्रीतमनाःकौशल्यापुत्रवत्सला ४१ लक्ष्मींपर्यचरद्देवींरामस्यार्थप्रसिद्धये सत्यवादीदशरथःक
रोत्येवप्रतिश्रुतं ४२ कैकेयीवशगःकिंनुकामुकःकिंकरिष्यति इतिव्याकुलचित्तासादुर्गांदेवीमपूजयत् ४३ ॥ ४३

शाखारकत्वरूपंजीवनंदर्शितं ३८ पुरःअग्रे ३९ नगरेविद्यमानःकश्चित्सुमानसराममात्रेसुमित्रायैचन्यवेदयत ४० तस्मैतद्वार्ता
हाराय ४१ प्रतिश्रुतंप्रतिज्ञातं ४२ दुर्गांदेवींसकलदुःखहरणाक्षमत्वादितिभावः ४३ ॥ ४३ ॥ ४३ ॥ ४३

दैवीं कुंभकर्णास्यनिद्रावरप्राहारादिना देवानामुपकर्त्रीं अयोध्यायां अयोध्याप्रदेशावच्छिन्नभुवो लोकं गच्छेत्यन्वयः ४४
आरोहो मंथरां प्रविशत्व कैकेयीप्रेरणार्थं आर्षस्तङ् ततः प्रेरणाजप्रेरणार्थं कैकेयीं प्रविश ४५ विघ्ने अभिषेकविघ्नेन याचने देवी

एतस्मिन्नंतरे देवाः देवीं वाणीमचोदयन गच्छ देवि भुवो लोकमयोध्यायां प्रयत्नतः ४४ रामाभिषेकविघ्नार्थं यतस्व ब्रह्मवाक्यतः मंथरां प्रविशस्वादौ कैकेयीं च ततः परं ४५ ततो विघ्ने समुत्पन्ने पुनरेहि दिवं शुभे तथेत्युक्त्वा तथा चक्रे प्रविवेशाथ मंथरां ४६ सापि कुब्जा त्रिवक्रा तु प्रासादाग्रमथारुहत नगरं परितो दृष्ट्वा सर्वतः समलंकृतं ४७ नानातोरणसंबाधपताकाभिरलंकृतं सर्वोत्सवसमायुक्तं विस्मिता पुनरागमत ४८ धात्रीं पप्रच्छ मातः किं नगरं समलंकृतं नानोत्सवसमायुक्ता कौशल्या चातिहर्षिता ४९ ददाति विप्रमुख्येभ्यो वस्त्राणि विविधानि च तामुवाच तदा धात्री रामचंद्राभिषेचनं ५० श्वो भविष्यति तेनाद्य सर्वतोऽलंकृतं पुरं तच्छ्रुत्वा त्वरितागत्य कैकेयीं वाक्यमब्रवीत ५१ पर्यंकस्थां विशालाक्षीमेकांते पर्यवस्थितां किं शेषे दुर्भगे मूढे महद्भयमुपस्थितं ५२

वाणीति शेषः ४६ सा गारापाविष्टा त्रिषु कटावुरसि कंठे च वक्रा ४७ ४८ किं केन हेतुना नगरमलंकृतं केन च हेतुना कौशल्योत्सवयुक्ता ददाति ४९ ५० ५१ पुत्रस्य राज्यप्राप्त्या दुर्भगे तच्चिंतारहितासि त्वं मूढे ५२ ॥ ५२ ॥ ५२

श्री·रा·अ·स्त्र·
६

५३ राज्ञोनुग्रहाद्रामस्याभिषेकोभविष्यतीत्यन्वयः ५४ ५५ ५६ कारणेनवाणीप्रवेशाद्धेतोर्वैरिणीवेरमाधत्तान्यकारणवैरिणीतिछेदंकाश्चित् ५७ यद्यर्थंयस्मेवधयोऽव्ययनेमहद्भयमागतमिति ५८ ऋतमध्यवादीतिछेदः त्वमेवमेप्रियमादिकंमिथ्याम

नजानीषेतिसौंदर्यमानिनीमन्दगामिनी ५३ रामस्यानुग्रहाद्राज्ञः श्वोभिषेकोभविष्यति तच्छ्रुत्वासहसोत्थायकैकेयी
प्रियवादिनी ५४ तस्यैदिव्यंददौस्वर्णनूपुरंरत्नभूषितं हर्षस्थानेकिमितिमेकथ्यतेभयमागतं ५५ भरतादधिकोरा
मः प्रियकृन्मेप्रियंवदः कौशल्यांमांसमांपश्यन्नूनंसदाशुश्रूषतेहिमे ५६ रामान्मेसंकिमायन्नेभवमूर्खेवदस्वमे तच्छ्रुत्वा
विषसादाथकुब्जाकारणवैरिणी ५७ ऋणुमहद्वचनेदेविपर्यार्थंतेमहद्भये त्वांतोषयन्नराजाप्रियवाक्यानिभा
षते ५८ कामुकोनृत्यवादीचत्वांवाचाप्रतिबोधयन् कार्यंकरोतितस्यावैराममातुःसुपुष्कलं ५९ मनस्यैतन्निधे
येवप्रेषयामासतेसुतं भरतंमातुलकुलेप्रेषयामाससमानुजं ६० सुमित्रायाःसमीचीनंभविष्यतिर्नसंशयः लक्ष्म
णोराममन्वेतिराज्यंसोनुभविष्यति ६१ भरतोराघवस्याग्रेकिंकरोवाभविष्यति विवास्यतेवानगरात्त्वादृशोवाहाप्यते
चिरात् ६२ ॥

लापएवतस्मेत्यर्थः कार्यंहितं ५९ अतिदुःखावेशात् प्रेषयामासेतिपुनरुक्तिर्नदोषाय ६० ६१ प्रेषोवाहाप्यतेत्या
ज्यतेवधोभविष्यतीत्यर्थः ६२ ॥ ६२ ॥

श्रीराम·
६

सपत्न्याः सकाशाद्यत्पराभवस्तत्तेवादि दृश्यतां ततोपि मरणं श्रेय इत्यर्थः ६३ अभिषेचने विवत्समभीनवपंच चतुर्दश ६४ हे राज्ञि भये ऽभय
स्याने भरत हिते तव पुत्रो रूढो राज्ये दृढो भविष्यतीत्यर्थः नन्वेव पसा सर्वगुणो ज्येष्ठे विद्यमाने कथं कनीयसो पुत्रस्य राज्यमत आह उपायमिति

तं तु दासीव कौशल्यां नित्यं परिचरिष्यसि ततोपि मरणं श्रेयो यत्सपत्न्याः पराभवः ६३ अतः शीघ्रं यतस्वाद्य भरतस्याभिषेचने राम
स्य वनवासार्थं वर्षाणि नव पंच च ६४ ततो रूढो भये पुत्रस्तव राज्ञि भविष्यति उपायं ते प्रवक्ष्यामि पूर्वमेव सुनिश्चितं ६५ पुरा देवा
सुरे युद्धे राजा दशरथः स्वयं इंद्रेणा याचितो धन्वी सहायार्थं महारथः ६६ जगाम सैन्य पासार्धं त्वया सह शुभानने युद्धं च कुर्वतस्तस्य
राक्षसैः सह धन्विनः ६७ तदाऽक्षकीलो न्यपतत् छिन्नस्तस्य न वेद सः त्वं तु हस्तं समावेश्य कीलरंध्रे निधैर्यतः ६८ स्थितवत्यसि
तावद्यावद्यापि त्रियामा परिक्षया ततो हत्वासुरान् सर्वान् ददर्श त्वामरिंदमः ६९ आश्चर्यं परमं लेभे त्वामालिंग्य मुदान्वितः त्वया
ऽऽपन्नेऽस्मि न सिवांछितं वरे ऽस्य यह ७० वरद्वयं प्रसन्नात्मा त्वमेवं राजा वदत्स्वयं त्वयोक्तो वरदो राजन्नयदिदं ते वरद्वय ७१ ॥ ७२

६५ इंद्रेणास्वयं याचित इत्यन्वयः ६६ ६७ अक्षकीलः रथाक्षकील इत्यर्थः स तस्माच्छिन्नोऽन्यपतत् स दशरथश्च न वेद तत्कीलरंध्रे की
लस्थाने स्वहस्तं दत्वा त्वं स्थितवतीत्यन्वयः ६८ ६९ ७० राजाऽवदत्ततो वरद्वेशजा त्वयोक्तः किमुमदादाहराजनिस्मादि ७१ ७२

श्री.रा.म्र.त्र.
५

मयेति वरद्वयमिति शेषः त्वया मत्यं दत्तं वरद्वयमित्यर्थः १२ तथेत्युक्त्वा हे सुव्रते मंदिरं व्रजेति मंदिरं व्रज पुत्रभूते: शिबिरं व्रजेति त्वया मुक्तवानिति शे
षः एतत्सर्वं त्वं तत्रैव स्मृतं १३ तूष्णीमासीत् शमो न कुरुषः प्रार्थितापि त्वदुक्तं करिष्यामीति प्रतिज्ञाय यं तेन राज्ञा सहभावदेत्यर्थः १४ तदेवाह

तथ्येव तिष्ठतु चिरं न्यासभूतं ममानघ यदा मे वसुरोमूयात्तदा देहि वरद्वयं १२ तथेत्युक्त्वा स्वयं राजा मंदिरं व्रज सुव्रते त्वत्तः
स्मृतं मया एवमिदानीं स्मृतिमागतं अतः शीघ्रं प्रविशाद्य क्रोधागारं रुषान्विता १३ विमुच्य सर्वाभरणं सर्वतो विनिकीर्य च
भूमावेव शयाना त्वं तूष्णीमास्व भामिनी १४ यावत्सत्यप्रतिज्ञापरो राजाभीष्टं करोति ते इत्युक्ता चिंतयित्वा तत्र तदा कैकेयनंदि
नी १५ तथ्यमेवाखिलं मेने दुःसंगाहितविभ्रमा तामाह कैकेयी हृष्टा कुब्जे त्वं बुद्धिदर्शिनी १६ एवं त्वां बुद्धिसंपन्नां न जाने व
क्रसुंदरि भरतो यदि राजा मे भविष्यति सुतः प्रियः १७ ग्रामान्शतं प्रदास्यामि मम त्वं प्राणवल्लभा इत्युक्त्वा कोपभवनं प्र
विश्य सहसा रुषा १८ विमुच्य सर्वाभरणं परिकार्य समंततः भूमौ शयाना मलिना मलिनांबरधारिणी १९ ॥

पावद्दिशि सत्यं तत्सर्वं केशपथ सर्वकमिति यावत् तथा प्रतिज्ञापरो राजा ते भीष्टं यावत्करोति तावन्मौनं कुर्वित्यर्थः १५ दुःसंगेन जातविभ्रमा अ
हितेपि हितबुद्धिर्यस्याः दुःसंगात् दुष्टभावा १६ वक्रापि मह्यं हितत्वात् मम सुंदरीति संबोधनं वक्रसुंदरि ११ १८ समंततः परिकीर्य इतस्ततः प्रक्षि

श्रीराम.
५

पावद्रामगमनं तावदेकं शयनमेव सर्वथा तद्गमनेतु प्राणांस्त्यजेदित्यर्थः ८० निश्चयमुक्तार्थविषयं ८१ अथकैकेय्याः कुब्जासंगादि
दम्य(?)विचार्यकारित्वमित्यर्थः विद्वांसः सामान्यरूपेणार्थान्तरन्यासेन दर्शयति धीरइति महामना इत्यर्थः सुगुणग्रामाभावाचारचित इत्यर्थः वा
श्राद्धाद्याचार्यैर्विधिं वदन्ति तादृशोपि देशिको गुरुः नत्वपरस्तत्सेवापरः गुरुसेवया सकलविधिप्रनिषेधार्थज्ञ इत्यर्थः विद्यावस्तुतत्वज्ञाने ते

योगात्वत्शृणु मे कुब्जे यावद्रामो वनं व्रजेत् प्राणांस्त्यक्ष्येथवा वक्रे शपिष्ये तावदेव हि ८० निश्चयं कुरु कल्याणि कल्याणं ते भ
विष्यति इत्युक्त्वा त्वरया कुब्जा शत्रुहं सापि तयाकरोत् ८१ धीरोप्यं तदपान्वितोपि सुगुणाचारान्वितो वाथवा नीतिज्ञो विधिवाददे
शिकप्रवरो विद्याविवेकोथवा दुष्टानामतिपापभावितधियां संगं सदा चेद्व्रजेत्तद्बुध्या परिभावितो व्रजति तत्साम्यं क्रमेणास्फुटं ८२
अतः संगः परित्याज्यो दुष्टानां सर्वदैव हि दुःसंगी च्यवते स्वार्थाद्यथेयं राजकन्यका ८३ इति श्रीमदध्यात्मरामायणे अयोध्याकांडे
उमामहेश्वरसंवादे ततो राजा दशरथो रामाभ्युदयकारणात् आदिश्य मंत्रिप्रकृतीः सानंदो गृहमाविशत् १ तत्रादृष्ट्वा प्रियां राजा ह्वा
किमेतदिति विह्वलः या पुरा मंदिरं तस्याः प्रविष्टमपि शोभना हसंती मामुपायाति सा किं नैवाद्य दृश्यते २ ॥ २ ॥ २ ॥

तु विवेकस्तत्साम्याद्विवेकोपस्यास्तः ८२ ८३ इति श्रीमत्सकलसज्जनविपद्दुहरणसमर्थश्रीमादिविराजमानस्य हिम्मतिवर्मणः पुत्र श्रीरामवर्मणाः कृता
वध्यात्मरामायणसेतौ अयोध्याकांडे द्वितीयः सर्गः २ ततइति मंत्रिणः सुमंत्रादयः प्रकृतयो मुख्यपौराः १ तस्याः कैकेय्या मंदिरं प्रविष्टमपि या कैके
यी हसंती मामुपयाति सा अधुना दृश्यते तत्किमित्यन्वयः २

३ दुःपुष्णाकं ४ ५ ६ मीकिंखेदयसे तत्रहेतुर्यन्नइति ७ किमर्थंनिष्यसीतीतिशेषः ८ वांछितविधानप्रकारमेवाह कोवेति ९
यद्यायेनप्रकारेण दंडनेनवधेनवातदवपंथ्यब्रूहि १० ममसत्यंतंजानासि सदुःखामहिसुत्वेनेतिशेषः प्रियंमांत्वाधीनंजानासि एवंपरिश्र

इत्यात्मन्येवंसंचिंत्यमनसातिविह्वलापृता ३ पप्रच्छदासीनिकरंकुतोवःस्वामिनीशुभा नोपातिमामथापूर्वमत्विपाश्रिपरर्शन ४
नाउचुःक्रोधभवनंप्रविष्टानेवविद्महे कारणंतत्रदेवत्वंगत्वानिश्चेतुमर्हसि ५ इत्युक्तोभयसंत्रस्तोराजातस्याःसमीपगः उपवि
श्यशनैर्देहंस्पृशन्नेवपाणिनाब्रवीत ६ किंशेषेवसुधापृष्ठे पर्यंकादीन्विहायच मांतत्खेदयसेभीरूपत्नीमानातभाषसे ७ त्व
लंकारंपरित्यज्यसर्वमेमलिनवाससा किमर्थंब्रूहिसकलंविधास्येतववांछितं ८ कोवाजनोहितेकर्त्तानारीवापुरुषोपिवा सर्वे
दंडयश्चवध्यश्चभावग्यातिनसंशयः ९ ब्रूहिदेवियथाप्रीतिस्तदवध्यंममाशयतः तवहिदानीसाधयिष्येसुदुर्लभमपिध्रुवगात
१० जानासित्वंममसत्यंतंप्रियंमांत्ववशेस्थितं तथापिमांखेदयसेहयातवपरिश्रमः ११ ब्रूहिकंधनिनंकुर्यांदरिद्रंतेप्रियंकरं
धनिनंदरिद्रमात्रंवानिर्धनंचतवाहितं १२

स्वविनापित्वदुक्तार्थानुष्ठानंमयाकर्त्तव्यमेवेतिहयायंपरिश्रमइतिभावः ११ तेप्रियंकंधनिनंकुर्यांअप्रियंकंचदरिद्रंकुर्यां धनिनंकु
बेरतुल्यंधनवंतमपिक्षणेनतवद्वहितंनिर्धनंकरिष्यामीतिशेषः १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२ ॥ १२

कं ब्रह्मतुल्यमपि वधिष्यामि वधार्हश्चोरादिरपि तस्मिन्पो विमोक्ष्यते मयेति शेषः १३ युक्तं वहितं तत्करोमीति शपेरमशपपेपूर्वकं ब्र
तिज्ञानेरस्यार्थः १४ १५ १६ १७ १८ १९ २० २१ किंचिद्विलेवेतमात्तः कालोनेरस्नशामपि पिविलेवेमयामाशाम्यागः कर्तव्यमेरस्यार्थः

ब्रूहि किं वा वधिष्यामि वधार्हो वा विमोक्ष्यते किमन्न वक्तुनोक्तेन प्राणान्दास्यामि ते प्रिये १३ मम प्राणाः स्थिता यत्र रामो रा
जीवलोचनः तस्योपरि शपे ब्रूहि त्वद्धितं तत्करोम्यहं १४ इति श्रुत्वा शासनं राज्ञो नेत्रापूर्यं ततो राघवोपरि शनैर्विमृज्य नेत्रे सा राज्ञा ने
प्रत्यभाषत १५ यदि सत्यप्रतिज्ञोसि शपथं कुरुषे यदि याच्ञामेम सफलां कर्तुं शीघ्रमेव त्वमर्हसि १६ पूर्वं देवासुरे युद्धे
पालं परिरक्षितः तदा वरद्वयं दत्तं त्वया मे तुष्टचेतसा १७ तद्द्वयं न्यासभूतं मे स्थापितं त्वयि सुव्रत तेनैकेन वरेणाशु भरतं मे प्रि
यसुतं १८ एभिः संभृतसंभारैर्यौवराज्येऽभिषेचय अपरेणा वरेणाशु रामो गच्छतु दंडकान् १९ मुनिवेषधरः श्रीमान्जटा
वल्कलभूषणः चतुर्दश समास्तत्र कंदमूलफलाशनः २० पुनरायातु तस्यांते वने वा तिष्ठतु स्वयं प्रभाते गच्छतु वनं रामो रा
जीवलोचनः २१ यदि किंचिद्विलंबेत प्राणांस्त्यक्ष्ये तवाग्रतः भव सत्यप्रतिज्ञस्त्वं राजदेव मम प्रियं २२ श्रुत्वैतद्दारुणं
वाक्यं कैकेय्या रोमहर्षणं निपपात महीपालो वज्राहत इवाचलः १३

२२ रोमहर्षणं श्रवणं तोषमेमाचोन्मादकमभिक्रत्वान २३ ॥२३ ॥ २३ ॥ २३ ॥ २३ ॥ २३ ॥

परस्पराउत्कण्ठयाकैकेयीमिषानेत्रे विमृज्याश्रुरहिते कृत्वासाश्रुनेत्रत्वं दृष्ट्वा गतिक्रोधेन शमवधं वा प्रार्थयेदिति अधिकाभीःनिरुक्तेति पादे पतनवे लापांपराङ्मुखपतनाङ्कृतीत्याभिप्रायेण स्पष्टितिनत्तमुख्वीमूर्ध्वेत्यर्थः पुनर्मनुष्यदेहधरायामद्वार्पायाएवं कैोपांसम वृषपोलोयदुःस्वप्नइतितर्कः जायतःस्वप्नानुभवाश्चभवासहस्त्रथवामेवविभ्रमस्यविभ्रमःस्वस्मार्थकसान्यार्थकत्वग्रहः २४ इतिविचार्येतिशेषः पुरःस्थितांव्याघ्रीमिव पुरः पत्नींकैकेयीमालोक्यदृस्यातदृक्तत्वनिर्णयायनामाहेतिशेषः किमाहेत्यत्राह किमिदमिति ममप्राणाहरमित्यनेनस्वबैषम्यंसंपा

शनैरुन्मील्यनयनेविमृज्यस्मरयामिया दुःस्वप्नोवाभ्रमयादृष्टोह्ययथवाचित्तविभ्रमः २४ इत्यालोक्यपुरःपत्नींव्याघ्रीमिवपुरः स्थितां किमिदंभाषसेभद्रेममप्राणाहरंवचः २५ रामःकमपराधंतेकृतवानकमलेक्षणः ममाग्रेराघवगुणान्वर्णयस्यनि शंशुभान् २६ कौशल्यांमांसमंपश्यन्शुश्रूषांकुरुतेसदा इतिब्रुवंतीत्वंसर्वमिदानींभाषसेऽन्यथा २७ राज्यंदृष्ट्वाप्रयुत्रायपरा मस्तिदृष्ट्वमंदिरे अनुरक्तास्यपांवामेरामामन्यसितिमयंतव २८ ॥ २८ ॥ २८ ॥ २८ ॥ २८ ॥

दकत्वेनाभितस्त्वानिष्ठंकथंभाषसेइत्यर्थः २५ ननुरामकृतानिदुःसहापराधवशात्त्वानिष्टेपिमेएवनित्तत्राह रामइति अपरा धकरणप्रागुक्तत्वदाक्येनेवनिराणीतमित्याह ममेति २६ इदानीमन्यथाभाषसे अतःपूर्वापरविरोधादिदंत्वद्वचोऽस्वप्नदेहमित्य र्थः २७ यदिराज्यलोभस्तेनत्राहराज्यमिति रामस्यैवहस्थितावपिनेतेभयमित्यर्थः वामे महिरूढाचरणाशीले २८ ॥ २८

सापि कैकेयी पूर्वं तादृशभाषणशीलाभिमृदुरपि कैकेयी दैववशात्पापावेशवशाद्रक्तान्तलोचना सती राजानं प्रत्युवाच २९ उक्तं प्रति
ज्ञापूर्वमुक्तं ३० मिथ्याभाषणाज्जन्यो नरकोऽस्त्येव पुनः पापात्तज्जं नरकं मे प्रदर्शयति वनमिति अजिनमेव न चीरं कषिवस्त्रं तेन पुत्रः

इत्युक्त्वा क्रूरपरीतात्मा सोपानस्योर्निपपात ह कैकेयी प्रत्युवाचेदं सापि रक्तान्तलोचना २९ राजेन्द्र किं त्वया प्रोक्तोऽसि तदुक्तं त्वया घते
न्यया मिथ्या करोषि चेत्त्वं यद्भाषितं नरको भवेत् ३० वनं न गच्छेद्यदि रामचन्द्रः प्रभातकाले जिनचीरयुक्तः उद्बन्धनेनापि
षभक्षणेनापि कृत्वा मरिष्ये पुरतस्तवाहं ३१ सत्यप्रतिज्ञोऽहमिती ह लोके विडम्बसे सर्वसभान्तरेषु रामोपरि त्वं प्रापय्य च कृत्वा मिथ्या
प्रतिज्ञो नरकं प्रयाहि ३२ इत्युक्तः प्रियया दीनो मग्नो दुःखार्णवे नृपः मूर्छितः पतितो भूमौ विसंज्ञो मृतकोपमः ३३ एवं
रात्रिर्गता तस्य दुःखात्संवत्सरोपमा अरुणोदयकाले तु बन्दिनो गायका जगुः ३४ निवारयित्वा तान्सर्वान्कैकेयी रोषमा
स्थिता ततः प्रभाते समये मध्यकक्षामुपस्थिताः ३५ ब्राह्मणाः कृत्विपाद्याः कषयः कन्यकास्तथा रुद्रवचामरादिमंग
लोपाजीतथैव च ३६ अन्याश्च वारमुख्याः पौरा राजानपदास्तथा वसिष्ठेन यथाज्ञप्तं तत्सर्वं तत्र संस्थितं ३७ ॥ ३७

विडम्बसे श्लाघसे रामोपरीत्यनेन मम पुत्रस्य योग्यं मिथ्या तस्या कृत इति द्योतयति ३२ ३३ ३४ तान्वंधादीन्गायकान्निवर्त्य संरोषरोपाशि
शयमास्थिता प्रसन्ना प्रातः समये जाते पिरामस्य कार्यं वनाय नप्रेषयती त्यधिको रोषः ३५ ३६ ३७ ॥ ३७ ॥ ३७

क्र किरीटकटकानि उज्वलानि शोभावंति यस्य तं बंधयन्त ३९ ४० ४१ सुमंत्र इति प्रजानां तादृशीं चिंतां ज्ञात्वा स्वयमपि चिंतयन्नित्यर्थः

स्त्रियो बालाश्च वृद्धाश्च रात्रौ निद्रां न लेभिरे कदा द्रक्ष्याम हे रामं पीतकौशेयवाससं ३८ सर्वाभरणसंपन्नं किरीटकटकोज्व
लं कौस्तुभाभरणं श्यामं कंदर्पसमसुंदरं ३९ अभिषिक्तं समायांतं राजानं रूढस्मिताननं छत्रं छत्रधरं तत्र लक्ष्मणं लक्षणा
न्वितं ४० रामं कदा वा द्रक्ष्यामः प्रभाते कदा भवेत् इत्युक्त्वा कथिताः सर्वे बभूवुः पुरवासिनः ४१ नेदानीमुत्थितो राजा कि
मर्थं चेति विचिंतयन् सुमंत्रः शनकैः याया यत्र राजावतिष्ठते ४२ वर्द्धयन् जयमन्त्राढ्यन प्रणामन् शिरसा नृपं अतिरिक्तं नृपं
दृष्ट्वा कैकेयीं समपृच्छत ४३ देवि कैकेयि वद त्वं किं राजा दृश्यते अन्यथा तमाह कैकेयी राजा रात्रौ निद्रां न लब्धवान् ४४
रामरामेति रामेति राममेवानुचिंतयन् प्रजागरेण वै राजा त्वद्य स्वल्पकृते राममानय शीघ्रं त्वं राजा द्रष्टुमिहेच्छति ४५
सुमंत्र उवाच अश्रुत्वा राजवचनं कथं गच्छामि भामिनि तच्छ्रुत्वा मंत्रिणो वाक्यं राजा मंत्रिणमब्रवीत ४६ सुमंत्र रामं द्र
क्ष्यामि शीघ्रमानय सुंदरं इत्युक्तस्त्वरितं गत्वा सुमंत्रो राममंदिरं ४७ अवारितः प्रविष्टोयं त्वरितं राममब्रवीत् शीघ्रमाग
च्छ भद्रं ते राम राजीवलोचन ४८

४२ ४३ अन्यथा शोकवान् अस्वस्थश्च ४४ ४५ भामिनि कोपने इत्यर्थः कोपना सैव भामिनीति निघंटुः ४६ ४७ अ
तिहृत्त्वात्स्थितत्वाच्च द्वारपालैरवारितः ४८

४९ पश्यन्नेव पितृदर्शनत्वरया दर्शनमात्रेणावस्त्वेषेवतेषां शिष्टाचारस्कुर्वन्नित्यर्थः ५० ससंभ्रमः सादरः ५१ दुःखात्तमाविरामविरहदुःखात ५२ समाविशत् राजगृहं प्राविशत् ५३ ५४ राजदुःखोपशान्तरर्थं त्वमेवकारणं तदेवकारणत्वेन मर्षयतीति किंचिदिति ५५

पितुर्गेहं मया सार्धं राजा त्वां द्रष्टुमिच्छति इत्युक्तो रथमारुह्य संभ्रमात्त्वरितं ययौ ४९ रामः सारथिना सार्धं लक्ष्मणेन समन्वितः मध्यकक्षे वसिष्ठादीन् पश्यन्नेव त्वरान्वितः ५० पितुः समीपं गमनेनापृच्छ सोऽपि पितुः राममालिङ्गितुं राजा समुत्थाय ससंभ्रमः ५१ बाहू प्रसार्य रामेति दुःखान्मध्ये पपात ह हाहेति राम सत्वरं शीघ्रमालिङ्ग्याङ्के न्यवेशयत् ५२ राजानं मूर्छितं दृष्ट्वा चुक्रुशुः सर्वयोषितः किमेतद्रोदनामेति वसिष्ठोऽपि समाविशत् ५३ रामः पप्रच्छ किमिदं राज्ञो दुःखस्य कारणं एवं पृच्छति रामे सा कैकेयी राममब्रवीत् ५४ त्वमेव कारणं ह्यत्र राज्ञो दुःखोपशान्तये किंचित्कार्यं त्वया राम कर्तव्यं नृपतेर्हितं ५५ कुरु सत्यप्रतिज्ञस्त्वं राजानं सत्यवादिनं राज्ञा वरद्वयं दत्तं मम संतुष्टचेतसा ५६ त्वदधीनं तु तत्सर्वं वक्तुं त्वां लज्जते नृपः सत्यपाशेन संबद्धं पितरं त्रातुमर्हसि ५७ पुत्रशब्देन चैतद्धि नरकात्त्रायते पिता रामस्ताडितः क्षत्वाश्रूलनाभिहतो यथा ५८ व्यथितः कैकेयीं प्राह किं मामेवं प्रभाषसे पित्रर्थे जीवितं दास्ये पिबेयं विषमुल्बणं ५९ ॥

कार्यमवाह सत्यप्रतिज्ञश्शनि त्वंदंडकागमनविषये सत्यप्रतिज्ञो भूत्वा इत्यर्थः ५६ तत्सर्वं तद्वाद्वयानुष्ठानं त्वदधीनं अतः सत्यपाशेन ५७ पुत्रशब्देनैतदुच्यते तदेवदर्शयति पुन्नाम्नो नरकात्पिता त्रायते येन स पुत्र इत्यर्थ इत्यर्थ इति भावः ५८ पिबेयं विषं पित्राज्ञयेति शेषः ५९ ॥ ५९ ॥

श्री·रा·अ·स·
१२

यः कुरुते स उत्तमः स्मर्यः ९० मलो मलम् दशः ९१ ९२ ९३ तैर्भरतो वयमभिषेच्यः एवेत्यन्वयः ९४ समाः वर्षाणि ९५ ९६ राजा किं केन कारणेनेह विषये मां न वक्तीत्येतत्कारणं न जाने अकर्मन्यतां सम्भावनाया पाममप्यपाद्विजिभावः ९७ दुःखितं राज्ञः स्ववचनेन दुःखितं

सीतां त्वमस्येष्यथ कौशल्यां राज्यं चापि समाज्ञाय्यह अनाज्ञप्तोपि कुरुते पितुः कार्यं स उत्तमः ९० उक्तः करोति यः पुत्रः स मध्यम उदात्ततः उक्तोपि कुरुते नैव स पुत्रो मल उच्यते ९१ अतः करोमि त्वं यद्वाह पिता मम सत्यं सत्यं करोम्येव राम मोह्मि नोभिभाषते ९२ इति राम प्रतिज्ञां श्रुत्वा वक्तुं प्रचक्रमे रामत्वदभिषेकार्थं संभाराः संभृताः स्वपे ९३ तैरेव भरतो वयममभिषेच्यः प्रियो मम अपरेणाप्युचीरवासा जटाधरः ९४ वने त्वया हि शीघ्रं त्वमद्यैव पितुराज्ञया चतुर्दश समा मासं वस्तुं समुन्नभोजनः ९५ एत देव पितुस्तेष कार्यं त्वं कर्तुमर्हसि राजा तु लज्जा तेन वक्तुं त्वामिव रघुनंदन ९६ श्रीराम उवाच भरतस्यैव राज्यं स्याद्दहं गच्छामि दंडकान् किं तु राजा न वक्ता हं मां न जाने तत्र कारणं ९७ श्रुत्वैतद्राम वचनं दत्ता सा मंथुरस्मितं प्राह राजा दशरथो दुःखितो दुःखितं वचः ९८ स्त्रीजितं भ्रांतहृदयं मुन्यार्गपरिवर्तिनं निगृह्य मां गृहाण त्वं राज्यं पापं न स्याद्भवेत ९९ ॥ ९९ ॥ ९९

९८ ज्येष्ठादाक्षिण्यकनिष्ठपराज्यदानरूपेण न्यायमार्गं वर्त्तमानं अतएव भ्रांतहृदयं स्त्रीजितं च पापं न तत्र भवेदिति गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथं प्रतिपन्नस्य दंड एव विधीयत इति नीत्युक्तेः ९९

श्रीराम·
१२

त्वया वत्सात्कारेणात्र हरणान्ममाप्येनत्त्वद्दानाकृतकृतो न दोष इत्याह एवं वेदेति ७० यद्यपि तव जगन्नायकत्वादारण्यविपिनयोः समं नैव तथापि त्वद्वि
योगे मम प्राणास्त्वद्वल्लभतां त्वया सह गमिष्यन्तीत्याह ममप्राणानवल्लभेति ७१ विमृज्य निःसृत्य एकेकृत्वा ७२ शासितेत्यादि मदनुजेनापि राज्य
करणेन तस्यापि तव सुवृत्तात्त्वदुक्तत्वाच्चावदुःखं न स्यादिति भावः ७३ ७४ मम पुत्रं त्वत्तः विशिष्टे हे देव त्वत्सत्यपालनरूपं कार्यं च भविष्यतीति अधि

एवं वेदनं तं नैव मीरस्वशोऽद्रघुनंदन इत्युक्त्वा दुःखसंतप्तो विललापनृपस्तदा ७० हा राम हा जगन्नाथ हा मम प्राणवल्लभ मां वि
सृज्य कथं घोरं विपिनं गन्तुमर्हसि ७१ इति रामं समालिंग्य मुक्तकंठो रुरोद ह विसृज्य नयने रामः पितुः सजलपाणिना ७२
आश्वास्य प्राह तत्त्वज्ञः शनैः सनयकोविदः किमत्र दुःखेन विभो राज्यं शास्तु ममानुजः ७३ अहं प्रतिज्ञां निस्तीर्य पुनर्यास्यामि ते
पुरं राज्यात्कोटिगुणं सौख्यं मम राजन् वने मतः ७४ त्वत्सत्यपालनं देवकार्यं चापि भविष्यति कैकेय्याश्च प्रियो राजन् वनवा
सो महागुणः ७५ इदानीं गंतुमिच्छामि मे मातुश्च तं हन्तेः संभारान्पुपहृत्य तामभिषेकार्थमागताः ७६ मातरं च समा
श्वास्य अनुनीय च जानकीं आगत्य पादौ ववंदे तातस्य प्रमुखच्च वन ७७ ॥

कौसल्यामिति स्पष्टे ये गादेवानां कार्यं च रक्षोनाशरूपं भविष्यतीति ध्वनितं कैकेय्याश्च प्रियो ततो महागुणः बहुगुणा इत्यर्थः ७५ इदानीमि
दानीमेवेत्यर्थः उपहृत्यानंतां दूरीकृत्य पतंत ७६ सुखमित्यनेन मम वनगमने दुःखलेशोऽपि नास्तीति ध्वनितं ७७ ॥ ७७ ॥ ७१

समकारणात् रामाभिषेकविघ्ननिवृत्तिनिमित्तं १८ एकाग्रमानसेत्यत्र फलार्थमेव विविधं ध्यायतेव आर्षमात्मनेपदं ध्यायति अन्तःस्थं तस्य अन्तःस्थं अन्तर्यामिनमपार्थं हृदयेऽवस्थितं ध्येयरूपमाह घनेत्यादि निरस्तेत्यादिनाऽनधिकल्पसमाधिस्थोक्तं सकलविशेषरहितं तज्ज्ञानस्य च निर्विकल्पकत्वात् निरस्तानि सर्वाणि अतिशयस्वरूपाणि भेदकस्वरूपाणि येन तस्य भावः २० इति श्रीमत्सकलराजपदुरंधरा

इत्यन्तःपुरपरिकम्पमानं दृष्ट्वा मायेयी कौसल्यापि हरेः पूजां करोत्येव रामकारणात् १८ होमं च कारयामास ब्राह्मणेभ्यो ददौ धनं ध्यायते विष्णुमेकाग्रमानसा मौनमास्थिता १९ अन्तःस्थमेकं घनचित्प्रकाशं निरस्तसर्वातिशयस्वरूपं विष्णुं सदानन्दमयं हृद्ब्जे सा भावयन्ती न ददर्श रामं २० इति श्रीमदध्यात्मरामायणे अयोध्याकाण्डे उमामहेश्वरसंवादे तृतीयः सर्गः ३
ततः सुमित्रां दृष्ट्वैनं रामं राज्ञी ससंभ्रमा कौसल्या बोधयामास रामोऽयं समुपस्थितः १ सा तु ध्यानपरा बाह्ये न जानाति स्म किंचन २ मूर्ध्न्यवघ्राय परिष्वज्य गात्रं नीलोत्पलच्छवि भुङ्क्ष्व पुत्रेति च प्राह मिष्टमन्नं क्षुधार्दितः ३

सम्पर्येत्यादि विरुद्धावलोविराजमानस्य हिम्मनि च मेरोः पुत्रस्य श्रीराम चमेरोः कृता च ध्यात्मरामायणाटीकायामयोध्याकाण्डे तृतीयः सर्गः ससंभ्रमा सादरं सुमित्राशङ्की कौसल्यी बोधयामास तत्त्वपः १ बहिर्दृष्टिप्रवाहितासक्तसमाधिरित्यर्थः २ भुङ्क्ष्व पुत्रेति

[illegible]

भोजनावसरेनकृतः पित्रेतिशेषः निश्चितःकृतःपित्रेतिशेषः ४ ५ मुनिवेषःचीरधारणसहचरादिकं चिंतामहिषपीकर्तुंनार्हसि ६
संप्लुताममा ७ क्षणार्धंवा क्षणार्धमपि ८ बालकमत्यंतबालं वत्सशब्दोहिगवापत्येरूढः ९ राजाराज्यं प्रयच्छतु तस्माच्चेनमिक्षा

रामः प्राहचेमेमातर्भोजनावसरःकृतः दंडकागमनेशीघ्रंममकालोद्यनिश्चितः ४ कैकेयीवरदानेनसत्यसंधःपितामम भ
रतायदेशोराज्यंममाप्यारण्यमुत्तमं ५ चतुर्दशसमास्तत्रह्युषित्वामुनिवेषधृक् आगमिष्येपुनःशीघ्रंनचिंताकर्तुमर्हसि ६ तच्छ्रु
त्वासहसैवाहिमामूर्च्छितापुनरुत्थिता प्राहरामंमुदुःखार्तादुःखार्तादुःखसागरसंप्लुता ७ यदिरामवनंसत्यंयासिचेन्नयमामपि
त्वद्विहीनाक्षणार्धंवाजीवितंधारयेकथं ८ यथागौर्बालकंवत्सं त्यक्त्वातिष्ठेन्नकुत्रचित् तथैवत्वांनशक्नोमित्यक्तुंप्राणप्रियंपु
ते ९ भरतायप्रसन्नश्चेद्राज्यंराजाप्रयच्छतु किमर्थंवनवासायत्वामाज्ञापयतिप्रियं १० कैकेय्यावरदोराजासर्वस्वंवाप्रयच्छ
तु त्वयाकिमपराद्धंहिकैकेय्यावानृपस्यवा ११ पितागुरुर्यथारामतवाहमधिकाततः पित्राज्ञप्तोवनंगंतुंवारयेयमहंसुत १२

विषयत्वात् किमर्थमिति नहितेनेकिंचिद्दृष्टमितिभावः १० त्वयाकिमपराद्धंयत्वीवनायप्रस्थापयतीतिशेषः ११ यथा
पितागुरुस्तथाहमपितवगुरुर्यद्वाततोधिकापितुर्दशगुणामातागौरवेणातिरिच्यतइतिस्मृतेः एवंचमदाज्ञयावनागमनमेवोचितमितिभा
वः १२ ॥ १२ ॥ १२ ॥

तदाश्रारामिति एवंचमातृवधदोषोवनगमनेधिकइतिभावः १३ रुषादहनिवेत्यन्वयः १४ भ्रांतमनसं राज्यलोभेनभ्रांतएवकैके केयीवशवर्तिनं १५ पुरालोकान्दहतः कालाग्निरुद्रस्येवेत्यर्थः अनेनतदवतारत्वंसूचितं १६ तत्राभिषेकेविघ्नकारिणोपि हन्यामित्यर्थः १७ तेसर्वकालाग्निरुतुल्यत्वंतद्रूपत्वंचसत्यमेवजानामिकिंतुतस्यपराक्रमस्यसमयइदानीनकिंतुचतुर्दशवर्षेइतिव्यंग्य

यदिगच्छसिमहारण्यमुल्लंघ्यनृपवाक्यतः तदाश्रारामान्परित्यज्यगच्छामिपृथगादनं १३ लक्ष्मणोपितनःकृत्वाकोश त्यावचनेरुषा उवाचराघवंवीक्ष्यदहन्निवजगत्त्रयं १४ उन्मत्तंभ्रांतमनसंकैकेयीवशवर्तिनं बध्वानिहन्मिभरतंतत द्वंधून्मातुलानपि १५ अद्यपश्यंतुमेशौर्यंलोकान्दहतःपुरा रामत्वमभिषेकायकुरुयत्नमरिंदमरिंदम १६ ध नुःपाणिरहंतत्रनिहन्यांविघ्नकारिणः इतिब्रुवंतंसौमित्रिमालिंग्यरघुनंदनः १७ शूरोसिरघुशार्दूलममात्यंतहिते रतः जानामिसर्वंतत्सत्यंकिंतुतत्समयोनहि १८ यदिदंदृश्यतेसर्वंराज्यंदेहादिकंचयत् यदिसत्यंभवेत्तत्रआयासःसफल स्त्वते ५९ भोगामेघवितानस्थविद्युल्लेखेवचंचलाः आयुरप्यग्निसंतप्तलोहस्थजलबिंदुवत् २० ॥ २० ॥

१८ अयतत्रतस्ननपतारणायमंसारानिसत्वप्रदर्शनेनरोषानिवर्तयतिपदिदमितिासर्वंजगत्राज्यंचततःस्वदेहोद्विपादिकंचनसत्यंतथाचा किंकस्यार्थेउपदेष्ययेनैवंरोषःकार्यइतिभावःापदिसत्यमेवतहितेआयासःसफलोभवेतइत्यन्वयः १९ मेघवितानेमेघसमूहःएवंचभोगाभ

यथेति यथा सर्पगलवर्त्तिभेकस्तद्गलवर्त्तिकोमलमांसभोगास्वादमपि मृत्युमजानन्नुन्नतमलमीसदंशानपेक्षते इच्छति तथा कालाहिग्रस्तो
लोको भोगानिच्छतीत्यर्थः २१ करोतीत्येतेनं धनार्जनादिव्यापारं काम्यं वैदिकं कर्म च नन्वत्र कस्य भोगः शरीरस्य उतात्मनः नाद्य इत्याह देहस्त्विति पु
रुषाद्देहव्यतिरिक्तस्यात्मनो जडत्वात्सुखदुःखादिसाक्षात्काररूपभोगस्य तत्रासंभवादिति भावः नांत्य इत्याह को वात्रेति तस्य शुद्धस्वभावत्वेनापरिणामि
त्वात्तस्य भोगासंभवादिति भावः स्वचैतन्ये देहशब्देन चित्तमपि उपलक्ष्यते प्रपापितयोः परस्परं विवेकाग्रहात् चित्तस्य भोगस्तथापि सभ्रांतिमूल

यथा व्यालगलस्थोऽपि भेकोदंशानपेक्षते तथा कालाहिना ग्रस्तो लोको भोगानशाश्वतान् २१ करोति दुःखेन हि कर्मतंत्रं
शरीरभोगार्थमहर्निशं नरः देहस्तु भिन्नः पुरुषात्समीक्ष्यते को वात्र भोगः पुरुषेण भुज्यते २२ पितृमातृसुतभ्रातृदा
रबंध्वादिसंगमः प्रपायामिव जंतूनां नद्यां काष्ठौघवच्चलः २३ छायेव लक्ष्मीश्चपला प्रतीता तारुण्यमंबूर्मिवद् ध्रुवं च
स्वप्नोपमं स्त्रीसुखमायुरल्पं तथापि जंतोरभिमान एषः २४ संसृतिः स्वप्नसदृशी सदा रोगादिसंकुला गंधर्वनगरप्रख्या मूढ
स्तामनुवर्तते २५ ॥ २५

क इति हेयं प्रवर्त्तत इति तात्पर्यं एवं भोगस्यापारमार्थिकत्वमुक्त्वेदानीं वैराग्याय पुत्राद्यासंगस्यास्थिरत्वमाह पित्रिति प्रपा पानीयशा
ला काष्ठौघयोरिव काष्ठौघवत् छायेति प्रतीता निश्चिता एष स्वाभिमानः मम धनादिस्वत्वेन नन्वत्र ममाचिरं भोग इत्यादिः २४ संसृतिः संसा
रस्थितिः स्वप्नसदृशी अल्पकालानुवर्त्तित्वात् तामनुपादेयत्वेन मनुत इत्यर्थः २५ ॥ २५ ॥ २५ ॥ २५ ॥

कथंचिदिति कथमपीत्यर्थः न बुध्यते ममापि जरामृत्यू स्त इति कथमपि न बुध्यते इत्यर्थः २६ स एवेति पूर्वपूर्वभुक्तदिनराज्यपेक्षयोत्तरोत्त
रस्य विशेषमपश्यन् अतो मूढमतिः कालवेगं पूर्वावस्थापहारकं न पश्यति अतो भोगाननुपतति तेष्वासज्जते २७ आमघटस्थपक्व
घटः सपत्नाः शत्रवः २८ आगतप्रायां हं किं मृतो नासीति तर्जयति मृत्युः समयं प्रहर्तुं संप्रतीक्षते महति प्यत्रापि २९ देहे उपचयादिवि

आयुष्यं क्षीयते यस्मादादित्यस्य गतागतैः दृष्ट्वान्येषां जरामृत्यू कथंचिन्नैव बुध्यते २६ स एव दिवसः सैव रात्रिरित्येव
मूढधीः भोगाननुपतत्येव कालवेगं न पश्यति २७ प्रतिक्षणं क्षरत्येतदायुरामघटाम्बुवत् सपत्ना इव रोगौघाः शरीरं प्र
हरन्त्यहो २८ जरा व्याघ्रीव पुरतः तर्जयन्त्यवतिष्ठते मृत्युः सहैव यात्येषः समयं संप्रतीक्षते २९ देहेऽहंभावमापन्नो
राजाहं लोकविश्रुतः इत्यस्मिन्मनुते जन्तुः कृमिविड्भस्मसंज्ञिते ३० त्वगस्थिमांसविण्मूत्ररेतोरक्तादिसंयुतः वि
कारी परिणामी चेद्देह आत्मा कथं वद ३१ ॥

शिष्टे कृमिविड्भस्मसंज्ञिते भूस्थे अग्न्यासंगते जन्तुभिर्भक्षिते विष्ठासंज्ञा दग्धे भस्मसंज्ञा तादृशे देहे देहेऽहंभावमापन्नोऽहं राजेति अस्मिन्नो
के मनुते ३० अथ देहस्यात्मत्वं खण्डयति त्वगिति त्वगादिसंयुक्तत्वाद्विकारी षड्विधानुविकारवांश्च परिणामी बालाद्यवस्थापरि
णामवांश्च आत्मा त्वविकारी अपरिणामी चेति विपरीतः अतस्त्वगादिभिर्युक्त इति भावः ३१ ॥ ३१ ॥ ३१

यस्माद्रागादिदोषसमूहं तेहोषो देहाभिमानिनः प्रादुर्भवंति तस्मात्तं त्यजेति भावः ३१ देहाभिमानस्य रागादिदोषप्रादुर्भावकत्वेन कारणाविद्या
रूपत्वात्स्वरूपमाह देहोहमिति देहस्वरूपलक्षणांतःकरणवृत्तिरविद्येति ३२ संसृतेः संसारमूलस्य रागादिदोषस्य शत्रवइति स्वज
नन्यविद्योच्छेदकत्वाद्विद्याभ्यासे कामादयः शात्रवं कुर्वंतीत्यर्थः ३४ प्रकृतोपयोगितया क्रोधस्यैव मुक्तिविघाते प्राधान्यमाह तत्रापीति पित्रा

पमास्यापमवाह्लोके दुर्खुभिरुतिलक्षणा देहाभिमानिनः सर्वे दोषाः प्रादुर्भवंति हि ३२ देहोहमिति या बुद्धिरविद्या सा प्रकीर्ति
ता नाहं देहश्चिदात्मेति बुद्धिर्विद्येति भण्यते ३३ अविद्या संसृतेर्हेतुर्विद्या तस्या निवर्त्तिका तस्माद्यत्नः सदा कार्यो विद्याभ्यासे
मुमुक्षुभिः कामक्रोधादयस्तत्र शत्रवः शत्रुसूदन ३४ तत्रापि क्रोध एवालं मोक्षविघ्नाय सर्वदा येनाविष्टः पुमान् हंति पितृ
भ्रातृसुहृत्सखीन् ३५ क्रोधमूलो मनस्तापः क्रोधः संसारबंधनं धर्मक्षयकरः क्रोधस्तस्मात्क्रोधं परित्यज ३६ क्रोध ए
ष महान् शत्रुः तृष्णा वैतरणी नदी संतोषो नंदनवनं शांतिरेव हि कामधुक् ३७ ॥

दिवधेन पातित्यप्राप्तेर्वैतरणावधिकीति भावः ३५ मनस्तापः तज्जनकं हननाद्युपायान्वेषणाभिसर्थः ३६ महान् शत्रुः
परिणामे स्वप्राणापहारकत्वात् क्रोध एव यमः साक्षादिति पाठांतरं वैतरणी नदी दुस्तरत्वात् विषयलाभैः कथमप्यनु
पशमात् इति भावः नंदनवनं कामानामुपभोगेन शाम्यति इंधनैः कृष्णवर्त्मेव भूय एवाभिवर्धते इत्युक्तेः नंदनवनमानंदजन

श्री·रा·ग्र·ग्र·
१६

स्ववशीतिमेवने ३८ तेभ्योवैलक्षण्यमेवाहाविकारीनिराकृतिः देहादिरिक्तमाकारइतिभावः ३९ तावदिति स्वहंममेत्यभिमानसत्वादि
तिभावः भिन्नं बुध्यादिभ्यइत्यर्थः ४० बुध्यादिभ्यः त्यप्लोपेपंचमी तदतिरिक्तोहमिति स्वात्मानंतत्वेनत्वमालंत्यवहिर्लोकव्यवहारं
सर्वलोकव्यवहारंलोकवदेवानुवर्तन् स्वकुरु मनस्तुतत्रमाविशः खेदंनकुरु नतुलोकवत्कार्यकारणेनदृत्येतेपुनरसंभाव्येवेत्यतआहभुजानि

तस्माच्छान्तिंभजस्वाघशत्रुरेवंभवेन्नते देहेन्द्रियमनःप्राणबुध्यादिभ्योविलक्षणः ३८ आत्माशुद्धःस्वयंज्योतिरविका
रीनिराकृति यावद्देहेन्द्रियप्राणैर्भिन्नत्वेनात्मनोविदुः ३९ तावत्संसारदुःखौघैःपीड्यन्तेमृत्युसंयुताः तस्मात्वंसर्वदाभिन्न
मात्मानंहृदिभावय ४० बुध्यादिभ्योबहिःसर्वमनुवर्तस्वमाखिदः भुंजन्प्रारब्धमखिलंसुखंवादुःखमेववा ४१ प्रवाह
पतितःकार्यंकुर्वन्नपिनलिप्यते बाह्येसर्वत्रकर्तृत्वमावहन्नपिराघव ४२ अन्तःशुद्धःस्वभावस्त्वंलिप्यसेनचकर्मभिः क
र्तृत्वभोक्तृत्वत्वदृष्टिमावहवैदा ४३ संसारदुःखमखिलंबाध्यसेनकदाचन त्वमप्येवममयादिहेत्यर्थंभावयनित्यदा ४४

तिप्रारब्धमखिलंसुखंदुःखंवाप्रारब्धमित्येवंभुंजन्नतथाभावयन् ४१ प्रवाहपतितोपिसंसारप्रवाहस्थोपिकार्यव्यवहारंकुर्वन्नपि
तज्जन्यपापपुण्याभ्यांनलिप्यतेपृथग्जनोपि एवंचनवतथाभावयतःसर्वथातदलेपइत्याह बाह्यइति ४२ नदेवाह स्तदि

श्रीराम·
१६

समागमे मे पुनः संगमेन एवं भावयंती प्रतीक्षस्वेत्यर्थः ४५ यथा सरितां प्रवाहे पतितानां प्लवानां न सदैकत्र संवासः किंतु क्षणमात्रं तथा कर्म
मार्गे संसारे वर्तमानानां पितृपुत्रादीनामपीत्यर्थः एवं भावनायां चतुर्दशसमाः नक्षत्रादिवृंदगणनाक्रमणार्धवत् स्वल्पकालेनैव समु
मामा भवंतीत्यर्थः ४६ एवं चेत् त्वमनुमत्यागमनेव तत् तदा मम वने सुखलनकः संवासो भविष्यतीत्यर्थः ४७ चिरं यावदनुमतिपर्यं

समागमं प्रतीक्षस्व न दुःखैः पीड्यसे चिरं न सदैकत्र संवासः कर्ममार्गानुवर्तिनां ४५ यथा प्रवाहपतितप्लवानां सरि
तां तथा चतुर्दशसमासंख्याः क्षणार्धमिव जायते ४६ अनुमन्यस्व मां मातर्दुःखं संत्यज्य दूरतः एवं चेत्सुखसंवासो भविष्य
ति वने मम ४७ इत्युक्त्वा दंडवन्मातुः पादयोरपतच्चिरं उत्थाप्यांके समावेश्य पुत्रमाशीर्भिरभिनंदयत ४८ सर्वे देवाः सगंधर्वाः
ब्रह्मविष्णुशिवादयः रक्षंतु त्वां सदा यांतं तिष्ठंतं निद्रया युतं ४९ इति प्रस्थाप्य मघामात समालिंग्य पुनःपुनः लक्ष्मणोऽपि तदा रामं
नत्वा हर्षाश्रुगद्गदः ५० क्वाहं राम मम भ्रांतस्य: संशयो यत्त्वया हृतः पास्यामि पृष्ठतो राम सेवां कृत्वा नदादिश ५१ अनुगृह्णीष्व मां
राम नो चेत्प्राणांस्त्यजाम्यहं तथेति राघवोऽप्याह लक्ष्मणं याहि मा चिरं ५२ प्रतस्थे तां समाधायानुगतः सीतापतिर्विभुः आगतं प
तिमालोक्य सीता सुस्मितभाषिणी ५३

तं अभिनंदयत् अभ्यनंदयत् अडभावश्चार्षः ४८ तदेवाह सर्वे इति सहेत्यस्य विवरणं यांतमित्यादि ५० रामेति पुनरुक्तिर्हर्षातिशयात्
त ५१ ५२ एवं लक्ष्मणमुक्त्वा प्रस्थे मातृगृहादिति शेषः ततस्तामिति प्रियां सीतां समाधायानुविभुर्जगतः पतिः पतः स्वगृहमिति शेषः ५३

श्री॰रा॰अ॰अ॰
११

५४ सेनयाविनाकुत्रयत्त्वमागतोसीसन्तपः कुतः कुतोहेतोर्नदृश्यतेइत्यर्थः वादित्राणिनवाद्यंतेकुतइतिशेषः एवमग्रेपि ५५ सामंतराजेति स
काकोकिमित्यागतइत्यर्थः पर्यायोक्तमलंकारः ५६ ५७ अद्यैवमयास्यामीतिनोमहामोदमित्याह नमिच्छेति ५८ ५९ वरस्वरूपमाह भरता

स्वर्णपात्रस्थसलिलैः पादौप्रक्षाल्यभक्तितः पप्रच्छपतिमालोक्यदेवकिंमेनयाविना ५४ आगतोसिगजःकुत्रश्वेतच्छत्रंचवै
कुतः वादित्राणिनवाद्यंतेकिरीटादिविवर्जितः ५५ सामंतराजसहितःसंयमान्नागतोसिकिं इतिपृष्टःसीतयाश्रीरामःसस्मितम
ब्रवीत् ५६ राज्ञामेदंडकारण्येराज्यंदत्तंशुभेखिले अतस्तस्यालनार्थायप्रणीघ्रंयास्यामिभामिनि ५७ अद्यैवयास्यामिव
नंत्वंतुश्वश्रूसमीपगा शुश्रूषांकुरुमेमातुर्नमिथ्यावादिनोवयं ५८ इतिब्रुवंतंश्रीरामंसीताभीताब्रवीद्वचः किमर्थंनच
राज्यंतेपित्रादत्तंमहात्मना ५९ तामाहरामःकैकेय्यैराज्ञाप्रीतोवरंददौ भरतायददौराज्यंवनवासंममानघे ६० च
तुर्दशमास्तत्रवासोमेकिलयाचितः तयादेस्माददौराजासत्यवादीदयापरः ६१ अतःशीघ्रंगमिष्यामिमाविघ्नंकुरु
भामिनि श्रुत्वातद्राममवचनंजानकीप्रीतिपुता ६२ अहमग्रेगमिष्यामिवनंपश्चात्वमेष्यसिइत्याहमांतिनांगंतुतवरा
घवनोचितं ६३ ॥

येति ६० तयादेस्मायाचितोऽतोमयिपरयापरोपिराजासत्यवादीअवश्यंत्वदुक्तंदास्यामीतिप्रतिज्ञस्यसत्यत्वंकर्तुंमेवनवासंददौ ६१
६२ नोचितं शुद्धस्यतवमयाविनाकार्योसमत्वात् विवाहकालेनानिचरिष्यामीतिप्रतिज्ञातत्वात् ६३ ॥ ६३ ॥ ६३ ॥

श्रीराम
११

वनलयनाभावेहेतुगर्भविशेषणंबहुव्याघ्रेत्यादि ६४ ६५ ६६ फलादिकमपिसमयेदुर्लभमित्याह कालेइत्यादिनदृश्यते वनेषुतृ
णाघाच्छादनात् जनसंचाराभावाच्च पन्थाअपिदृश्यतेतत्रापिशर्करायन्वितः ६७ वासस्थानमप्यतिदुःखजनकमित्याह गुहेत्यादि सम्य

॥ तामाहराघवःप्रीतःस्वप्रियांप्रियवादिनीं कथंवनंत्वांनेष्येहंबहुव्याघ्रमृगाकुलं ६४ राक्षसाघोररूपाश्चसंतिमानुषभोजिनः
सिंहव्याघ्रवराहाश्चसंचरंतिसमंततः ६५ कटुम्लफलमूलानिभोजनार्थंसुमध्यमे अपूपानिभोजनानिविद्यंतेनकदाचन ६६
कालेकालेफलंवापिविद्यतेकुत्रसुंदरी मार्गोनदृश्यतेक्वापिशर्कराकंटकान्वितः ६७ गुहागह्वरसंबाधंसिल्लीदंशादिभिर्यु
तं एवंबहुविधंदोषंवनंदंडकसंज्ञितं ६८ पादचारेणगंतव्यंशीतवातातपादिमत् राक्षसादीनवनेवनेदृष्ट्वाजीवितंहास्यसे
चिरात ६९ तस्माद्गृहेतिष्ठशीघ्रंद्रक्ष्यसिमांपुनः रामस्यवचनंश्रुत्वासीतादुःखसमन्विता ७० प्रस्फुरद्वक्त्राकिं
चित्कोपसमन्विता कथमापिच्छसेत्यक्तुंधर्मपत्नींपतिव्रतां ७१

कबाधंतेपिपवोयन्नेतिसंबाधंदुर्गंवासस्थानंगुहागह्वररूपंतद्यद्यपिपिपीलिकारहितंतथापिझिल्लीदंशादियुतत्वात्तत्रस्थातुमशक्यमि
तिभावः ६८ तत्रापिपद्भ्यांगमनमतिदुःखमित्याह पादेति ६९ ७० स्फुरद्वक्त्राअंतर्गतक्रोधवशान्नेत्रस्फुरणं यदेवाहकिंचित्कोपसमन्वि
असंयोगेहेतवोधर्मपत्नीत्यादयः ७२ ॥ ७१ ॥

पतिव्रतात्वमेवोपयास्यसि त्वदनन्यमिति त्वत्तोन्यः पुरुषो न विद्यते यस्यास्तां यद्वा त्वत्तो भेदरहितां शक्तिशक्तिमतोरभेदात् अतएवादौ सा यापि रक्षोघर्षणा विधीषिकासापि मिथ्येत्याह लक्ष्मीपेइति पत्नावममरशेनाराज्ञीमिपल्लापेतेत्युत्तरेणान्वयः ७२ यदपि फलादीनां कदुत्वाद्युक्तं तत्परिहरति फलेतिलभुक्तावशिष्टं विषसत्वादमृततुल्यमित्यर्थः रमामीत्यार्षं परस्मैपदं ७२ चरत्यामारुहयामप्रवनत्वं तगमवहेतुरितिभाव ७४ कार्यसाधिनी

त्वदनन्यामसेषामांधर्मतोसिदयापर त्वत्समीपेस्थितांराम कोरामांधर्षयेदने ७२ फलमूलादिकंमयत्नवभुक्तावशेषितं तेदेवा मृततुल्यंमेनेनतुष्टारमाम्यहं ७३ त्वयासहचरंत्यामेकुशाः काशाश्चकंटकाः पुष्पास्तरणतुल्यामेभविष्यंतिनसंशयः ७४ अहंहता क्लेशयैनेवभवेयंकार्यसाधिनी बाल्येमांवीक्ष्यकश्चिद्धिज्योतिः शास्त्रविशारदः प्राहतेविपिनेवासः पत्यासहभविष्यति सत्यवादीहितेनोभूयाद्गमिष्यामित्वयासह ७६ अत्किंचिस्त्वंस्यामिक्षत्वामोनयकानन रामायणानि बहुशः श्रुतानि बहुभिर्द्विजैः ७७ सीताविनावनंरामोगतःकिंकुत्रचिद्वद अतस्त्वयागमिष्यामिसर्वथात्वत्सहायिनी ७८ यदिगच्छसिमांत्यक्त्वा प्राणांस्त्यक्ष्यामितेग्रतः इतितंनिश्चयंज्ञात्वासीतायारघुनंदनः ७९

रक्षोवधादिकार्यसाधिकेतिअंस्पंवनगमनंचमेवश्यंभावीनिइतिहासकथनेनद्युवयति बाल्येइति ७५ ७६ ७७ तत्सहायिनी मत्स्याधादिसर्वकार्येष्वहमेववनेसहायेतिअर्थ्य ७८ ७९ ॥ ७९ ॥ ७९ ॥ ७९ ॥ ७९ ॥ ७९

गच्छमंतं कुरुत स्तनेनतपस्विवेवेषेरगहमादीनां कंचित्कालमपनमावयकं तत्र सर्वस्यलेशस्याप्यसंभावनासत्वाच्चिरपापंस्यानं ब्राह्मणो मुदानमित्या
हा कथमस्यैइति वसिष्ठपत्न्यै यत्रस्थापितमेतद्दहायापोर्पिलभ्यमितिभावः ८ वयमपि तथैव कुर्मइत्याह ब्राह्मणोभ्यइति ८१ स्कनेवेदाश्च

अब्रवीद्देवि गच्छत्वं वनं शीघ्रमयसह अर्पयस्वैषयच्छाशु हारानाभरणानिच ८० ब्राह्मणाभ्योधनंसर्वंदत्वागच्छामहेवनं
इत्युक्तालक्ष्मणोनाम्नुहिज्ञानहृष्टमक्तितः ८१ ददौगवांहेदशतं धनानिवस्त्राणिदिव्यानिविभूषणानिकु ंडुवबद्धः कृत
शीलवद्भ्यो मुदाहिजेभ्योरघुवंशकंतुः ८२ अर्पयंसीदेहोसीतासुरव्यान्याभरणानिच रामोमातुःसेवकेभ्योददौधनेनेकधा
८३ सकांतःपुरवासिभ्यःसेवकेभ्यस्तथैवच पौरजानपदेभ्यश्च ब्राह्मणेभ्यः सहस्रशः ८४ लक्ष्मणोपिसुमित्रांतुकौश
ल्यायैसमर्पयत् धनुःपाणिःसमागत्यरामस्याग्रेव्यवस्थितः ८५ रामःसीतालक्ष्मणाश्चजग्मुःसर्वेनृपालयं ८६ श्रीरा
मःसहसीतयानृपपथंगच्छच्छनैः सानुजःपौरान्जानपदान्कुतूहलदृशःसानंदमुद्वीक्ष्यतन् ष्यामः कामसहस्रसुंदरव
पुःकांत्यादिशोभासयन्पादन्यासपवित्रिताखिलजगत्त्रापालयंपतमिनुः ८७ इतिश्रीअयोध्याकांडे ४ ॥ ८ ॥

यतं कुंदेववत्वमिदं चलनपात्रतां संपादकं विशेषणं ८२ मातुःसेवकेभ्योदानमाह स्नेहेन ८३ ८४ समार्पयततनरस्य ध्याह्याहारः समाग
त्यरामस्याग्रेस्थितइत्यन्वयः ८५ ततःरामइति ८६ नृपपथेराजमार्गे कुतूहलवपश्यतितान्कुतूहलदृशःपौरान्सानंदंपश्यन्ततेनतेषा
दुःखनिरासः पितुस्तत्र कैकेय्याधिष्ठितं आलयं गृहं प्राप ८७ ॥ ८७ ॥ ८७ ८७ ॥ ८७ ॥ ८७ ॥

म

श्री.रा.स्त्र.स्त्र.
१९

इति श्रीमत्सकलसज्जनविपदुद्धरणसमर्थैश्वर्यादिविरुदावलिविराजमानस्वहिम्मतिवर्मणाः स्वत्रय श्रीरामवर्मणाः कृतायां रामायणे सेनोद्य
योध्याकांडे रामायणस्वरसंवादे चतुर्थः सर्गः ४ सज्जानकि जानक्या सहिते लक्ष्मणेन समपायातमित्यन्वयः तादृशं दृष्ट्वा परस्परं वीक्ष्योचुः
परस्परमित्येव १ सत्यसंधं सत्यप्रतिज्ञे २ च्युत्वा वनवासमाज्ञापितवान् समस्तवन्तास्ते रामोल्लोपश्च्याः कैकेयीवाक्यमत्येन रामे

श्वापीतं नागरादश्वामार्गे रामं सज्जानकिं लक्ष्मणेन समं वीक्ष्य ऊचुः सर्वे परस्परं १ कैकेय्या वरदानादिकं श्रुत्वा दुःखसमाकुलाः
बत राजा दशरथः सत्यसंधं प्रियं सुतं २ स्त्रीहेतोरत्यजत्कामी नस्य मत्स्य बतां कुतः कैकेयी वाक्य दुष्टार्थं समस्ता प्रियंकरं
३ विवासयामास कथं कुरकमीतिमूढधीः हे जनानाव्रवस्त्यगच्छामो घोरं काननं ४ यत्र रामः सभार्यश्च सानुजो गन्तुमि
च्छति पश्यत जानकी सर्वे पादचारेणागच्छती ५ पुष्पिः कदाविदृष्टा या जानकी लोकसुंदरी सापि पादेन गच्छती जनसं
घेषु नीदृता ६ रामोऽपि पादचारेण राजास्वादिविवर्जितः गच्छति दृश्यपथ विधुं सर्वलोकैकसुंदरं ७ ॥ ७ ॥ ७

पीतिमती कथं दुष्टा जातेति शेषः यद्वा तस्य राज्यं रामस्य वनवासं च दत्तवतीति भावः पाचतीवाललोभाद्भरतस्य राज्यं राममुच्यमानगुणं कु
कुतो हेतोर्विवासयामास त्रेहे तेनु न पश्यामः स्त्रीतानिष्य पोज नदुष्टत्वज्ञानबत्यस्मिन् देयो न वस्तव्यमित्याहुः हे जनाश्शिति ४ यत्र कान
ने यत्संपत्त्विति तेन सर्वथा दैवप्राबल्यं ज्ञानं वित्तिं तत्त्र्यं ५ नहे के श्वपादचारिणि पुष्पिरिशि गच्छतीत्यस्य दृश्यतामिति शेषः ६ दृश्यपथस्य
स्याप्युक्तं अस्पृश्य तात्पर्यं ७

श्रीराम.
१९

राक्षसीति यत्कृत्सावामस्युस्त्ववनवासादिकृतदुःखाभावेपिसीतायाःपादगमनकृतंदुःखंतस्यापिभवेदित्यन्वयः ८ उपसंहरंति
बलवानितिपर्यायोक्तमत्रालंकारः साधूनांहृदेसमूहे ९ तत्वतः तेषांतत्ववक्षीस्मर्थः १० पूर्णोजडेभ्यः विष्णुर्व्यापकः वैकुंठनिलयो
वा आदिपन्नारंजीवसमूहस्तद्रूपोहिरण्यगर्भस्तस्याप्ययनःपरायणः वेदलाभहाराकृस्यादिसामर्थ्यदः योगमायायोगेनसर्वसंवेधेता

राक्षसीकैकयीनाम्नीजातासर्वविनाशिनी रामस्यापिभवेत्तदुःखंसीतायाःपादयानतः ८ बलवानपिधीरेवाऽवनुग्रपलो
हिदुर्बलः इतिदुःखाकुलेहृदेसाधूनांमुनिपुंगवः ९ अब्रवीद्धामदेवोथसाधूनांसंघमध्यगः मानुषोवरामेवासीतावाच्चिंत
त्वतः १० एषरामःपरोविष्णुरादिनारायणःस्मृतः एषासाजानकीलक्ष्मीर्योगमायेतिविश्रुता ११ अमीशेषस्तमत्वेतिल
क्ष्मणाख्यस्समागतः एषमायागुणैर्युक्तस्तदाकारवानिव १२ एषएवरजोयुक्तोब्रह्माभूद्विश्वभावनः सत्वाविष्टस्तथाविष्णु
स्त्रिजगत्प्रतिपालकः एषरुद्रस्तामसोंतेजगत्प्रलयकारणं एषमत्स्यःपुराभूत्वाभूत्वाभक्तैवेवस्वतंमनु २४ नाम्नारोप्यल
यस्यांतपालमासागरैः समुद्रिमथनेपूर्वमंदरेसुतलंगते २५

परिच्छिन्नमपिमातिपरिच्छिन्नंत्रिसम ११ एषमायेति एतेनमायिकएवायमाकारोनतुपांचभौतिकइत्युक्तं १२ मायागुणैस्तत्त
दाकारवत्तमेवविहरणोतिएषएवेति विश्वभावनोविश्वस्रष्टा १३ १४ लयस्यांते लयस्य दैनंदिनप्रलयस्यअंतेरामाभिप

अद्रिं मंदरं यातापेत्यादिः प्रलयेमकरस्तदेत्यादिः १६ १७ तद्रक्षःशल्यादप्यौर्वकं रक्षःपुत्रराज्यं इंद्रराज्यं दत्तं बलिना १८ याच्ञया बलेः सकाशाद्विक्रम्यात्मजेनाहृतं परशुरामेणेत्यर्थः १९ २० तस्य रावणस्य नन्वेवं दशरथगृहे गावो नारकरणे किं वीजं तत्राह रामेति २१

आधारयत्तत्पृष्ठे द्विकूर्मरूपी रघूत्तमः महीरसातलं याता प्रलये सूकरोऽभवत् १६ तोलयामास दंष्ट्राग्रे तां क्षोणीं रघुनंदनः नारसिंहं वपुः कृत्वा प्रह्लादवरदः पुरा १७ त्रिलोककंटकं रक्षः पाटयामास तन्नखैः पुत्रराज्यं हृतं दृष्ट्वा अदित्या परितापितः पुरा १८ वामनत्वमुपागम्य याच्ञया चाहरत्पुनः दुष्टक्षत्रियभूपालान्निहंतुं भार्गवोऽभवत् १९ स एव जगतां नाथ इदानीं रामतां गतः रावणादीनि रक्षांसि कोटिशो निहनिष्यति २० मानुषेणैव मरणं तस्य दृष्टं दुरात्मनः राज्ञा दशरथेनापि तपसाराधितो हरिः २१ पुत्रत्वाकांक्षया विष्णोस्तदा पुत्रोऽभवद्धरिः स एव विष्णुः श्रीरामो रावणादिवधाय हि २२ गतोऽद्यैव वनं सम्यो लक्ष्मणोऽनुगतो युवा एषा सीता हरेर्माया सृष्टिस्थित्यंतकारिणी २३ राजा वा कैकयी वापि नात्र कारणमण्वपि पूर्वेद्युर्नारदः प्राह भूभारहरणाय वै २४ रामोऽप्याह स्वयं साक्षाच्छ्वो गमिष्याम्यहं वनं अतो रामं समुद्दिश्य चिंतां त्यज यथा बालिशाः २५ ॥ २५ ॥ ३०

पुत्रत्वाकांक्षया विष्णोरिति विष्णुर्मे पुत्रो भवत्विति तच्छेपेत्यर्थः २२ २३ नारदः प्राह भूभारहरणोद्देशकं ब्रह्मणः संदेशं वचनमित्यर्थः
२४ ॥ २५ ॥ २५ ॥ १५ ॥

रामोदुःखितोभविष्यतीत्यपिनशंक्याशंकैवेत्याह रामेति मृत्युभयाद्येतदभयाभावः कैमुतिकन्यायसिद्धः तल्लाभजपकर्तुस्तत्वज्ञा
नोदयोक्तिभावः २६ तस्यदुःखशंकाकेत्यन्वयः कलौनानाम्नैवनामाभिलापेनैवमुक्तिस्तज्ज्ञानकेतत्वज्ञाने नान्येनयोगादिनेत्यर्थः
२७ ईदृशस्यकिमर्थोदेहपरिग्रहस्तत्राह मायेत्यादि विडंबयति स्त्रीपाचारेणसदाचारंलोकान्शिक्षयतिमातापित्रोरपुत्रानिव

रामरामेतियेनित्यंजपंतिमनुजाभुवि तेषांमृत्युभयादीनिनभवंतिकदाचन॥२६ किंपुनस्तस्यरामस्यदुःखशोकौ
महात्मनः रामनाम्नैवमुक्तिःस्यात्कलौनान्येनकेनचित् २७ मायामानुषरूपेणविडंबयतिलोककृत भक्तानांभज
नार्थायरावणस्यवधायच २८ रत्नस्याभीष्टसिद्ध्यर्थंमानुषंरूपमाश्रितः इत्युक्त्वाविससर्जाथरामदेवींमहामुनिः २९
ज्ञात्वातेपिद्विजाः सर्वेरामतत्वंहरिंविभुं जहुस्तत्संशयग्रंथिंराममेवान्वचिंतयन् ३० यइदंचिंतयेन्नित्यंरहस्यंराममसी
तयोः तस्यरामेदृढाभक्तिर्भवेद्विज्ञानपूर्विका ३१ रहस्यंगोपनीयंवोयूयंवैराघवप्रियाः इत्युक्त्वाप्ययपौविप्रस्तेपिरा
मंपरंविदुः ३२ ततोरामःसमाविश्यपितृगेहमवारितः सानुजःसीतयागत्वाकैकेयीमिदमब्रवीत ३३ ॥ ३३ ॥

फलांतरमप्याह भक्तानामिति २८ रत्नाभीष्टं विष्णोःस्वपुत्रत्वं २९ तत्संशयग्रंथिं तद्विविधमानंरामेमनुष्यत्वादिविषयं
यंकैकेय्यादिविषयंसंशयग्रंथिं ३० ३१ गोपनीयं दृष्टजनेष्विति शेषः ३२ अवारितः पुनस्त्वाद्वारपालैरितिशेषः गत्वाकैकेयी
समीपमितिशेषः ३३ ॥ ३३ ॥ ३३ ॥

तेसुमंत्र वनं दंडकारण्यं गंतुं कृतनिश्चयो निश्चितात्मा इत्यन्वयः आज्ञापयतु पितेत्यनेन तदाज्ञां विनागमनेन स्वदुःखाशंका इहेतो भाकस्या
मितिसूचितं ३४ इत्युक्ता रामेण कैकेयी स्वयमेवाहरति उत्थायेत्यादि रामायेत्यन्वयः चीराणि दत्त्वा परिधेयानि वल्कलादीनि जीर्णानि वा

आगतास्मि वधं मा तत्स्वयमेतत्सुमंत्र वनं गंतुं कृतनिश्चयः शीघ्रमाज्ञापयतु नः पिता ३४ इत्युक्ता सहसोत्थाय चीराणि प्र
ददौ स्वयं रामाय लक्ष्मणाय च सीतायै च पृथक्पृथक् ३ रामस्तु वस्त्राण्युत्सृज्य वन्यचीराणि पर्यधात् लक्ष्मणो
पि तथा चक्रे सीता तत्र विजानती ३६ हस्ते गृहीत्वा रामस्य लज्जया मुखमैक्षत रामो गृहीत्वा तच्चीरमुपर्यावेष्टयत्
३७ तदृष्ट्वा रुरुदुः सर्वे राजदाराः समंततः वसिष्ठस्तु तदाकर्ण्य हृदि तप्तमतल्पयन्नूषा कैकेयीमाह दुर्मते राम एव त्वया
दत्तः वनवासाय दुष्टे त्वं सीतायै किं प्रयच्छसि ३९ यदि रामं समन्वेति सीता भक्त्या पतिव्रता दिव्याम्बरधरा नित्यं सर्वा
भरणभूषिता ४० रमयत्वनिशं रामं वनदुःखनिवारिणी राजा दशरथोप्याह सुमंत्र रथमानय ४१ रथमारुह्य
गच्छंतु वनं वनचरप्रियाः इत्युक्त्वा राममालोक्य सीतां चैव सलक्ष्मणं ४२ ॥

३५ ततश्चीरपरिधानप्रकारस्वरूपं ३६ हस्ते गृहीत्वा चीरमितिशेषः तच्चीरं कैकेयीदत्तं चीरं ३७ भर्त्सयन् कैकेयीमितिशेषः
३८ किं प्रयच्छसि चीरमितिशेषः ३९ यदीति त्वद्वराविषयभूतायि यदि स्वेच्छया समन्वेति सम्यक् रक्षानिरहितमनु पश्चाद्गच्छतीत्य
र्थः ४० वनदुःखं वनवासजदुःखं ४१ वनचरा मुनयः प्रिया येषां ते ४२

पालयामास धर्मज्ञः सुमंत्रेण समन्वितः ५२ सोऽराः सर्वे समागत्य स्थित्वा तस्या विहरतः शक्ता रामं पुनः स्तुत्वो चेव्रजाम हे वनं ५३ इति निश्चय माज्ञाय यत्ते रामोप्नि
तः नाहं गच्छामि नगरमेते वै क्लेशभागिनः ५४ भविष्यंतीति निश्चित्य सुमंत्रमिदमब्रवीत् इदानीमेव गच्छाय सुमंत्र रथमानय ५५ इत्याज्ञप्तः सुमंत्रोपि रथमाहेरयो
जयत् आरुह्य रामः सीता च लक्ष्मणो मितमुर्हुते ५६ अयोध्याभिमुखं गत्वा किंचिद्दूरं ततो ययुः ते पिरामम दर्शनेवशा तस्याप दुःखिताः ५७ रथनेमि गतं मार्ग
पश्यंतस्ते पुरं ययुः तद्दिनं सुसीतं तेध्यायंतःपुरात्स्वं ५८ सुमंत्रोपि रथं शीघ्रं नोदयामास सादरं स्फीतान् जनपदान् पश्यन् रामः सीतासमन्वितः ५९ गंगातीं

सीताशीघ्रमारोहेत्यनेन तस्याः कार्यसाधकत्वाहः सूचितः ४३ ४४ ४५ रथमनोदयत् राज्ञा राम आधीनीकृतत्वाद्राज्ञाज्ञापेक्ष
यातराशैव प्रबलेति मत्वेति कंप्य हृद्गते दृष्टिपथमतिक्रांते ४६ हेहाहस्मस्यज्ञानवृद्धाइत्यर्थः ४७ राममातुरित्यादरसूचकं

दुःखान्निपतितो भूमौ रुरोदाश्रुपरिप्लुतः आरोहरथं सीताशीघ्रंराम स्ययशस्वतः ४३ रामः प्रदक्षिणं कृत्वा पितरं रथ
मारुहत् लक्ष्मणः खङ्गयुगलं धनुस्तूणीयुगं तथा ४४ गृहीत्वा रथमारुह्य नोदयामास सारथिं तिष्ठ तिष्ठ सुमंत्रेति रा
जा दशरथोऽब्रवीत् ४५ गच्छ गच्छेति रामेण नोदितोचोदयद्रथं रामे दूरं गते राजा मूर्छितः प्रापतद्भुवि ४६ यौराः सबाल
भिमानवगमान्नकर्मभिर्लिप्यसेसोभिमानस्वकर्मलेपकइतिभावः ६८ ६९ ७० स्याप्यस्थापपितान्क्षेषोत्मिवृ ७१ राज्ञोपचारैः राजोपभोग्यैः पुष्पादिभीरामभिर्वते
इत्यपित्वेत्यर्थः ७२ भरस्यापि रामव्रततत्वमापफलेतिदांतोजितेंद्रियः ७३ ७४ ७५ वत्समुनिः महर्षि ७५ रामश्चित्रकूटाद्रौमुनिभिः सीतयालक्ष्मणेनाहेवस

सुखदुःखाद्यनुगतंजानंतिनतुतत्वतः दिष्ट्यामद्गोचरंतातनं उसन्नंतेभवापहं ६७ स्मरंतीतिसप्तमवनेलिप्यसेनचकर्मभिः उत्पन्नकाशापरिक्रम्यरा
मसानंदविस्मया ६८ भरतास्यशातशोधूमोयथौगेहमुदान्विता भरद्वाजसहामात्यैमोहभिरेहाराम्तह ६९ अयोध्यामगमच्छीघ्रंरामभेवानुचिंतयन्
घोरजानपदान्सर्वान्स्वेस्वेमोध्यापाप्रुइधीः ७० स्थाप्यपित्वायथाम्यायंनेदिग्रामेयथौस्वयं जवसिंहासनेनिस्तंपादुकेस्थाप्यभक्तितः ७१ पूजयित्वा
यथारामांधवपुष्पाक्षतादिभिः राज्ञोपचारैरखिलैःप्रत्यहंनियतव्रतः ७२ फलमूलाशनोदांतोजटावल्कधारकः अधशायीब्रह्मचारीशत्रुघ्नस
हितस्तदा ७३ राजकार्याणिसर्वाणियावंतिपृथिवीतलेतानिपादुकयोःसम्यक्निवेदयतिराघव ७४ गणयन्दिवसान्येवरामागमनकांक्षया
स्थितोरामार्पितमनाःसाक्षाद्ब्रह्ममुनिर्यथा ७५ रामस्तुचित्रकूटाद्रौवसन्मुनिभिरावृतः सीतयालक्ष्मणेनापिकिंचित्कालमुपावसत् ७६ ना
गराश्चसदायांतिरामदर्शनलालसाः चित्रकूटस्थितंज्ञात्वासीतयालक्ष्मणेनच ७७ दृष्ट्वातज्जनसंबाधंरामस्त्यक्त्वातंगिरिं दंडकारण्यमने
कासरायमनेकार्यमप्यनुचिंतयन् ७८ अन्वगात्सीतयाभ्रात्रात्त्वेनराश्रममुत्तमं सर्वत्रसुखसंवासंजनसंबाधवर्जितं ७९ गत्वामुनिमुपासीने
भासयंतंतपोधनं दंडवत्प्रणिपत्याहरामोहमभिवादये ८० पितुराज्ञांपुरस्कृत्यदंडकानहमागतः वनवासमिषेणापिधन्योहंदर्शनात्तव ८१ अ
न्वपिकिंचित्कालमेवोपावसदित्यन्वयः एवमग्याध्याहारेणबहु त्वारामस्यवचनंरामज्ञात्वाहरिंपरं पूजयामासविधिवद्भक्त्यापरमयामुनिः ८२ ॥०

कालमित्यर्थः ७६ तवहेतुमाहनागराश्चेतिलक्ष्मणेनचेतिशेषः ७७ कार्यंरावणवधरूप ७८ जनसंबाधवर्जितंनागरजनसंबाधहीनं ७९ गत्वाश्र
माश्रममितिशेषः अचिंदंडवत्पाप्रणामोहमितिभिवादयेइत्याहेत्यन्वयः ८० अस्मादागत्यापित्वद्दर्शनेनाहंधन्यः किंवक्तव्यंत्वद्दर्शनोद्देशेनैवागतोध
न्यइति ८१ परंहरिंस्वतनयामिहरूपंउपासनाभिस्तन्मात्रमयेनताक्षाघवक्षेदाभपरमिति ८२ ॥ ८२ ॥ ८२

श्रीराम.
३७

श्री.रा.अ.अ.
३८

ल इन्स यां चैवे निदृस्वे ति शेषः वाक्यमब्रवीत् रामम् इति शेषः ८३ अतीव संहृष्टा अत्यंतहृष्टतया धर्मेच तत्स्वाधर्मे प्रिया ८४ ८५ सीता रामवचने
न तथा अवश्यमितंसगीहूस तथाकरोत् तत्समीपगमनस्करोत् ८६ सीतेइति छेदः संधिरार्षः ८७ भक्तिसंयुता साक्षाद्दीश्वरी यमिभक्तिमती

वन्यैः फलैः श्वनातिथ्यमुपविष्टं रघूत्तमं सीता च लक्ष्मणं चैवं संतुष्टो वाक्यमब्रवीत ८३ भार्यामेतीव संहृष्टा
त्वनसूयेति कृता नवप्रवृत्तीसुचिरं धर्मज्ञा धर्मवत्सला ८४ अत्र तिष्ठनिताः सीता पत्युत्वरि निषूदन तथेति
जानकीं प्राह रामो राजीवलोचनः ८५ गच्छ देवीं नमस्कृत्य शीघ्रमेहि पुनः शुभे तथेति रामवचनेन सीता चापि
तथाकरोत् ८६ देदृत्वयतितामम्बे सीतां दृष्ट्वाति तुष्टधीः अनसूयाममालिंग्य वत्से सीतेति सादरं ८७
दिव्ये देहे कुण्डले हे निर्मिते विश्वकर्मणा दुकूले द्वे रदौ तस्यै निर्मले भक्तिसंयुता ८८ अङ्गरागं च सी
तायै ददौ दिव्यमशुभाननां नत्यक्ष्यते ऽङ्गरागेण शोभा त्वां कमलानने ८९ पातिव्रतं समाश्रित्य राममन्वे
हि जानकि कुशली रामतोपातु त्वया सह पुनर्गृहं ९० भोजयित्वा यथा स्यायें राम सीता समन्वितं लक्ष्मणा
चेतसा मंत्रुनः प्राह कृतांजलिः अविक्र० रामत्वमेव भुवनानि विचार्यैते वामरक्षणाय सुरमानुषतिर्यगादी
न देहान्विभर्षि च न देहगुणो विलिप्तः त्वत्तो बिभेत्यखिलमोहकरी च माया ९१ इति श्रीमद्ध्यात्म०

८८ नत्यक्ष्यते कदाचिदपीति शेषः ८९ अथ पिशिस्यति पातिव्रत्यमिति आथाशिषमाह कुशलीति ९० ॥

श्रीराम.
३८


इतिअयोध्याकांडसंपूर्णपत्रें २८

श्रीआरण्यकांडप्रारंभः

श्री.रा.व्या.
१

श्रीगणेशाय नमः ॥ अथ त्रिदिनं दिनकोपं १ प्रवरं दंडकं विपिनं मुनिमंडलमंडितं व्रजाम हे लमाज्ञातुं क्षान्तकं तुं २ ३ मार्गद्रष्टा मार्गदर्शपि
तालोकानुसारिणः लोकाचरज्ञत्वं नाध्यतः ४ शरिवः निवर्त्तध्वमिति प्रार्थितः ५ ६ ७ ८ रामाभिनंदिताः रामेणानंदपूर्वकं गच्छतेति दत्ता तु

अथ तत्र दिनं स्थित्वा प्रभाते रघुनंदनः स्नात्वा मुनिसमामं
त्रितः विपिनं दंडकं प्रवरं समाज्ञातुमिहार्हसि १ मा
वनं प्रकृत्स्वा विर्महापशाः २ सर्वस्य मार्गद्रष्टा त्व
मारिणः ४ इति शिष्यान् समादिश्य पृष्ठस्य पंक्तिं
वर्जयपो ५ क्रोशमात्रं ततो गत्वा ददर्श महतीं नं
६ नद्याः संतरणे कश्चिदुपायो विद्यते न वा ऊचु
श्चामहे उष्णां त्वयमेव सृणोदहं ततो नाविसमारो
ही मुनिकुमारकाः रामाभिनंदिताः सर्वे जग्मुः स्वं स्वमाश्र
मृगगणाकीर्णं सिंहव्याघ्रादिभीषणं १० राक्षसैर्घोररू
मब्रवीत ११ ततः प्रभृत्य लोकानां तव्यसहितेन मे धनुर्गुणेन



अथ प्रस्थानायोपचक्रमे १ मुने गच्छामहे सर्वे मुनिमंडल
मार्गदर्शनार्थाय शिष्यान् आज्ञप्तुमर्हसि स्कन्दोरामस्य व
तवत्कां मार्गदर्शकांस्तथा प्रदर्शयिष्यंति तव लोकानु
चितमन्वयान् रामेणानानुरितः श्रीमानत्रिः स्वप्र
दी[illegible]नुनैः शिष्यान् उवाच दशमोराजीवलोचनः
स्वेति विघ्नतो लोकानुभूतःस्य रघुनंदन ७ तारि
ण्यमी तां राघव लक्ष्मणो ८ श्रुत्वामुनेस्तारण्या मामुने
मं ९ ताचेत्ता विपिनं घोरं झिल्लिसंकारनादितं नाना
पेक्षमेघिनं गोमहधशा प्रविश्य विपिनं घोरं रामो लक्ष्मणं
संभोज्य शरान् अपि कोरदधन् १२ ॥ १२ ॥ १२

मतयः ९ झिल्लिझंकारोऽतिस्वरा हः १० ११ सहितेन मुवाभ्यां मिलितेन गंतव्यमित्यर्केति दोषः स्वप्त अदर्शदिस्सर्यः १२ ॥ १२ ॥ १३

श्रीराम.
२

साहित्यप्रकारमेवाहायेइतिष्वात्मपरात्मनोर्जीविशयोर्मध्यशास्त्राश्रयत्वविषयत्वाभ्यांसंबद्धामापेवेत्सर्थः १३ दृष्ट्वाप्रपन्नाकुलैनेःस्वचिंतनन्तुव्याकुलनादिषु
कोविश्वासस्तत्राह एतत्पूर्वमितिदंडकारण्यप्रवेशकृषीणांमुखात्कृतरक्षोभयविघ्नेशाकुलैनेश्रुतंनिश्चितमित्सर्थः १४ कल्हारशीतोदकादिपुष्कराएकापुष्क
रणीतत्रास्ते १५ माडोभयमानांतेभ्यदृश्यतेत्सर्थः १६ महासत्वमहाशरीरंप्राशिन १७ करालदंष्ट्रापुष्पवदनंयस्यततवामांसेवामस्कंधेन्यस्ताः मूलायेयथि

अग्रेयास्यामहंपश्यात्वमन्वेहिधनुर्धरः आवयोर्मध्यगासीतामायेवात्मपरमात्मनोः १३ चक्षुश्चारयतर्वत्रदृष्टुरक्षोभयमहत् वि
घ्नेतेदंडकारण्येएतत्पूर्वमश्रुतम् १४ इत्येवंभाषमाणौतौजग्मतुःसार्धयोजनं तत्रैकापुष्करिण्यासीत्कल्हारकुसुदोत्पलैः १५ अंबु
जैःशीतलैर्देवशोभमानांददृशतुः तत्समीपमथागत्वापीत्वानत्सलिलंशुभं १६ कृष्णलेमहिलाभ्याशेस्थछायामुपाश्रिताः
तत्रोदद्दृशुराघांतमहासत्वंभयानकं १७ करालदंष्ट्रवदनंभीषयंतंस्वगर्जितैः वामांसेन्यस्तशूलाग्रग्रथितानेकमानुष १८ भ
क्षयंतंगजव्याघ्रमहिषंवनशोचरं ज्यारोपितंधनुर्धृत्वारामोलक्ष्मणमब्रवीत् १९ पश्यभ्रातर्महाकायोराक्षसोयमुपागतः आयात्यभि
मुखंनोद्यभीरूणांभयमावहन् २० सज्जीकुरुधनुःक्षिप्रंमाभैर्जनकनंदिनि इत्युक्त्वाराममायान्यस्थितोरामइवाचलः २१ सतुदृ
ष्ट्वाम्यनाथंलक्ष्मणंजानकीतदा अट्टहासंततःकृत्वाभीषयन्निदमब्रवीत् २२ ॥

तांश्चानेकमानुषान्येनतत् १८ गजव्याघ्रमहिषमितिसमाहारद्वंद्वः ज्यारोपितायस्मिन्नत १९ अयंसंमुखदेशेवर्तमानोऽस्मदभिमु
खमायातिभीरूणांभयमावहन्निदानेनवास्माकंभयमितिध्वनितं २० अचलइवरामःस्थितइत्सन्वयः २१ ॥ २२ ॥ २२ ॥

श्री.रा.स्त्रा.
२

२३ वक्त्रप्रविष्टकवलोपमाविस्मेनेनस्तुकारवधंतद्धनपयपिमात्मादुष्टाहिस्वनीशः २४ २५ २६ २७ २८ जीवितुमिच्छामित्युवचोऽशिति
शेषः सीतांप्रपलायतेनचेभ्दशया मीसन्वयः २९ ३० ३१ ३२ सर्पइवेतिउभसेवेतिभावः ३३ रुधिरेणेघशात्महतत्क्षित्रोभूतलेपपातेत्यन्वयः

कौपुत्रंवाबाणतूणीरजटावल्कलधारिणौ मुनिवेषधरौबालौस्त्रीसहायौसुदुर्मदौ २३ सुंदरीवनमेवक्त्रप्रविष्टकवलोपमौ
किमर्थमागतौघोरेवनेव्यालनिषेविते २४ श्रुत्वारक्षोवचोरामःस्मयमानउवाचतं अहंरामस्तथंभ्रातालक्ष्मणोममसेमतः
२५ एषासीताममप्राणाल्लभावयमागताः पितृवाक्यपुरस्कृत्यशिक्षणार्थंभवादृशां २६ श्रुत्वातद्रामवचनमट्टहासमथा
करोत् व्यादायवक्त्रंबाहुभ्यांमूलमादायसत्वाः २७ मानज्ञानाविरामतंविराधंलोकविश्रुतं भक्ष्यान्मुनयःसर्वेत्यक्त्वावन
मितोगताः २८ यदिजीवितुमिच्छास्तित्यक्त्वासीतांनिरायुधौ पलायतेनचेच्छीघ्रंभक्षयामिपुवामहं २९ इत्युक्त्वाराक्षसः
सीतामादायतुमभिद्रुवे ३० रामश्चिछेदरतद्वाहूशरेणाथकृत्तविव ततःक्रोधपरीतात्मामाहाघविकेदमुनमंत्र ३१ रामस्याभ्यद्रव
द्रामश्चिछेदपरिधावतः पदद्वयंविराधस्यतदद्भुतमिवाभवत् ३१ ततःसर्पइवास्येनग्रसितुरामसमापतत् ततोर्धचंद्राकारेणवा
णेनास्यमहाच्छिरः ३३ चिच्छेदरुधिरोघेणापपातधरणीतले ततःसीतासमालिंग्यप्रशशंसरघूत्तमं ३४ ततोदुंदुभयोदुर्दिविदेवग
णोदिताः ननृतुश्चाप्सरोऽहृष्टाजगुर्गंधर्वकिंनराः ३५ विराधकायादतिसुंदराकृतिर्विभ्राजमानोविमलांबरावृतः प्रतप्तचामीकरचा
रुभूषणोव्यदृश्यताग्रेगगनेरविर्यथा ३६ ॥

३४ ३५ विराधकायान्निःसृतइतिशेषः विमलांबरंनिर्मलवस्त्रंतेनावृतः चामीकरंसुवर्णं ३६ ॥ ३६ ॥ ३६

श्रीराम.
२

भवप्रवाहस्य संसारप्रवाहस्योपरमो नाशो यस्मात्तं घृणाः कृपायाः आकरमुत्पत्तिस्थानं प्रपन्नानां शरणागतानां सर्वपीडानाशकं ३७ राजीवं कमलं कारणकोप
मूर्तिना निर्निमित्तकोपवन्मूर्तिना ३८ मे कर्णपुटं त्वदीयं कथामृतं पातु इत्यन्वयः पिबत्विति सर्वः सादरं शृणोत्वित्यर्थः पिबत्वेकाभावश्चार्थः ३९ एवमङ्गजातं भ
वं भवदीयमेवास्तु भवत्सेवाशीलमित्यर्थः ४० आत्माभिन्नरूपे आरमन्ते तस्मै सर्वदानंदानुसंधानवते इत्यर्थः ४१ इदानीं प्रार्थयते मायेत्यादि ४२ ४३ अशेषा मायादो

प्रणम्य रामं शरणागतार्तिहारिणं भवप्रवाहोपरमं घृणाकरं प्रणम्य भूयः प्रणनाम दंडवत्प्रपन्नसर्वार्तिहरं प्रसन्नधीः ३७ विराध उवाच श्रीराम राजीव
दलायताक्ष विद्याधरोऽहं विमलप्रकाशः दुर्वाससाकारणकोपमूर्तिना शप्तः पुरा सोऽद्य विमोचितस्त्वया ३८ इतः परं त्वच्चरणारविंदयोः स्मृतिः सदा
मेऽस्तु भवोपशांतये॥ त्वन्नामसंकीर्तनमेव वाणी करोतु मे कर्णपुटं त्वदीयं ३९ कथामृतं पातु करद्वयं ते पादारविंदार्चनमेव कुर्यात् शिरश्च ते पादयुगप्र
णामं करोतु नित्यं भवदीयमेवं ४० नमस्तुभ्यं भगवते विशुद्धज्ञानमूर्तये आत्मारामाय रामाय सीतारामाय वेधसे ४१ प्रपन्नं पाहि मां राम यास्या
मि त्वदनुज्ञया देवलोकं रघुश्रेष्ठ माया मां मा वृणोतु ते ४२ इति विज्ञापितस्तेन प्रसन्नो रघुनंदनः ददौ वरं ततः प्रीतो विराधाय महामतिः ४३ गच्छ वि
द्याधराशेषमायादोषगुणाज्जिताः त्वया मद्दर्शनात्सद्यो मुक्तो ज्ञानवतां वरः ४४ मद्भक्तिर्दुर्लभा लोके जाता चेन्मुक्तिदा यतः अतस्त्वं भक्ति
संपन्नः परं याहि ममाज्ञया ४५ रामेण रक्षोनिधनं सुघोरं शापाद्विमुक्तिर्वरदानमेवं विद्याधरत्वं पुनरेव लब्धं रामं गृणन्नेति नरोऽखिलार्थान्
४६ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकांडे प्रथमः सर्गः १ ॥ १ ॥

धरूपा लोके गुणास्तत्त्वेन लोके प्रसिद्धास्त्वया मद्दर्शनाज्जिताः अथ त्वं ज्ञानवरो भूत्वा मुक्तो भविष्यसीति शेषः ४४ परं मोक्षं याहि प्राप्नुहि ४५
रामेण राक्षसो निधनं कृतं तेन निधनेन तस्य राक्षसस्य शापाद्विमुक्तिः कृता तस्मै एवं वरदानं च कृतं तत्प्रसादेन पुनरेव विद्याधरत्वं लब्धं अतो रामं गृणन्नरोऽखिलार्थ
निति प्राप्नोतीति ४६ इति श्री आरण्यकांडे प्रथमः सर्गः

विराधेस्वर्गतेइति १ आयांतं आगतं २ अभिगम्य संमुखगमनपूर्वकं तमानीय उपवेशयत् अस्थापयत् आर्षः ३ आसंस्थितः तपसे तपःकर्तुं कृतनि
श्चयः ४ तव संदर्शनाकांक्षी इहैवासमिति पूर्वेणान्वयः यतस्त्वं परमेश्वरः मोक्षदः ५ विरक्तः मनसो मनेपुत्रांपहिंसारहितत्वात्तपस्तत्फलं राममस्मम

विराधेस्वर्गतेरामोलक्ष्मणेनचसीतया जगामशरभंगस्यवनंसर्वसुखावहं १ शरभंगस्ततोदृष्ट्वारामंसौमित्रिणासह आयांतंसीतयासा
र्धंसंभ्रमादुत्थितःसुधीः २ अभिगम्यसुसंपूज्यविष्टरेषूपवेशयत् आतिथ्यमकरोत्तेषांकंदमूलफलादिभिः ३ प्रीत्याहशरभंगोपि
रामंभक्तपरायणं बहुकालमिहैवासंतपसेकृतनिश्चयः ४ तवसंदर्शनाकांक्षीराममत्वंपरमेश्वरः अद्यमत्तपसासिद्धंयत्सुकृतंपवऊवियते न
त्सर्वंतवदासस्याभिजितोमुक्तिंव्रजाम्यहं ५ समर्प्यरामस्यमहत्सुरायफलंविरक्तःशरभंगयोगी चितिंसमारोहयदप्रमेयंरामंससीतंस
हसाप्रणम्य ६ ध्यायन्चिरंराममशेषहृत्स्थंदूर्वादलश्याममलंबुजाक्षं चीरांबरंस्निग्धजटाकलापंसीतासहायंसहलक्ष्मणंतं ७
कोवाद्दयालुःस्मृतकामधेनुरन्योजगत्सारघुनायकाद्दहो स्मृतोमयानित्यमनन्यभाजाज्ञात्वास्मृतिंमेस्वयमेवयातः ८ पश्यन्चिरंरामी
देवेशोराममोत्राशरधिःप्रभुः दग्ध्वास्वदेहंप्रछाप्रिगमब्रह्मलोकमकल्मषः ९ अयोध्याधिपतिर्भक्तस्येराघवःस्तद्दयमेदृश्यमंकेस्थितासी
तामेघस्येवतडिल्लता १० इतिरामंचिरंध्यात्वादृष्ट्वाचपुरतःस्थितं अजानन्मसहसावह्निदग्ध्वापंचात्मकंवपुः ११ ॥

र्थ्यदत्त्वासहसाततस्तरामेवचितिसमारोहयततसमारुह्यनिष्कल्मषेणरागाणिच ६ अशेषहृत्स्थं सर्वांतर्यामिरामंसहलक्ष्मणेनसमस्तंतेमितितोपमर्जनस्येतिमा
देशाभावः ७ स्मृतकामधेनुःस्मृतःसन्कामधेनुस्तत्तुल्यःसर्वमनोरथप्रकत्वात्तयातःआगतः ब्रह्मलोकंउपासकत्वान्मोक्षद्वारभूतं ९ १० पुरतस्थि
तंदृष्ट्वानादग्ध्वमेवहृदयेध्यात्वाच ११ ॥

लोकपतेः वायें ब्रह्मणः ११ शरभंगनिवेशनं ततदाश्रममाजग्मुरित्यन्वयः १२ भूमौ दंडवत्पतिताः प्रणेमुः १३ १४ लक्ष्मणश्शेषांशमितस्तत्र
पः १५ अतः भूमिदुःखहरणार्थमवतीर्णोसि त्वमादौ रावणादिवधेनास्मद्दुःखं मोक्तुमर्हसि १६ सुमित्रासुतजानकीभ्यां सहवनाद्वनं द्रष्टुं गच्छत्तदा तत्र दर्श

दिव्यदेहधरः साक्षाद्ययौ लोकपतेः पदं ततो मुनिगणाः सर्वे दंडकारण्यवासिनः आजग्मू राघवं द्रष्टुं शरभंगनिवेशनं ११ दृष्ट्वा मुनि
समूहं तं जानकीरामलक्ष्मणाः ~~सर्वे दंडकारण्यवासिनः आजग्मू राघवं द्रष्टुं~~ प्रणेमुः सहसा भूमौ मायामानुषरूपिणः १३ आशीर्भिर
भिनंद्याथ राममस्त्वहृदिस्थितं ऊचुः प्रांजलयः सर्वे धनुर्बाणधरं हरिं १४ भूमेर्भारावताराय जातोसि ब्रह्मणार्थितः जानीमस्त्वां हरिं लक्ष्मीं
जानकीं लक्ष्मणं तथा १५ शेषांशं शंखचक्रे द्वे भरतं सानुजं तथा अतस्त्वादौ केषां शोकदुःखं मोक्तुमिहार्हसि १६ आगच्छ यामो मुनिसेवि
तानि मर्शोरिरघत्तमेकमात्र द्रष्टुं सुमित्रासुतजानकीभ्यां तदा दयास्माकं सुखं भविष्यति १७ इति विज्ञापितो रामः कृतांजलिपुटैर्
विभुः जगाम मुनिभिः सार्धं द्रष्टुं मुनिवनानि सः १८ ददर्श तत्र निर्गतान्यनेकानि शिरांसि सः अस्थिभूतानि सर्वत्र रामो वचनमब्रवी
त् १९ अस्थीनि केषामेतानि किमर्थं पतितानि वै तमूचुर्मुनयो राम मुनीनां मस्तकानि हि २० राक्षसैर्भक्षितानीश प्रमत्तानां
समाधितः अंतरायं मुनीनां ते पश्यंतोनुचरंति हि २१ श्रुत्वा तं मुनीनां भयदैन्यसमन्वितं प्रतिज्ञामकरोद्रामो वधायाशेषर

समाप्तिमाप २१ ॥ २२

निसर्ति ११ १८ अस्थिभूतानि अत्यन्तशुष्काणि १९ २० समाधितः समाधिविधिना प्रमत्तानां तद्दर्शनेयल्लाघसमर्थानां अंतरायेसमाधि
रूपे अपायमत्वमितिपाठे समाधितः प्रमत्तानां हीनानां सत्कर्मसमाधीनामित्यर्थः अपायं समाधिस्थानरूपे समाधौ हि भगवदेकरूपतीतिभावः

९

२३ २४ सर्वर्तुगुणैः संपन्नत्वात्सर्वकाले सुखजनकं २५ भक्त्या प्रेम्णा उत्फुल्लिते रामस्य पुनः पुनर्दर्शनेच्छावती लोचने यस्य सः २६ हे अभिराम परमसुंदर राम त्वन्मंत्रजापी अहं सततं तव दासोऽस्मीति शेषः अप्रमेय देशकालापरिच्छेद्य शिवब्रह्मसमाश्रितचरण संसारसमुद्रतरणे अमलपोतरूपौ पादौ यस्य त्वच्चरणाश्रितानां संसारसागरोत्तरणमकिंचित्करमेवेति भावः २७ सर्वजगतामगोचरोऽपि त्वं मलपुद्गलो यः मुद्गलपिंडः शरीरं तत्र यो मोहः स

पूज्यमानः सदा तत्र मुनिभिर्वनवासिभिः जानक्या सहितो रामो लक्ष्मणेन समन्वितः २३ उवास कतिचिन्नवर्षाणि रघुनंदनः एवं क्रमेण संपश्यन्नृषीणामाश्रमान्विभुः २४ सुतीक्ष्णस्याश्रमं प्रागादगस्त्याश्रमान्मृषिसंकुलं सर्वर्तुगुणसंपन्नं सर्वकालसुखावहं २५ राममागतमाकर्ण्य सुतीक्ष्णः स्वयमागतः अगस्त्यशिष्यो रामस्य मंत्रोपासनतत्परः विधिवत्पूजयामास भक्त्युत्फुल्लितलोचनः २६ सुतीक्ष्ण उवाच त्वन्मंत्रजाप्यहमनंतगुणाप्रमेय सीतापते शिवविरिंचिसमाश्रितांघ्रे संसारसिंधुतरणामलपोतपाद रामाभिराम सततं तव दासदासः २७ मामद्य सर्वजगतामविगोचरस्त्वं त्वन्मायया सुतकलत्रगृहांधकूपे मग्नं निरीक्ष्य मलपुद्गलपिंडमोहपाशानुबद्धहृदयं स्वयमागतोऽसि २८ त्वं सर्वभूतहृदयेषु कृतालयोऽपि त्वन्मंत्रजाप्यविमुखेषु तनोषि मायां त्वन्मंत्रसाधनपरेष्वपयाति माया सेवानुरूपफलदोऽसि यथा महीपः २९ ॥

हृद्बद्धं चित्तं यस्य तं मां अद्य त्वन्मायया सुतकलत्रगृहरूपांधकूपे निमग्नं निरीक्ष्य अथ हेतोः बुद्धीसद्रूपपाशेनानुबद्धं बद्धं चित्तं यस्य तं मां अद्य त्वन्मायया सुतकलत्रगृहरूपांधकूपे निमग्नं निरीक्ष्य स्वयमागतोऽसि सा अपूर्वा मे करुणा त्वयि इत्याशयः २८ जाप्ये जपनक्रियाविमुखेषु यथा महीपो राजा सेवानुरूपफलदस्तथा त्वमसीत्यर्थः २९ ॥

विश्वस्य सृष्ट्यादिहेतुस्त्वमेकस्त्वं त्रिगुणया मायया उपाधिभूतया त्वमेव विधिरिति ईशः शिव इति विष्णुरिति भासीत्यन्वयः विविधाकृतित्वं तत्र ध्यानादौ प्रति
इदमेवं तेषां तत्र यात्वं तत्त्वेवमनेकत्वं न तत्त्वमिच्छेवेत्याह यद्वदिति ३० तमसः परतः नष्टीनेषु हृत्सु तत्र ध्यानचिन्ने स्थितस्येत्यर्थः दृग्रूपतः दृग्रूपमष्टहेतोरित्यर्थः सा
वं विभक्तिं कस्त्वमसि त्रमसन्नः हृग्विषयः भवसीति शः ३१ स्वरूपेणाः स्वरूपस्यापिच्छादकसद्दृतिमायाविडंबनेन मायाख्यचह्नेशेणाकृतस्य एष मन्यते ३२ नि

विश्वस्य सृष्टिलयसंस्थितिहेतुरेकस्त्वं मायया त्रिगुणया विधिरीशविष्णू भासीश मोहितधियां विविधाकृतिस्त्वं यद्वद्रवि
: सलिलपात्रगतोप्यनेकः ३० प्रत्यक्षतो यमवतश्चरणारविंदं पश्यामि राम तव रूपमरूपिणोपि मायाविडंबनकृतं सुमनु
ष्यवेषं कंदर्पकोटिसुभगं कमनीयचापबाणं दयार्द्रहृदयं स्मितचारुवक्त्रं ३२ सीतासमेतमजिनांबरमप्रधृष्यं सौमित्रिणा नि
यतसेवितपादपद्मं नीलोत्पलद्युतिमनंतगुणं प्रशांतं मद्भागधेयमनिशं प्रणमामि रामं ३३ जानंतु राम तव रूपमशेषदेशका
लाद्युपाधिरहितं घनचित्प्रकाशं प्रत्यक्षतोद्य मम गोचरमेतदेव रूपं विभातु हृदये न परं विकांक्षे ३४ इत्येवं स्तुवतस्तस्य राम:
सस्मितमब्रवीत् मुने जानामि ते चित्तं निर्मलं मदुपासनात् ३५ अतोहमागतो द्रष्टुं मदृते नान्यसाधनं मन्मंत्रोपासका लोके
मामेव शरणं गताः ३६

यतसेवितेति नियमेन सेवितेति नियमेन सेवितेत्यर्थः मद्भागधेयं मदृष्टारब्धशरीरमितिभावत् अनेनेशः शरीरारंभं प्रशदृष्टमात्रजन्यत्वं
सूचितं ३३ जानंतु त्वमन्ये योगिनः इति शेषः देशोत्यादिदेशकालाद्यपरिच्छिन्नमित्यर्थः एतेनेति चेतन्यमात्ररूपमित्यर्थः नान्यसाधनेनान्यत्साधनमि
त्यर्थः तेनोपमंत्रोदमः तदेवाहमन्मंत्रेत्यादिना ३६ ॥

३७ तस्यप्रेमपिमत्भक्तिःसतीमुक्तिर्भवेत् ३८ ३९ विराद्दृशोमयापीविशेषः ४० त्रागस्त्यसंभाषणोलोलमसुत्कटेछाबन्मानसे यस्यसद्रत्युर्ध्वः ४१ इतिटीकायांद्वितीयःसर्गः २ अथैतिस्मात्त्यानुजोऽभिजिकनामाकृषिः १ त्रागस्त्यमंडलेतदाश्रमं २ ३ देवर्षिभिः

निरपेक्षानान्यगतानांलेषांहृदयेऽहमन्वहं सोत्रमेतत्सदेवकालतत्त्वंतमयिवंभरा ३७ सद्भक्तिर्मेभवेत्तस्यज्ञानंचविमलंभवेत् त्वेम मापामनादेवविमुक्तोसीहसर्वतः ३८ देहांतेममसायुज्यंतस्यसेनात्रसंशयः श्रुत्वैतद्दृश्यमिवमित्रगस्त्यमुनिनापकं किं चित्कांचेतत्त्वकं्ममनोमेत्वरयस्कलं ३९ मुतीसंगोपितथेत्याहृश्योमिमतिराघव अहमप्यागमिष्यामिचिराद्दृष्टोमहामु निः ४० अथप्रभातेमुनिनामसमेतोरामःसमीतःसहलक्ष्मणेन अगस्त्यसंभाषणलोलमानसःशनैरगस्त्यानुजमंदिरंययौ ४१ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेद्वितीयःसर्गः २ अथरामःसुतिक्ष्णेनज्ञातवर्त्मालक्ष्म णेनच अगस्त्यानुजस्थानंमध्याह्नेसमपद्यत १ तेनसंपूजितःसम्यकूभुक्त्वामूलफलादिकं परेद्युःप्रातःतस्या यजगस्त्यगस्त्यमंडलं २ सर्वर्तुफलपुष्याढ्यंनानामृगगणैर्युतं पक्षिसंघैश्चविविधैर्नादितंनंदनोपमं ३ ब्रह्मर्षिभिर्देव र्षिभिःसेवितंमुनिमंदिरैः सर्वतोलंकृतंसाक्षाद्ब्रह्मलोकमिवापरं ४ अगस्त्यमुनिवर्यायमीतपालक्ष्मणेनच महाश्रमादद्द रत्स्थित्वासुतीक्ष्णाःप्रययोगुरोः ५ आश्रमंतत्रयातेचेकृषिसंघसमावृत्तं उपविष्टंराममंत्रेविशेषेणसमाधुतं ६ ॥ ६ ॥

त्रिलंदेहांभगस्त्यार्षःमुनिमंदिरैःसर्वतोलंकृतमिमन्वयः ४ ५ ६ ॥ ६ ॥ ६ ॥ ६ ॥

आख्यातो राममन्त्रार्थो येन तं तथा प्रययौ मुनेः समीपमिति शेषः ७ कांक्षमाणः तमेवेत्यनुकर्षः ८ ९ १० ११ सीतयेत्यादेः सहेति शेषः
१२ तद्गात्रस्पर्शजाह्लादेन स्रवद्यन्नेत्रजलं तेनाकुलः १३ रघुनंदनं रघुनंदनमित्यर्थः १४ वन्यैर्भोज्यैर्भोजयित्वेत्यन्वयः १५ १६ १७

आख्यातराममन्त्रार्थः शिष्येणागस्त्यभक्तितः दृष्ट्वागस्त्यं मुनिश्रेष्ठं सुतीक्ष्णः प्रययौ मुनेः ७ दंडवत्प्रणिपत्याह विनया
वनतमुखः रामो दाशरथिर्ब्रह्मन् सीतया लक्ष्मणेन च आगतो दर्शनार्थं ते बहिस्तिष्ठति सांजलिः ८ अगस्त्य उवाच शीघ्र
मानय भद्रं ते रामं मम हृदि स्थितं तमेव ध्यायमानोऽहं कांक्षमाणोऽत्र संस्थितः ९ इत्युक्त्वा स्वयमुत्थाय मुनिभिः सहितो द्रुतं
आश्रमात्त्वरयागत्य राममथाब्रवीत् १० आगच्छ राम भद्रं ते दिष्ट्या तेऽद्य समागमः प्रियातिथिर्मम प्राप्तोऽस्यद्य मे सफ
लं दिनं ११ रामोऽपि मुनिमायान्तं दृष्ट्वा हर्षसमाकुलः सीतया लक्ष्मणेनापि दंडवत्पतितो भुवि १२ द्रुतमुत्थाप्य मुनिराट्
रामं प्रालिंग्य भक्तितः तद्गात्रस्पर्शजाह्लादस्रवन्नेत्रजलाकुलः १३ गृहीत्वा करमेकेन करेण रघुनंदनं जगाम स्वाश्र
मं हृष्टो मनसा मुनिपुंगवः १४ सुखोपविष्टं संपूज्य पूजया बहुविस्तरं भोजयित्वा यथान्यायं भोज्यैर्वन्यैरनेकधा
१५ सुखोपविष्टमेकांते रामं शशिनिभाननं कृतांजलिरुवाचेदमगस्त्यो भगवानृषिः १६ त्वदागमनमेवाहं प्रतीक्षन्समव
स्थितः यदा क्षीरसमुद्रान्ते ब्रह्मणा प्रार्थितः पुरा १७ भूमेर्भारापनुत्यर्थं रावणस्य वधाय च तदादि दर्शनाकांक्षी तवागमनपश्यन्
वसामि मुनिभिः सार्धं तामेव परिचिंतयन् १८

हे राम तव दर्शनाकांक्षी त्वत्पश्यन् तदादि तत्कालमारभ्य वसामीत्यन्वयः १८ ॥ १८ १८ १८ १८ १८ १८ १८ १८

ई॰ गी॰ स्वा॰
६

अथ भगवत्स्वरूपं शिष्यान्बोधयितुमन्यथा तथा शंकां वारयन्भगवद्रूप एवाह सृष्टेः प्रागिति। त्वमेव एकः आसीः निर्विकल्पः विकल्पस्त्वप्रसकल
प्रपंचहीनः तत्र हेतुरनुपाधिक इति उपाध्यसंबद्ध इत्यर्थः ननु किं सर्वथोपाधिर्नास्त्येवेति नेत्याह त्वदिति अस्त्येव मायापरंतु अकल्पितत्वात्संबंधही
नामात्तत्त्वमनुपाधिक इत्याशय १९ अथ सृष्टिमुपदिष्टिमुपक्रमते त्वामिति त्वां निर्गुणामेव संतं पदा माया शक्तिः स्वकल्पितसंबंधेन त्वामाहरोति
त्वत्संबद्धामात्मानं मनुते वस्तुतः ताविदृपितत्वं तत्संबद्धमात्मानं मनुषेतो निर्गुणामेवेत्युक्तं तदा तां मायापायमव्याकृतमित्याहुः २० तस्मात्त्वदवस्थापोनाम
नतारायप्याह मूलप्रकृतिरित्यादि तदुक्तं कपिलेन मूलप्रकृतिरविकृतिरित्यादिना २१ सा त्वत्संबद्धामात्मानं मन्वाना अत एव तपासंक्षोभ्यमाणास

सृष्टेः प्रागेक एवासीन्निर्विकल्पोऽनुपाधिकः त्वदाश्रया त्वद्विषया माया ते शक्तिरुच्यते १९ त्वामेव निर्गुणां शक्तिरावृणो-
तियदा अव्याकृतमिति प्राहुर्वेदतत्त्वपरिनिष्ठिताः २० मूलप्रकृतिरित्येके प्राकृतिर्मायेति केचन अविद्या संसृतिर्बंध इत्यादि बहुधो-
च्यते २१ तपासंक्षोभ्यमाणासा महत्तत्त्वस्वरूपते महत्तत्त्वादहंकारः तथा संचोदितादभू २२ ॥

सोप्यस्माल्कल्पितसंबंध एवेति बोध्यं महत्तत्त्वमिति सविकारात्प्रधानानुमहत्तत्त्वमजायत महानिति यतः स्मातिल्लोकानां जायते सदे-
तिस्मृतेः त्रिसृष्ट्योस्या साधारणी वृत्तिः एतदभिमानिनि हिरण्यगर्भेपि महानिति शब्दः सर्वेषां स्वत्तबुद्धिरूपाः वृत्तिनियत्तोपाधयस्त्वास्य
वमहत्तत्त्वस्यांशाः अस्यानेकबुद्धिर्महत्त्वरूपत्वादिति बोध्यं त्वयासंचोदितात्प्रेरितान्महत्तत्त्वादहंकारोभूत् सचाहंममेत्यभिमानवृत्तिक
संततः कारणात् अयमहंकारोभिमानः अकर्ता अंतामात्मन इति कौलिकः अभिमानवृत्तिक इत्यर्थः २१ ॥ २२ ॥ २२ ॥

श्रीराम
६

महत्तत्त्वं सत्त्वतमस्तदुपादानकत्वात् मायायां घटो मृदा सत्त्वाद्युपाधिकत्वेन त्रैविध्यं मूलप्रकृतेस्त्रिगुणत्वेन तत्कार्यमहत्तत्त्वस्य त्रिगुणत्वं सात्वि
को राजसस्तैजसस्तामसश्चेति त्रिधा महानिति स्मृतेः तत्कार्यत्वाच्चाहंकारस्य त्रैविध्यं एवमग्रेऽपि बोध्यम् २३ सूक्ष्मतन्मात्राणि शब्दस्पर्शरूपरस
गंधतन्मात्राणि अतः सूक्ष्माणि तेभ्यः स्थूलानि भूतानि तत्र शब्दतन्मात्रात्स्पर्शसहिताद्वायुः ताभ्यां सहिताद्रूपतन्मात्रात्तेजः तैः सहिताद्रसमात्राज्ज
लं एतैः सहिताद्गंधतन्मात्रात्पृथिवी साधम्यक्रुतत्रुजसांख्यप्रसिद्धो विस्तरः तेष्वाहृक्रमोत्तरगुणानीति क्रमेणाधिकगुणानि तन्त्राकाशं शब्दमात्र
गुणं वायुः शब्दस्पर्शगुणं रूपगुणं जलं शब्दस्पर्शरूपरसगुणं भूः शब्दस्पर्शरूपरसगंधगुणेति २४ राजसादहंकारादेकादशेंद्रियाणि राजसाहंकारोपादान

अहंकारो महत्तत्त्वं सत्त्वतस्त्रिविधोऽभवत् सात्त्विको राजसश्चैव तामसश्चेति भण्यते २३ तामसात्सूक्ष्मतन्मात्राण्यासन्भू
तान्यतः परं स्थूलानि क्रमशो मोत्तरगुणानि हि २४ राजसानींद्रियाण्येव सात्त्विकादेवता मनः तेभ्यो भवन्स्तद्रूपलिंगं सर्वगतेम
हत २५

शोरामक्र २

कानीत्यर्थः तानि च वाक्पाणिपादपायूपस्थरूपाणि कर्मेंद्रियाणि पंच चक्षुःश्रोत्रत्वग्रसनघ्राणरूपाणि ज्ञानेंद्रियाणि पंच तेषां दश वचनादान
विहरणानंदोत्सर्गात्मककर्मेंद्रियाणां वृत्तयः ज्ञानेंद्रियाणां च सविकल्पनिर्विकल्पकोभयरूपज्ञानरूपा वृत्तिः तत्र निर्विकल्पकं किंचिदिदमि
ति ज्ञानं देवता मनश्च सात्त्विकात्सात्त्विकाहंकारोपादानादित्यर्थः देवताः इंद्रियदेवताः ताश्च चक्षुषो रविः श्रोत्रस्य दिक् त्वचो वायुः रसनस्य वरुणः घ्रा
णस्याश्विनौ वाचो वह्निः पाण्योरिंद्रः पादयोः मित्रः उपस्थस्य कोऽत्र क्षेति मनः इंद्रियमपि शब्दांतरत्वात्स्वयगुक्तं सूत्ररूपं प्राणादिक्रियाशक्तेः प्राणादेरे
व सूत्रत्वं वायुरूपाणां तद्दात्मकं हिरण्यगर्भरूपं लिंगं सर्वकार्यकर्तृत्वात् महत् सूक्ष्मसमष्टिरूपमभवदित्यर्थः २५ ॥ २५ ॥ २५

ततो विराट्स्थूलसमष्टिरूपं तदाह स्थूलाद्भूतकदंबकादिति इदमिंद्रियादेरप्युपलक्षणं तस्माद्विराजः पुरुषात्सर्वं स्थावरजंगममभिव्यक्तमित्यर्थः
२६ तज्जंगममाह देवेत्यादि कालकर्मक्रमेण कालकर्मसहायया हेमंते ब्रीहयो वर्धंते यज्ञादिकर्मक्रमेण कालसहकृतेन तिर्यङ्मनुष्यदेवत्वप्राप्तिः उ
पाधिभेदेन ब्रह्मादिरूपोऽपि त्वमेवेत्याह रजोगुणतः तद्रूपोपाधेः जगतः सर्वकारणं सर्वस्य जगतः कारणमित्यर्थः अर्थतात्समासः २७ अस्य सत्त्वयेना
दानिमित्तत्वमेव रुद्रत्वं तद्गुणाधिक इत्यर्थः एवं त्वन्मायायाः गुणभेदैः सत्त्वरजस्तमोभिरेव तत्तन्नामधाम्येन बुद्धिजा गुणा इत्यर्थः त्वं तेन तस्य स्थाव

ततो विराट्समुत्पन्नः स्थूलाद्भूतकदंबकात् विराजः पुरुषात्सर्वं जगत्स्थावरजंगमं २६ देवतिर्यङ्मनुष्याश्च कालकर्मक्रमेण तु त्वं रजो
गुणतो ब्रह्मा जगतः सर्वकारणं २७ सत्त्वाद्विष्णुस्त्वमेवास्य पालकः सद्भिरुच्यते लये रुद्रस्त्वमेवास्य त्वन्मायागुणभेदतः २८ जाग्रत्स्व
प्नसुषुप्त्याख्या वृत्तयो बुद्धिजा गुणैः तासां विलक्षणो राम त्वं साक्षी चिन्मयोऽव्ययः २९ सृष्टिलीलां यदा क[illegible]
[illegible] मीहसे रघुनंदन अंगीकरोषि मायां त्वं तदा वै गुणवानिव ३० राम माया द्विधा भाति विद्याविद्येति ते सदा प्र
वृत्तिमार्गनिरताश्चाविद्यावशवर्तिनः निवृत्तिमार्गनिरता वेदान्तार्थविचारकः ३१ ॥

यरहितत्वमाह एतामिति । स्वप्नसुषुप्त्योरभावात्स्वतिहं बुद्धिजा यदवस्थायाः अप्यभावः इति भावः २८ २९ सृष्टिलीलामित्युपलक्षणं स्थित्यादेरपि पद
इहसे इच्छसि तदा मायामंगीकरोषि तत्कल्पिततत्कृतं संबंधमन्यसे तदा वस्तुतोऽगुणोऽपि गुणवानिव भासि इति शेषः ३० तत्र माये वसंसारस्य
मोक्षस्य च दानेसमर्थेत्याह रामेति विद्या तत्त्वज्ञानं अविद्या समस्तस्थूलकारणं तदुक्तं मार्कंडेये न सा विद्या परमा मुक्तेर्हेतुभूता सनातनी सं
सारबंधहेतुश्च सैव सर्वेश्वरेश्वरीति ३१ ॥ ३१ ॥ ३१ ॥

विद्यामयाः तत्वज्ञानप्रधानाः सत्यपि प्रारब्धकर्मतो विक्षेपे पुनः पुनस्तदनुसंधानवंतइत्यर्थः ३२ विद्याप्राप्त्यावसाधारणं हेतुमाह लोकेइति ३३ मु
क्ताएव । तेषां तत्वज्ञानस्यावश्यंभावित्वादितिभावः अतिरेकमप्याह त्वद्भक्तीति ३४ मद्भक्तिरेवकथमितिचेत्तस्याश्चपि किंचिद्भूसंकारणमस्तीत्या
ह किंराममिति । तेस्यायमर्थइतिशेषः स्वशिष्यविश्वासार्थं भगवद्यत्तत्परतदुक्तिः ३५ साधुस्वरूपज्ञानेनैवतत्संगतिः शंक्येत्यतस्तल्लक्षणमाह सा
धवइति समचित्ताः शत्रुमित्रयो रागद्वेषहीनचित्ताः अतएवनिस्पृहाः रागद्वेषकारणीभूतस्पृहाहीनाः विगतैषणाः त्यक्तपुत्रवित्तादीच्छाः दांताः बाह्येंद्रिय

त्वद्भक्तिनिरतायेच तेवैविद्यामयाः स्मृताः अविद्यावशगायेतु नित्यंसंसारिणस्तुते ३२ विद्याभ्यासरतायेतु नित्यमुक्तास्तएवहि
लोकेत्वद्भक्तिनिरतास्त्वन्मंत्रोपासकाश्चये विद्याप्रादुर्भवेत्तेषां नेतरेषांकदाचन ३३ अतस्त्वद्भक्तिसंपन्नामुक्ताएवनसंशयः
त्वद्भक्तमृतहीनानां मोक्षःस्वप्नेपिनोभवेत् ३४ किंरामबहुनोक्तेन सारंकिंचिद्ब्रवीमिते साधुसंगतिरेवात्रमोक्षहेतुरुदा
हृता ३५ साधवःसमचित्तायेनिस्पृहाविगतैषिणः दांताःप्रशांतास्त्वद्भक्तानिवृत्ताखिलकामनाः ३६ इष्टप्राप्तिविपत्त्यो
श्चसमाःसंगविवर्जिताः संन्यस्ताखिलकर्माणःसर्वदाब्रह्मतत्पराः ३७ यमादिगुणसंपन्नाःसंतुष्टायेनकेनचित् सत्संगमोभ
वेद्यर्हित्वत्कथाश्रवणेरतिः ३८ ॥ ३८

नियहवंतः शांताः अंतरिंद्रियोंतःकरणनिग्रहवंतः विगतैषणाइत्यस्यैवव्याख्यानंनिवृत्ता
खिलकामनाइति ३६ इष्टेति समाः हर्षविषादरहिताः संगविवर्जिताः दुःसंगरहिताः संन्यस्तसाहंममककाम्यनित्यसकलकर्माणः त
देवाहंसर्वदाब्रह्मतत्पराः ३७ यमादयोयमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयोयोगशास्त्रोक्ताः यर्हियदातेषांसंगमोभ
वेत्तदात्वत्कथाश्रवणेरतिःसमुदेतिइत्यन्वयः ३८

ततोभक्तिरवरूपंममभूयात्लब्धस्त्वमानघपतित्याकाश्चित्रतृतिविशेषः प्रेमात्मः तथात्रमतनस्तत्त्वज्ञानंस्फुटमेवोदेतीत्यन्वयः ३९ अयमाद्योमु
ख्यश्चतुरैः कुशलैः सेवितोमुक्तेर्मार्गः तस्मात्राघवत्वयिप्रेमलक्षणासद्भक्तिर्मेसदाभूयात् हेहरेत्वद्भक्तेषुविशेषतः संगोभूयादितन्वयः ४० ४१
कृतवः सफलावभूवुः त्वस्त्रीतिरेवक्रतूनांमुख्यंफलंप्राचम्यदाश्रमेत्त्वागमनात्तयात्मक्तीकृता ४२ उक्तमेतार्थंभंग्यंतरेणाहदीर्घेति ४३ अथस्वेष्टं

समुद्देशितितोभक्तिस्त्वयिरामसनातने त्वद्भक्तावुपपन्नायांविज्ञानविपुलंस्फुटं ३० उदेतिमुक्तिमार्गोयमाद्यश्चतुरसेवितः त
स्मात्राघवसद्भक्तिः त्वयिमेप्रेमलक्षणा ४० सदाभूयाद्धरेसंगः त्वद्भक्तेषुविशेषतः अद्यमेसफलंजन्मभवत्संदर्शनादभूत् ४१
अद्यमेक्रतवः सर्वेबभूवुसफलाप्रभो ४२ दीर्घकालंमयातप्तमनन्यमतिनांतपः तस्यैहतपसोराममफलंतवदर्शनं ४३
सदामेसीतयासार्धंहृदयेवसराघव गच्छतस्तिष्ठतोवापिस्मृतिः स्यान्मेसदात्वयि ४४ इतिस्तुत्वारमानाथमगस्त्योमुनि
सत्तमः ददौचापंमहेंद्रेणराघवार्थंस्थापितंपुरा ४६ अक्षय्योबाणाग्न्याणौखड्गोरत्नविभूषितः जहिराघवभूभारभूतंराक्षसमंडलं ४६ यदर्थमवतीर्णो×ऽसिमाया
श्रामीगौतमान्तरे नेतव्यमत्रतेकालःशेषोरघुकुलोद्वह गतेवबहुकार्याणिदेवानांकुरुमनते ४८ श्रुत्वानदागस्त्यमनु
भाषितंवचः स्तोत्रंचनत्वार्थसमन्वितंविभुः मुनिसमाधायमुदान्वितोययौप्रदर्शितंमार्गमशेषविद्धरिः ४९ इतिश्रीमदध्या
त्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेतृतीयसर्गः ३

पार्ययेतेतद्देति ४४ ४५ बाणाग्न्याणौबाणापूर्णोतूणीरौ ४६ ४७ ।
४८ अशेषविद्विष्णुमान्तुष्णनाद्यमुनप्रदर्शितंमार्गंययौ ४९ ॥ ॥ इतिटीकायांतृतीयः सर्गः ३ ॥ ३ ॥ ३ ॥

श्रीराम॰
८

मार्गे इति दृष्ट्वा हृष्ट्वा च किमेतदिति विस्मितः १ २ ३ ४ वत्स्येव सामीत्यर्थः आर्षः प्रयोगः ५ ६ दृष्ट्वा महाराजे तिषष्ठीतत्पुरुषः अत्रैव वनेवस
नेनापि यं कुर्वितिसंबंधः ७ आमंत्रितेत सम्यक् बोधितेत शृंगमालिंग्येत्यर्थः ८ तेगौतमीतीरं गोदावरीतीरं गत्वा पंचवट्यां पंचवटसमीपे स्थिताः

मार्गे व्रजन्नदर्शाय शैलशृंगमिवस्थितं वृद्धं जटायुषं रामः किमेतदिति विस्मितः १ धनुरानम्य सौमित्रे राक्षसोयं पुरःस्थितः २
त्वाह लक्ष्मणं रामो हनिष्याम्यपि मस्तकं १ तच्छ्रुत्वा रामवचनं गृध्रराट् भयपीडितः ३ वधार्हो हं न ते राम पितुः स्नेही प्रियः सखा
जटायुर्नाम भद्रं ते गृध्रोहं पिपक्षनेव ४ पंचवट्यामहं वत्स्ये तत्रैव बापिपकाम्यया मृगयायां कदाचित्तु यातेलक्ष्मणेपि च ५ सी
तां जनककन्यां मे रक्षितमागपत्नतः श्रुत्वा नंदन्ध्रवचनं रामः सस्नेहमब्रवीत् ६ साधु गृध्रमहाराज नैवं कुरु ममप्रियं अत्रैव मे समीपस्थो ना
तिदूरेण नेवसन् ७ इत्यामंत्रितमालिंग्य ययौ पंचवटीं प्रभुः लक्ष्मणेन सह भ्रात्रा सीतया च रघुनंदनः ८ गत्वा तु गौतमीतीरं पंचवट्यामुवित्त
रं मंदिरं कारयामास लक्ष्मणेनानुबुद्धिना ९ तत्र तेन्यवसन्सर्वे गंगायाउत्तरे तटे कंदवृपनसाम्रादिफलवृक्षसमाकुले १० विवि
क्ते जनसंबाधवर्जिते निर्जनस्थले विनोदयन् जनककन्यां लक्ष्मणेन विपश्चिता ११ अध्युवास सुखं रामो देवलोके यथामरः कंदमूलफलादी
नि लक्ष्मणोनुदिनं तदा १२ आनीय प्रददौ रामसेवातत्परमानसः धनुर्बाणधरो नित्यं रात्रौ जागर्ति सर्वतः स्नानं कुर्वन्नुदिने चप
स्ते गौतमीजले उभयोर्मध्यगामी नाकुर्वत्तेन वगमानसौ १४ आनीय सलिलं नित्यं लक्ष्मणः प्रीतमानसः विनयावनतो भूत्वा पर्यचरेद

ततस्तत्र रामो लक्ष्मणेनाविस्तारं मंदिरं कारयामास ९ गंगायाः गंगा गौतम्येव १० जनसंबाधो जनसमूहः निष्क्रान्ता रमेश्वरे ११
द्विजापीडायस्मात्तादृशस्थले लक्ष्मणेन सह अध्युवासेति संबंधः ११ १२ १३ १४ १५ १६ ॥ १६ ॥ १६ ॥

श्री·रा·व्या·
९

२ कांतिकीं गतिं क्रमभिचारिकारणामित्यर्थः १७ ननु मोक्षकारणं ज्ञानमिति प्रसिद्धमेवेति चेत्तत्स्वरूपमेव मम विषयेऽस्याह ज्ञानमिति ज्ञानं स्वरा
मनंतत्त्वं विज्ञानं ज्ञाननिदिध्यासनं तत्रैव भक्तिः हीनविषये शेष उत्कटरूपो वैराग्यं मदतिरिक्ते मे मायाभावरूपं १८ वैकल्पिकं भ्रमं विकल्पः द्वैतं वैकल्पिकं विनयादित्वात्स्वार्थे कः श
ज्ञानानुपातिवस्तुशून्यो विकल्प इति योगसूत्रोक्तविकल्परूपं भ्रमं यथा शेषशृंगादिविषयमिति सत्योकमेवनयाविशेषशृंगादिदृशब्दप्रयोगस्तनोबोधश्च भवत्येवन
दृश्येवं सर्वोपि अवहाः संसाररूपेत्त पश्चाज्ञाने नजस्यात्तनदुःखं वक्ष्यामी सन्वयः तदुपयोगितया वक्ष्यमाणानन्यानि नामप्रमाणेनाक्रमत उद्दिशति आदावि

भगवन्श्रोतुमिच्छामि मोक्षस्यैकांतिकीं गतिं त्वत्तः कमलपत्राक्ष संक्षेपाद्वक्तुमर्हसि १७ ज्ञानं विज्ञानसहितं भक्तिवैराग्यबृंहितं आचक्ष्व
मे रघुश्रेष्ठ वक्ता नान्योस्ति भूतले १८ रामउवाच शृणु वक्ष्यामि ते वत्स गुह्याद्गुह्यतरं परं यद्विज्ञाय नरो जह्यात्सद्यो वैकल्पिकं भ्रमं २० आ
दौ मायास्वरूपं ते वक्ष्यामि तदनंतरं ज्ञानस्य साधनं पश्चाज्ज्ञानं विज्ञानसंयुतं २१ ज्ञेयं च परमात्मानं यज्ज्ञात्वा मुच्यते भयात् अनात्मनि
शरीरादावात्मबुद्धिस्तु या भवेत् २२ सैव माया तयैवासौ संसारः परिकल्प्यते रूपे द्वे निश्चिते पूर्वं मायायाः कुलनंदन २३ विक्षेपावरणे
तत्र प्रथमं कल्पयेज्जगत् लिंगाद्यब्रह्मपर्यंतं स्थूलसूक्ष्मविभेदतः २४ ॥ २४ ॥

ति २१ तत्र मायास्वरूपमाहानात्मनीति आत्मबुद्धिः अहमिति बुद्धिः २२ परिकल्प्यते स्वप्नवत्कल्पितः सद्वदर्शनेस्य यतः ताहशशक्तिमस्ति मत्तमा
यायाः दर्शयति रूपे इति पूर्वमिति अनेनास्य नादित्वं दर्शयति २३ के ते रूपे तत्राह विक्षेपावरणे इति विक्षेपशक्तिरनेन मायायाः ...
...वरणशक्तिश्चेत्यर्थः प्रथमं विक्षेपरूपं लिंगं महत्तत्त्वमाद्यं यस्य तत्तत्ब्रह्मपर्यंतं चतुर्मुखब्रह्मांतमित्यर्थः २४ ॥ २४ ॥ २४ ॥

श्रीराम·
९

अपरमावरणाह्रस्तस्यावर्यत्वमाह अखिलमिसर्वज्ञानरूपावरकत्वात् आवरणाभ्यवहारस्तत्वेनेतिभावः ननुमायाकुत्राधिष्ठाने इदंजगत्कल्पितव
वतीतत्राह। परमात्मनीति। तद्रूपंचैतन्यमाच्छाद्यजगद्रूपंदर्शितमित्यर्थः २५ तत्रदृष्टांतमाह। रज्जाविति रज्जुज्ञानंयथारज्जुमाच्छाद्यभुजंगंकल्पयतितद्वत्
वविचारेविनाज्ञेयधिष्ठानतत्वज्ञाने २६ सर्वस्यमिथ्यात्वेदृष्टांतोस्वप्नेतियथास्वप्नेकृतंदृष्टंस्मृतंचसर्वंमिथ्याजागरेप्रभवान्नहतदेहएवेति तस्यैवसर्वस
स्कारसाक्षमोत्मादकत्वादितिभावः २७ नत्वाहतन्मूलइति अन्यदेहाभावेतेपुत्रादयन्त्यात्मनः किंभवंतिनकिमपीत्यर्थः तच्चसूक्ष्मस्थूलदेहोएकोक्त

अपरंखिलंज्ञानरूपमात्मानंतिष्ठति मायया कल्पितंविश्वंपरमात्मनिकेवले २५ रज्जौभुजंगवद्भ्रान्त्याविचारेनास्तिकिंचन स्वपंतेह
यपंतेयथात्मीयंतेवानैःसदा २६ अमतेदेवहितत्सर्वंयथास्वप्नमनोरथै देहएवहितंसारंसूक्ष्ममूलंदहत्यमृते २७ तन्मूलःपुत्रदारादिबं
धःकिंतेन्यथात्मनः देहस्तुस्थूलभूतानांपंचतन्मात्रपंचकं अहंकारश्चबुद्धिश्चइंद्रियाणितथादश २८ चिदाभासोमनश्चैवमूलेन
कृतिरेवच एतत्सर्वंमिलित्वेयंदेहइत्यभिधीयते २९ एतैर्विलक्षणोजीवःपरमात्मानिरामयः तस्यजीवस्यविज्ञानेसाधनान्यपिमे
शृणु ३० जीवश्चपरमात्माचपर्यायोनात्रदेहधीः मानाभावस्तथादेहमहीमादिर्विजनता ३१ ॥ ३१ ॥ ३१ ॥ ३१ ॥

त्याह देहइति स्थूलभूतपंचकंस्थूलदेहः अहंकारबुद्धिदशेंद्रियाणिचात्तमनःपंचतन्मात्राणिइत्येताचानष्टादशात्मकोलिंगदेहःसूक्ष्मः २८ चिदा
भासइति तस्यविशेषणं चिताभासतेअहमितिबुध्याविषयीक्रियतइत्यर्थः मूलप्रकृतिरेवेत्येवकारणदेहः एतत्समस्तस्यजडत्वात्देहस्येवादिसंज्ञा २९
जीवःसएवपरमात्मा ३० अत्रजीवेपरमात्मनिच तथावमानभावःदेशतःकालतश्चपरिछेदभावः अथतद्विज्ञानसाधनन्याहदंभत्यादि ३१

श्री.ग.स्वा.
१०
३४

प्रेरितिपरकृतात्क्षेमादिर्निंदादिमत्स्वहृनं मनोवाक्कायकृतसङ्कल्पाग्रेसरासन्तुरुसेवनं ३२ बाह्याभ्यंतरसंशुद्धिः उक्तरूपेव सत्क्रियादिषुस्थिरतात्त्व
श्यकर्त्तव्यता बुद्धिः पराणिष्ठाचित्तनं मनोदंडः पत्राक्षेपाकरणं वाग्दंडः पराहिंसा कायदंडः निरीहेहतात्ववाहितं ३३ जन्मजराद्यालोचनं परेषां तदालोच
नमूलकं वैराग्यं पुत्रादिष्वसक्तिः तस्यैव ममत्वाभावस्नेहशून्यं तैश्चित्तस्य समेतता हर्षविषादराहित्यं अनन्यविषया तन्मात्रविषया ३५ जनसंबाधोजनस
मूहः प्राकृतैः सांसारिकैः अरतिः अप्रीतिः ३६ आत्मज्ञानेतत्साधनेऽवश्यादावधोगः आदरस्सर्वकोपतः वेदान्तार्थस्यावलोकनं श्रवणं विचारश्च

परासेयादिसहनंसर्वत्रावक्रतातथा मनोवाक्कायसंदंडःसद्गुरोःपरिसेवनं ३२ बाह्याभ्यंतरसंशुद्धिः स्थिरतासत्क्रियादिषु मनोवा
क्कायदंडश्चविषयेषुनिरीहता ३३ निरहंकारताजन्मजराद्यालोचनंतथा असक्तिःस्नेहशून्यत्वंपुत्रदारधनादिषु ३४ इष्टानिष्टाग
मेनित्यंचित्तस्यसमतातथा मयिसर्वात्मकेरामेह्यनन्यविषयामतिः ३५ जनसंबाधरहितशुद्धदेशनिषेवणं प्राकृतैर्जनसंघैश्च
ह्यरतिःसर्वदाभवेत् ३६ आत्मज्ञानेसदोद्योगोवेदान्तार्थावलोकनं उक्तैरेतैर्भवेज्ज्ञानंविपरीतैर्विपर्ययः ३७ बुद्धिप्राणम
नोदेहाहंकृतिभ्योविलक्षणः चिदात्माहंनित्यशुद्धोबुद्धएवेतिनिश्चयं ३८ येनज्ञानेनसंवित्तेतज्ज्ञानंनिश्चितंचमे विज्ञानंचतदेवैतत
साक्षादनुभवेद्यदा ३९ आत्मासर्वत्रपूर्णःस्याच्चिदानंदात्मकोऽव्ययः बुध्याद्युपाधिरहितःपरिणामादिवर्जितः ४० ॥ ४०

विपर्ययःसंसारः ३७ बुध्यादिभ्योविलक्षणःइत्यादिनिश्चयं ३८ येनज्ञानेनयथानाद्यादिजहस्यामसंवित्तेलभतेतज्ज्ञानमितिमेनिश्चितंनिश्चयः त
देवैतत्यदासाक्षादनुभवेत् निदिध्यासनपरिपाकेअपरोक्षमनुभवेत्तदाविज्ञानमित्युच्यते ३० अथात्मनउक्तंबुध्यादिभ्योवैलक्षण्यंप्रदर्शयतिआ
त्मेतिचिदेशवानंदस्वरूपात्मकं यद्वाचितंत्त्वानंदः समष्टित्त्वात्मकः बुध्याद्युपाधिभिस्तद्धर्मैरागादिभिःरहितःहीनःपरिणामोरूपांतरप्राप्तिस्तद्वर्जितः॥
आदिपदेनजन्मउत्तभासत्वादि ४० ॥ ४० ॥

श्रीराम.
१०

सएवसर्वभासकःस्वाहस्तप्रकाशेनेतिसत्यज्ञानादीति सत्यंज्ञानमानंदंब्रह्मेत्यादिश्रुत्युक्तलक्षणः ४१ स्वप्रभःस्वभानेऽनन्यभासकानपेक्षः
द्रष्टासर्वसाक्षीविज्ञानेनिनप्राग्युक्तेनशास्त्रजन्येनब्रह्मणावगम्यतेविषयीक्रियतेनेतस्यज्ञानस्यमुख्यकारणमाह आचार्येति आचार्यकृततत्त्वमस्यादिशा
स्त्रोपदेशात् जीवपरयोरात्मनोर्यदैक्यज्ञानंतदपरोक्षानुभवःभवेत्तत्तदैवमूलाविद्याकार्यस्थूलंकारणमिंद्रियैःसहपरात्मनिलीयते ४२ ४३
सैतावस्थामुक्तिर्मूलाविद्यालयएवमुक्तिरित्यर्थः आत्मनःशुद्धस्यसर्वथाऽविद्याःस्वरूपस्यभेदरहितस्यएकत्वज्ञानमविद्यालयाख्यमपिव्यव

स्वप्रकाशेनदेहादीन्भासयन्ननपावृतः एकस्त्वाद्वितीयश्चसत्यज्ञानादिलक्षणः ४१ असंगःस्वप्रभोद्रष्टाविज्ञाने
नावगम्यते आचार्यशास्त्रोपदेशादैक्यज्ञानंयदाभवेत् ४२ आत्मनोर्जीवपरयोर्मूलाविद्यातदैवहि लीयतेकार्यकरणैः
सहैवपरमात्मनि ४३ सावस्थामुक्तिरित्युक्ताह्युपचारोऽयमात्मनि इदंमोक्षस्वरूपंतेकथितंरघुनंदन ४४ ज्ञानविज्ञा
नवैराग्यसहितंमेपरात्मनः किंत्वेतद्दुर्लभंमन्येमद्भक्तिविमुखात्मनां ४५ चक्षुष्मतामपियथारात्रौसम्यङ्नदृश्य
ते पदंदीपसमेतानांदृश्यतेसम्यगेवहि ४६ एवंमद्भक्तियुक्तानामात्मासम्यक्प्रकाशतेमद्भक्तेः कारणंकिंचिद्वक्ष्या
मिशृणुतत्त्वतः ४७ ॥ ४७

ह्यारःकंठचामीकरन्यायेनगौणइत्यर्थःयथाकंठस्थचामीकरंभ्रान्त्यान्विष्यतिनष्टं नदितिबु
द्ध्यापुनःकंठेस्थचामीतइतिकेनचिदुक्तेलब्धमितिनित्यव्यवहारतिद्वत् एवंज्ञानादिसहितंमेपरमात्मनोमोक्षस्वरूपंतेकथितंयामोक्षस्याव
स्थोक्तातदेवमेस्वरूपमित्यर्थः मद्भक्तिविमुखात्मनामस्वमद्धीनानां ४४ ४५ यथासनेत्राणामपिरात्रौपदंचोरादिपदंनदृश्यतेतेनदृ
ग्विषयोभवति दीपसमेतानांतुतेषांतत्तद्दृग्विषयोभवति ४६ एवंभक्तियुक्तानांसम्यक्मत्प्रकाशोभवति ४७ ॥ ४७ ॥

अथ प्रतिज्ञातानि भक्तिकारणान्याह मद्भक्तेति । मद्भक्तानां निरंतरं मित्रत्वेनेत्यनुषज्यते एकादश्युपवासादिव्रतानुष्ठानं तानि ततो मद्भक्ता र्थः मम पर्वाणि पर्वोत्सवदिनानि रामनवम्यादीनि तेषामनुमोदनं तेषूत्सवकरणं ४८ परिचितिकास्ततःस्मरता ४९ ततो मद्भक्तेरधिकज्ञा नसाधनं किं न विशिष्यते न किमप्यस्तीत्यर्थः ५० तदेव स्फुटमाह अत इति ५१ ५२ ५३ अज्ञानपटलं तदेव पटलं तमस्त्यर्थः ५४ मम भक्तानां

मद्भक्तसंगो मत्सेवा मद्भक्तानां निरंतरं । एकादश्युपवासादि मम पर्वानुमोदनं ४८ मत्कथाश्रवणे पाठे व्याख्याने सर्वदा रतिः । मत्पूजापरिनिष्ठा च मम नामानुकीर्तनं ४९ एवं सततयुक्तानां भक्तिर्भवति मय्यभिचारिणी । मयि संजातभक्तेस्तु किमन्यदवशिष्यते ५० अतो मद्भक्तियुक्तस्य ज्ञानं विज्ञानमेव च । वैराग्यं च भवेच्छीघ्रं ततो मुक्तिमवाप्नुयात् ५१ कथितं सर्वमेतत्ते तव प्रश्नानुसारतः । अस्मिन्मनः समाधाय यस्तिष्ठेत्स तु मुक्तिभाक् ५२ न वक्तव्यमिदं यत्नान्मद्भक्तिविमुखाय हि । मद्भक्ताय प्रदातव्यमाहूयापि प्रयत्नतः ५३ य इदं तु पठेन्नित्यं श्रद्धाभक्तिसमन्वितः । अज्ञानपटलध्वान्तं विधूय परिमुच्यते ५४ भक्तानां मम योगिनां सुविमलस्वान्तातिशान्तात्मनां मत्सेवाभिरतात्मनां च विमलज्ञानात्मनां सर्वदा । संगं यः कुरुते सदोद्यतमतिः तस्याहमेवानिशं नानन्यधीर्मोक्षस्तस्य करस्थितोऽहमनिशं दृश्यो भवे नान्यथा ५५ इति श्रीअ० रा० आरण्यकांडे चतुर्थः सर्गः ४ ॥ ४ ॥

अतएव योगिनां मद्भक्तियोगवतां सुविमलं स्वान्तं हृदयं येषां ते च ते अतिशान्तात्मानश्च अतिशयं तत्ताश्च तेषां मत्सेवायाममभिरतं प्रीतियुक्तं आत्मा चित्तं येषां विमलज्ञानरूपस्यात्मा येषां ज्ञानविषयस्तेषां च घृताज्ञानविषयेषु समशालिनी मम निर्पसम्यक्ः मनसा सोऽनेनान्यधीस्तस्य स्वरूपस्यार्थः तस्मान्निरामहृदयस्य भवेत्स आत्मनेपरमार्थं नान्यथा तादृशं विनान दर्शनं चापि मोक्ष इत्यर्थः ५५ इति श्रीटीकायां चतुर्थः सर्गः ४ ॥ ४ ॥ ४० ॥ ४०

तस्मिन्निति महासत्त्वा महाबला १ पंचवट्यादि तच्चिन्हानि तद्युक्तानीत्यर्थः २ कामपरीतात्मा कामव्याप्तचित्ता पश्यन्ती सदा निपर्णानीतेनैव चिन्हेन रा
घवाश्रममायात ३ ४ कः किं नामा जटावल्कलाद्यैर्युक्तः आश्रमे किं वससीति शेषः कन्यवासे कते किं साध्यं तद्वद ५ अथ तत्स्वरूपं विनेव तज्ज्ञितास्मात्सं

तस्मिन्काले महारण्ये राक्षसी कामरूपिणी । विचारमहासत्त्वा जनस्थाननिवासिनी ॥ १ एकदा गौतमीतीरे पंचवट्याः समीपतः । पद्मव
ज्राङ्कुशाङ्कानि कानि पदानि जगतीपतेः ॥ २ दृष्ट्वा कामपरीतात्मा पादसौन्दर्यमोहिता । पश्यन्ती सा शनैरागाद्राघवस्य निवेशनं ॥ ३ तत्र सा तं
महानाथं सीतया सह संस्थितं । कंदर्पसदृशं रामं दृष्ट्वा कामविमोहिता ॥ ४ राक्षसी राघवं प्राह कस्त्वं कः किंनामासि मे पुत्रो जटावल्कला
द्यैः साधुः किंमिहेव वद ॥ ५ अहं शूर्पणखा नाम राक्षसी कामरूपिणी । भगिनी राक्षसेन्द्रस्य रावणस्य महात्मनः ॥ ६ खरेण सहिता
भ्रात्रा वसाम्यत्रैव कानने । राज्ञा दत्तं च मे सर्वं मुनिभक्षा वसाम्यहं ॥ ७ त्वां तु वेदितुमिच्छामि वद मे वदतां वर । तामाह रामनामाहम
योध्याधिपतेः सुतः ॥ ८ एषा मे सुंदरी भार्या सीता जनकनंदिनी । स तु भ्राता कनीयान्मे वद मे वदतां वर ॥ ९ किं कार्यं ते मया ब्रू
हि कार्यं भुवनसुंदरि । इति रामवचः श्रुत्वा कामार्ता साब्रवीदिदं ॥ १० एहि राम मया सार्धं रमस्व गिरिकानने । कामार्ता
हं न शक्नोमि त्यक्तुं त्वां कमलेक्षण ॥ ११ रामः सीतां कटाक्षेणावेक्ष्य सस्मितमब्रवीत् । भार्या ममैषा कल्याणी विद्यते ह्यनपायिनी
॥ १२ त्वं तु सापत्न्यदुःखेन कथं स्थास्यसि सुंदरि । बहिरास्ते मम भ्राता लक्ष्मणोऽतीव सुंदरः ॥ १३ तवानुरूपो भविता पतिस्तेनैव संचर । श्लक्ष्णो
स्मरणात्राह पतिर्मे भव सुंदर ॥ १४

४२

भाग्यस्यानम कुलत्वादि च बोधयितुं स्वस्वरूपमाहात्म्यमाह ६ खरेण भ्रात्रा सहितेत्यन्वयः सर्वं वनमिति
शेषः ७ ८ ९ ते किं कार्यं मया कार्यं करणीयं तद्ब्रूहीत्यन्वयः १० गिरिकानने समाहारद्वंद्वः गिरिषु काननेषु चेत्यर्थः ११ अनपायिनी सर्वदा मम
अनुपश्यामा भ्रातापत्य विपक्षा च १२ तेऽदिवा हत्वत्तितिन १३ तेनैव सह संचर गिरिकाननेष्विति शेषः १४ ॥ १४

श्री.रा.अ.आ.
१२

संगच्छावः मिथुनीभावं प्राप्नुवः १५ १६ १७ क्रोधात्तत्र्यवददिति शेषः किमवदत्तद्दाहा रामेत्यादिस्त्वनवस्थितः सत्येवचसीति शेषः तां मत्स्त्रीत्वामायेवं भ्रामुपसितामिति शेषः १८ तां परिगृह्य धृत्वा १९ २० परुषाक्षरखरध्वनिः क्रोशतीवाधवकठोरवाक् २१ एवं नासाकर्णाविहीनां मम्मैवदत मह्यं वधिष्या

भ्रातुराज्ञां पुरस्कृत्य संगच्छाशीघ्रमाचिरं इत्याह राक्षसी घोरा लक्ष्मणं काममोहिता १५ तामाह लक्ष्मणः साध्वि दासोऽहं तस्य धीमतः दासी भविष्यसि त्वं तु ततो दुःखतरं नु किं १६ तमेव गच्छ भद्रं ते स तु राजाखिलेश्वरः तच्छ्रुत्वा पुनरप्यागाद्राघवं दुष्टमानसा १७ क्रोधा द्राम किमर्थं मां भ्रामयस्यनवस्थितः इदानीमेव तां सीतां भक्षयामि तवाग्रतः १८ इत्युक्त्वा विकटाकारा जानकीमनुधावती ततो रामाज्ञया खड्गमादाय परिगृह्य च तां १९ चिच्छेद कर्णौ नासां च लक्ष्मणो लघुविक्रमः ततो घोरध्वनिं कृत्वा रुधिराक्तवपुर्द्रुतं २० क्रंदमाना पपाताग्रे खरस्य परुषाक्षरा किमेतदिति तामाह खरः खरतराक्षरः २१ केनैवं कारितासि त्वं मृत्योर्वक्त्रानुवर्तिना वद मे तं वधिष्यामि कालकल्पमपि क्षणात् २२ तमाह राक्षसी रामः सीतालक्ष्मणसंयुतः दंडकं निर्भयं कुर्वन्नास्ते गोदावरीतटे २३ मामेवं कृतवांस्तस्य भ्राता तेनैव चोदितः यदि त्वं कुलजातोऽसि वीरोऽसि जहि तौ रिपू २४ तयोस्तु रुधिरं पास्ये भक्षये सौ तु मंदधीः नो चेत्प्राणान्परित्यज्य यास्यामि यमसादनं २५ तच्छ्रुत्वा त्वरितं प्रागात्खरः क्रोधेन मूर्छितः चतुर्दश सहस्राणि रक्षसां भीमकर्मणां २६ चोदयामास रामस्य समीपं वधकांक्षया खरश्च त्रिशिराश्चैव दूषणश्चैव राक्षसः २७ सर्वे रामं ययुः शीघ्रं नानाप्रहरणोद्यताः श्रुत्वा कोलाहलं तेषां रामः सौमित्रिमब्रवीत् २८ ॥ २८

सौ त्वन्वयः २२ २३ तेन रामेण चोदितः प्रेरितः २४ २५ प्रागात्प्रस्थितः २६ रामस्य समीपं गंतुं चोदयामास प्रेरयामास वधकांक्षया येन स्य रामस्य वधकांक्षयेत्यर्थः स्ववधेच्छयेति तत्त्वार्थः २७ २८

२९ सीतां नीत्वा गृहीत्वेत्यर्थः ३० शापितोसि मम मोपरि मदीयः शापितोसि ममोपरि मदीयः शपथ इत्यर्थः ३१ पन्नः संनद्धः ३२ ३३ ३४
३५ ३६ शस्त्रव्रणानि शस्त्रजव्रणार्जितरुधिराणि सर्वाणि गतानि समत्यं संकल्प्य ताव्रकार इत्यर्थः ३७ रावणस्य पादसंनिधावुपाश्रय पातेत्यन्वयः ३८ ३९

श्रूयते विपुलः शब्दो नूनमायांति राक्षसाः भविष्यति महद्युद्धं नूनमद्य मया सह २९ सीतां नीत्वा गुहां गत्वा तत्र तिष्ठ महाबल हंतुमि
च्छाम्यहं सर्वान्राक्षसान्घोररूपिणः ३० अत्र किंचिन्न वक्तव्यं शापितोसि ममोपरि तथेति सीतामादाय लक्ष्मणो गव्हरं ययौ ३१
रामः परिकरं बध्वा धनुरुद्यम्य निष्ठुरं तस्थौ शरवर्षस्य यमो बध्वा यत्तो भवद्विभुः ३२ ततस्त्वागत्य रक्षांसि रामस्योपरि विसृपुः आयु
धानि विचित्राणि पाषाणान्पादपानपि ३३ तानि चिच्छेद रामोपि लीलया तिलशः क्षणात् ततो बाणसहस्रेण हत्वा तान्सर्व
राक्षसान् ३४ खरं त्रिशिरसं चैव दूषणं चैव राक्षसं जघान प्रहरार्धेन सर्वानेव रघूत्तमः ३५ लक्ष्मणोपि गुहामध्यात्सी
तामादाय राघवं ...ेस्म राक्षसान्दृष्ट्वा हतान्विस्मयमाययौ ३६ सीता रामं समालिङ्ग्य प्रसन्नमुखपंकजा शस्त्रव्रणानि
गात्रेषु ममार्ज जनकात्मजा ३७ सापि दुद्राव हत्वा तान्सुहृदो नीतान्राक्षसपुंगवान् लंकां गत्वा सभामध्ये क्रोशंती पा
दसंनिधौ ३८ रावणस्य पपातोर्व्यां भगिनी तस्य राक्षसः दृष्ट्वा तां रावणः प्राह भगिनीं भयविह्वलां ३९ उत्तिष्ठोत्तिष्ठ वत्से
त्वं विरूपकरणं तव कृतं शक्रेण वा भद्रे यमेन वरुणेन वा ४० कुबेरेण यथा ब्रूहि भस्मीकुर्यां क्षणेन तं राक्षसी तमुवाचेदं त्वं प्रम
त्तो विमूढधीः ४१ पानासक्तः स्त्रीविजितः षंढः सर्वत्र लक्ष्यसे चारचक्षुर्विहीनस्त्वं कथं राजा भविष्यसि ४२ खरश्च निहतः संख्ये

रा॰२

विरूपकरणं वैरूप्यमिति यावत् ४० अथवा कुबेरेण कृतं तद्ब्रूहीत्यन्वयः राक्षसाश्च हतास्तथा चतुर्दशसहस्राणि राक्षसानां महात्मना ४३
यः ४१ षंढो नपुंसकः पौरुषहीनः चारा एव चक्षूंषि तैर्विहीनः अनेन एवमपि यो वर्तते पानासक्त इत्यादि स्त्रीकरणं वा स्यामित्यर्थः ४२ ४३ ४३

श्री·रा·अ·व्या·
१३

४४ किमर्थं कस्यै प्रयोजनाय कथं केन प्रकारेणासुराः खराद्यो हताः तेषां खराद्यो हताः तेषां रामादीनां ४५ पंचवटीनाम ह्रतिशेषः ४६ ४७ ४८ द्योत

ग्र॰३

निहतानिक्षसो नैव रामेणासुरशत्रुणा जनस्थानमशेषेण मुनीनां निर्भयं कृतं तज्जानासि विमूढस्त्वमतएवमपोच्यते ४४ रा
वण उवाच कोसौ रामः किमर्थं वा कथं तेनासुरा हताः सम्यक् कथय मे तेषां मूलघातं करोम्यहं ४५ शूर्पणखोवाच जनस्थाना
देहमागां कदाचिद्वै गौतमीतटे तत्र पंचवटी नाम पुरा मुनिजनाश्रया ४६ तत्राश्रमे मया दृष्टो रामो राजीवलोचनः धनुर्बाणधरः श्रीरामा
न्जटावल्कलमंडितः ४७ कनीयाननुजस्तस्य लक्ष्मणोपि तथाविधः तस्य भार्या विशालाक्षी रूपिणी श्रीरिवापरा ४८ देवगंध
र्वनागानां मनुष्याणां तथाविधा न दृष्टा न श्रुता राजन् द्योतयंतीव तं प्रभा ४९ त्रानेतुमहमुद्युक्ता तां भार्यार्थं तवानघ लक्ष्मणेन
मततधाताच्छिन्नेदं मम नासिका ५० कर्णौ च नोदितस्तेन रामेण स महाबलः ततोहमतिदुःखेन रुदंती खरमन्वगां ५१ सोपि रा
मं समासाद्य युद्धं राक्षसयूथपैः ततः क्षणेन रामेण तेनैव बलशालिना ५२ सर्वे ते न विनष्टा वै राक्षसा भीमविक्रमाः यदि रामो मनः कु
र्यात्त्रैलोक्यं निमिषार्धतः ५३ भस्मीकुर्याच्च संदेह इति भाति मम प्रभो यदि सा तव भार्या स्यात् सफलं तु तव जीवितं ५४ अतो यतस्व
राजेंद्र यथा ते वशमाभवेत सीता राजीवपत्राक्षी सर्वलोकैकसुंदरी ५५ सांनिध्ये रामस्य पुरतः स्थातुं त्वं न क्षमः प्रभो मायया मोह
यित्वा तु प्राप्स्यसे तां रघूत्तमं ५६ ॥ ५६

द्योतयंती शोभयंती ४९ ५० ५१ राक्षसयूथपैः सह युद्धं अकरोदिति शेषः ५२ विनष्टाः विनाशिता इत्यर्थः त्वंतंभावितरायपर्थः ५३ ५४ ५५
रघूत्तमं मायया मोहयित्वा तां प्राप्स्यसे इत्यन्वयः ५६

श्रीराम·
१३

ततः त्वार्यं जरवाकं सुकेतोर्वा वैरम्भाम नवामे दोलादिभिर्भगिनीयाम्यास्मत्कृतं गृहस्य विवेशोन्वयः ५७ नृपः नाशितः शोकावेशाद् दुःक्रममेव पुनराह भ्रातेति बलेशारिरं वीर्यमानं रवलं दलं दर्पो हवाः ५८ परेशः परमात्मा वलोघैः वानरबलसमूहैः इह हिरण्येन ब्रह्मतरा ५९ अतः अस्मराज्यहास्मामहन्तरराज्य

सबलः २

श्रुत्वा तत्सूक्तवाक्ये श्वदानमानादिभिस्तथा आश्वास्य भगिनीं राजा प्रविवेश स्वकं गृहं तत्र चिंतापरो भूत्वा निद्रां रात्रौ न लब्धवा न् ५७ एकेन रामभक्तेन कथं मनुष्यमात्रेण नष्टः स्वरो मे भ्राता कथं मे बलवीर्यदर्पस्तो विनष्टो बत राघवेण ५८ यद्वा न रामो मनुजः परेशो मां हन्तुकामः सबलं बलोघैः संप्रार्थितोऽयं द्रुहिणेन पूर्वं मनुष्यरूपो रघुवंशकुलेऽभूत् ५९ वध्योऽपि दिस्यापरमात्म हैवैकुंठ राज्यं परिपालयेऽहं मोऽत्रेह दिवि राक्षसराज्यमेव भोक्ष्ये चिरं राममतो व्रजामि ६० इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे अरण्यकाण्डे पंचमः सर्गः ५ ४ इत्थं विचिंत्याखिलराक्षसेन्द्रो रामं विदित्वा परमेश्वरं हरिं विरोधबुद्ध्यैव हरिं प्रयामि द्रुतं न भक्त्या भगवान्प्रसीदेत ६१ ४४ विचिंत्यैवं निशायां स प्रभाते रथमास्थितः रावणो मनसा कार्यमेकं निश्चित्य बुद्धिमान् १ ययौ मारीचसदनं परं पारं मुदन्वतः मारीचस्तत्र मुनिवज्जटावल्कलधारकः २ ध्यायन्हृदि परात्मानं निर्गुणं गुणभासकं समाधिविरमे प्रश्यद्रावणं गृहमागतं ३ दृष्ट्वा सुत्थाय चालिंग्य पूजयित्वा यथाविधि कृतातिथ्यमुरवासीनं मारीचो वाक्यमब्रवीत् ४ समागमनमेतत्ते रथेनैकेन रावण चिंतापर इवाभासि हृदि कार्यं वि चिंतयन् ५ ॥ ५

ग्रामे ६० भक्त्या द्रुतं स्वल्पकालकृतपापहिंसाप्रसीदेत् एतद्राज्यसानन्दपूर्वं महद्राज्यं तत्प्रापयेत् ६० इति पंचमः सर्गः ५ एकं कार्यं सीताहरणमेतां पृष्टः रूपं १२ गुणाः प्रकृतितत्कार्याणि तान्भासकं ३ ४ एतदेकेन रथेन समागमनं किमर्थं तद्ब्रूहीति शेषः हृदि किं चित्कार्यं विचिंतयन् चिंतापर इवाभासि तत्कार्यं किमिति ब्रूहीति सन्वयः ५ ॥

न्यायं धर्म्यं क्रियते येन स कोपी करोमीति हे जिने पापं न स्पृशेत ६ साकेतमयोध्या ७ ब विशेषेण वनं जनैः विप्रमिति ८ ९ १० कौर्मोचिच्छेद तथा
पि निर्भयः इत्यन्वयः ११ १२ मायामृगः मागः मायामृगः मायया विचित्रमृगरूपधरः १३ सहायः सहायता १४ इदं वचः सीतोक्तमाकर्ण्य सा हन्तुं मे सर्व इत्येष

इतीमे नहि गोप्यं चेत् करवाणि तव प्रियं न्याय्यं वेदुहितं देहि जिनं मां स्पृशेच्च हि ६ रावण उवाच अस्ति राजा दशरथः साके
ताधिपतिः किल रामनामा सुतस्तस्य ज्येष्ठः सत्यपराक्रमः ७ विवासयामास तं वनं वनजनप्रियं भार्यया सहितं भ्रात्रा लक्ष्म
णेन समन्वितं ८ तस्मिन्वै विपिने घोरे पंचवट्याश्रमे शुभे तस्य भार्या विशालाक्षी सीता लोकविमोहिनी ९ रामोऽतिरूपवान्
महाराक्षसान् भीमविक्रमान् खरं च हत्वा विपिने सुखमास्ते निर्भयः १० भगिन्या मे शूर्पणखा निर्दोषा या सुनासिका कौर्मो
चिच्छेद दुष्टात्मा वने तिष्ठति निर्भयः ११ अतस्त्वया सहायेन गत्वा तत्राशु वल्लभां आनयिष्यामि विपिने रहिते राघवेण तां १२
त्वं तु मायामृगो भूत्वा ह्याश्रमादपनेष्यसि रामं लक्ष्मणं चैव तदा सीतां हराम्यहं १३ त्वं तु तावत्सहायं मे कृत्वास्याश्रमे पूर्ववत् इ
त्येवं भाषमाणं रावणं वीक्ष्य विस्मितः १४ केनेदमुपदिष्टं ते मूलघातकरं वचः स एव वध्यः सर्वेषां त्वन्नाशं प्रतीक्षते १५ राम
स्य पौरुषं स्मृत्वा चिन्तयामास शिरा वरा: बालोऽपि मां कौशिकस्य यज्ञं संरक्षणाय सः १६ आगतस्त्विषुणैकेन पातयामास सागरे
योजनानां शतं रामस्तदादि भयविकलः १७ ॥

दुरुपदेशेन तन्नाशं प्रतीक्षते दृष्टुमिच्छति स एव शत्रुर्न रामः स एव वध्यः सर्वेषामर्थः १५ रामस्य पौरुषं स्मृत्वाऽधापि मे चित्तं विकलमित्येषः स्मर्यमाणं पौरु
षं किंचिदेव निदर्शनायाह बालोऽपीति कौशिकस्य यज्ञरक्षणायागतो बालोऽपि रामः एकेनेषुणाऽनेकयोजनशतमुल्लंघ्य मां सागरे पातयामास लघुरामकर्मा
हं स्मृत्वा रामस्य वै तत्सर्वं न पश्यामि १६ १७ ॥

१८ वीक्षणाच्छृंगशृंगरूपेक्षत इति शेषः १९ २० तेनैः श्रेराकूर्जितरामागमननिश्चयेन निर्भयं २१ यद्वस्तुभोगसमूहसायनं ततो पिभीतभीतश्च सं
तद्वराद्वरामेव भावयेत देवेगोपपार्श्वभाजे इति रेफच्युते भवेभोगसाधनानामप्येषां श्चवणं रामस्मारकत्वया भजनकत्वमिति भावः २२ रामागमनशोकयाबा
ध्यकार्यं परिस्वप्नस्य निद्रागमोपि राममेव चिंतयनस्वपे इति परस्मैपरस्मैपदमार्षी २३ तेश्च दास्वमेहटेपि गतरा राघवेस्वाज्ञा नानि विषमे राघवेन स्वप्नेन बोधितोपि

स्मृत्वा स्मृत्वा तदेवां हरामं पश्यामि सर्वतः १८ इंडके पि पुनश्च हं वने सर्व वैरमनुचिंतयन् तद्दृष्टी तीक्ष्णाश्चंगमृगरूपमेकत्वमाहे दे
वैकुभिराहतोप्ययं १९ राघवं जनकजासमन्वितं लक्ष्मणेन सहितं तत्वान्वितः आगतो हमथ हन्तुमुद्यतो मां विलोक्य शरमेकमक्षिप
त २० तेनविद्ध हृदयो हमुद्भ्रमन् राक्षसेंद्र पतितास्मि सागरे तत्रभृत्सहमिदं समाश्रितः स्थानमूर्जितमिदं भयादितः २१ रामचागमिवहम
तं विभावये भीत भीतदृढ भोगराशितः राजरत्नरमणीरथादिकं श्रोत्रयोर्यदि गतं भयं भवेत् २२ रामचागत इहेति शंकया बाध्यका
र्यमपि सर्वमत्यजं निद्रया परिहृतो यदा स्वपे राममेवमनसानुचिंतयन् २३ स्वप्नदृष्टिगतराघवं तदा बोधितो विगतनिद्र आस्थितः त
त्वया नृपविमुच्य राघवं हा यहं प्रति शृंगे प्रियाहितो २४ रक्षराक्षसकुलं विराम तत्तत्स्मृतो सकलमेव नश्यति तद्धितं वद तो मम
भाषितं परिगृहाण राघवात्मनि राघवे २५ स जविरोधमति भजभक्तितः परम कारुणिको रघुनंदनः स्वहमपि शुभमिदं मुनिवाक्यतोऽ
श्रुणवमादि युगे परमेश्वरः २६

गतनिद्र आस्थित आसने भवेयमिति शेषः राघवं प्रत्यायहं हे विमुच्यान्वयः २४ विरामं तं चेत्सारहद्धिं प्रामे राक्षस कुलं रक्ष एवं विशेषेन तत्स्मृतो सक
लमेव रक्षः कुलेन नश्यति राघवे तद्विषये २५ विरोधमति विरोधसंबुद्धिं कामेति पुनरपि तद्विशेषान्निश्चमयेरति हांसां गमाह स्वमहमपि मुनिरच्चनारद
आदि युगे सत्ययुगे २६ ॥ २८ ॥ २६ ॥

तत्र वक्ष्ये नीतिशेषः मानुषं वपुर्धत्स्वेति शेषः २७ दशरथस्यात्मजत्वं भावं दशरथपुत्रत्वं प्राप्य अंजसा शीघ्रमेव २८ २९ ३० सत्यसंकल्प इत्यन्वयः
राघवात् राघवं वेत्स्यपितेत्यर्थः ३१ यद्वा रामाद्वधं प्राप्य मरतिहे वीरापरमेदं प्राप्स्यामि ३२ अतो निश्च· अतः उत्तिष्ठ इति शेषः ३३ यथा पुरा

ब्रह्मणार्थितस्त्वावं नृहरिः किं न वेत्सि तमहं कथयामि तत ब्रह्मणोक्तमरविंदलोचनं त्वं वधाय हि भुवि मानुषं वपुः २७ दशर
थात्मजत्वमजत्तिलि रिपुं दशकंधरं हरे अतो न मानुषो रामः साक्षान्नारायणोऽव्ययः मायामानुषवेषेण वनं प्राप्तोऽतिनिर्भयः २८ भू
भारहरणार्थाय गच्छ तात गृहं सुखं श्रुत्वा मारीचवचनं रावणः शत्रुमाषत २९ परमात्मा यदा रामः प्रार्थितो ब्रह्मणा किल मां हंतु
मानुषो भूत्वा पत्न्या दिक्षु समागतः ३० करिष्यत्यचिरादेव सत्यसंकल्प ईश्वरः अतो हयत्नतः सीतां मानेष्याम्यमराघवात् ३१ व
धेन्मां समरे रामो वीरः प्राप्स्यामि परं पदं यद्वा रामं रणे हत्वा सीतां प्राप्स्यामि निर्भयः ३२ अतो [illegible] चित्रमृगरूपधृक् रामलक्ष्म
णादीघ्रमाश्रमाद्भिदूरतः ३३ आक्रम्य गच्छ त्वं शीघ्रं सुखं तिष्ठ यथा पुरा अतः परं चेद्यत्किंचित्भाषसे मद्विभीषणं ३४ हनिष्या
म्यसिनानेन त्वामद्यैव न संशयः मारीचस्तद्वचः श्रुत्वा स्वात्मन्येवानुचिंतयन् ३५ यदि मां राघवो हन्यात्तदा मुक्तो भवार्णवात् मां हन्याद्यदि
चेद्दुष्टस्तदा मे निरयो ध्रुवः ३६ इति निश्चित्य मरणं रामादुत्थाय वेगतः अब्रवीद्रावणं राजन् कुतोभ्यातं तवप्रभो ३७ इत्युक्त्वा रथमारुह्य
गतो रामाश्रमं प्रति भूत्वा हेमनदरुपो मृगो भूत्वाप्यगादुकं ३८ रत्नशृंगो मणिखुरो नीलरत्नविलोचनः विद्युत्प्रभो विमुग्धास्यो विचचार
वनांतरे ३९ ॥ ३९

यथापूर्वमत्राश्रमे सुखं तिष्ठेत्यन्वयः ३४ ३५ भवार्णवान्मुक्तो भविष्यामीति शेषः ध्रुवं भविष्यतीति शेषः ३६ रामान्मरणमेव सम्यगिति निश्चि
त्य ३७ गतो मारीचिरावणौ जातः कुत्सितवर्णा ३८ विद्युत्वसुंदरमास्यं यस्य सः ३९ ॥

त्रिश्चमहाभागवि ५

४० पुनर्भयादृतः पलायनइतिशेषः ४१ इटीकायांषष्ठःसर्गः ६ अथेतित्वदाकारंगगकारऽगाकोरोमस्यास्तांस्थापयित्वा बहिरिंगितिशेषः २ ३ ४
५ ६ अपंसुरस्कीडार्थोमृगःक्रीडामृगोभवत्वितिसन्वयः ७ मायिनःछलकर्तारः ८ अवहितःसावधानःमृगरूपधृगयमारीचएवनेमृगोत्रनसंदेहः ९ । १०

रामाश्रमपदस्यांतेसीतादृष्टिपथेचरन् ४० क्षणंचधावन्सवतिष्ठंतेक्षणंसमीपमागत्यपुनर्भयाद्दृतः एवंसमापामृगवेषरूपधृकुच
चारसीतापरिमोहयन्बलः ४१ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेषष्ठःसर्गः ६ रामअथरामोपिनस्तंज्ञात्वा
रावणचेष्टितं उवाचसीतामेकांतेशृणुजानकिमद्वचः १ रावणोभिक्षुरूपेणआगमिष्यतितेंतिकं त्वंतुछायांतदाकारांस्थापयित्वो
टजेविश २ अग्नावदृश्यरूपेणवर्षंतिष्ठममाज्ञया रावणस्यवधांतेमांपूर्ववत्प्राप्स्यसेशुभे ३ श्रुत्वारामोदितंवाक्यंसापितत्रतथाकरोत्
मायासीतांबहिःस्थाप्यस्वयमंतर्दधेनले ४ मायासीतातदापश्यन्मृगंमायाविनिर्मितं हसंतीराममभ्येत्यसप्रोवाचविनयान्विता ५
पश्यराममृगंचित्रंकानकंरत्नभूषितं विचित्रबिंदुभिर्युक्तंचरंतमकुतोभयं ६ बध्वादेहिममक्रीडामृगोभवतुसुंदरः तथेतिधनुरादा
यगच्छन्लक्ष्मणमब्रवीत् ७ रक्षत्वमपियत्नेनसीतांमत्प्राणवल्लभं मायिनःसंतिविपिनेराक्षसाघोरदर्शनाः ८ अतोत्रावहि
तःसाध्वीरक्षसीतांमनिंदितां लक्ष्मणोराममाहेदंदेवायंमृगरूपधृक् मारीचोत्रनसंदेहएवंभूतोमृगःकुतः ९ श्रीरामउवाच
यदिमारीचएवायंतदाहन्मिनसंशयः मृगश्चेदानयिष्यामिसीताविश्रामहेतवे १० गमिष्यामिमृगंबध्वाशीघ्रंस्वायामयिष्यामिसत्व
रः त्वंयत्नेनसंतिष्ठसीतासंरक्षणोद्यतः ११ ॥ ११

एतदुद्देशेनमागाःएवंभूतोमृगःकुतोनकुत्रापीसर्थः ९ १० अतोहमित्यादिर्गमिष्यामीसादे ११ ॥ ११ ॥ ११

श्री·रा·अ·आ·
१६

जगदाकृतिः जगद्रूपेण परिणममाना ११ हरिः रामः इति सत्यं कर्तुं वचः स्वं कर्तुं मारीचं जानन्नपि सीताप्रियार्थं प्रसीताप्रियरूपमर्थमस्मादिश्य मृगमन्वधावत्
चित्यर्थः अन्यमारीचस्य रामान्मरणमश्रेयष्टकं ज्ञानतः स्वस्मिन्प्रेममन्नपारस्य भक्तस्य निरर्थपनस्यं तमनोमं थं पूर्वमपि तु रावणस्य च पूर्वं विचारेणा निराता भक्तस्य मनोरथ
शरीरं तु तस्ंकपघागतसहितार्थः १३ १४ अभ्याशे समीपे १५ १७ रामवद्वाचं रामवाक्तुल्यवाचं १९ सर्वभगवन्नामयुक्तनामाह यन्नामेति तेषयनेन

इत्युक्त्वाथ ययौ रामो मायामृगमनुद्रुतः माया यदाश्रया लोकमोहिनी जगदाकृतिः ११ निर्विकारश्चिदात्मापि पूर्णोऽपि मृगमन्वगात भक्तानुकंपी भगवानृतमिति सत्यं वचो हरिः १३ कर्तुं सीताप्रियार्थाय जानन्नपि मृगं ययौ अन्यथा सर्वकामस्य रामस्य विदितात्मनः १४ मृगेणाद्भुतमात्रापि किं कार्यं परमात्मनः कदाचिद्दृश्यतेऽभ्याशे क्षणाद्धावति लीयते १५ दृश्यमेवं ततो दूराद्देवं रामं प्रयाह्नात ततो रामोऽपि विज्ञाय राक्षसोऽयमिति स्फुटं १७ विव्याध शरमादाय राक्षसं मृगरूपिणं पपात रुधिराक्तास्यो मारीचः पूर्वरूपधृक् १८ हा हतोऽस्मि महाबाहो त्राहि लक्ष्मण मां द्रुतं इत्युक्त्वा रामवद्वाचं पपात रुधिराननः १९ यन्नामाज्ञोऽपि मरणे स्मृत्वा तत्साम्यमाप्नुयात् किमुताग्रे हरिं पश्यन्तेनैव निहतोऽसुरः २० तद्देहादुत्थितं तेजः सर्वलोकस्य पश्यतः राममेवाविशद्देवा विस्मयं परमं ययुः २१ किं कर्म कृत्वा किं प्राप्तः पापकृन्मुनिहिंसकः अथवा राघवस्यायं महिमा नात्र संशयः २२ रामबाणेन संविद्धः पूर्वं राममनुस्मरन् भयात्सर्वं परित्यज्य गृहवित्तादिकं च यत् २३ ॥

८२

न हतोऽसुरः सायुज्यमाप्स्यतीति किमुत वक्तव्यमिति शेषः २० तद्देहस्य देहमाह तद्देहादिति तस्य रामप्रवेशं दृष्ट्वा देवाः परमं विस्मयं आश्चर्यं ययुः राम
महिमविषये इति शेषः २१ तदेवाह किमिति किं प्राप्तः किं फलं प्राप्तः २२ रामभयाद्देहगेहादिकं परित्यज्य सर्वं मामपि रामं स्मरन्स्थित इति शेषः २३

श्री·राम·
१६

तादृशः सन्नत्स्मृतिहृष्टी कृताशेषपापौ तेन रामेणानिहतो रामं पश्चाच्छममेवाप स्वस्वभगवद्रूपमेव वैराग्यादितानेन सकलमुक्तिसाधनसंपन्नः के
जातमिति स्वचित्ते मुख्यं तत्पेतेदेवसर्वसाधनमिति मंत्र्य २४ २५ २६ किमनेनाशङ्क्य किमर्थं मृतः किं भवेत्तद्विमरसाभवेत् २७ भीताभीते वेस्वार्थः

त्वद्गिरा मे सदा ध्यात्वा निर्धूताशेषकल्मषः । त्वं तेरामेणानिहतः पश्चात्पदमवाप्स्यसि ॥ २४ ॥ द्विजो वा राक्षसो वापि पापी वा धा
र्मिकोऽपि वा । त्यजन्कलेवरं राम स्मृत्वा याति परं पदम् ॥ २५ ॥ इति निश्चित्य मनसा मायामृगवपुर्द्विजाः । रामस्तं हितमानायम्रियमाणो
सुराधमः ॥ २६ ॥ हा लक्ष्मण हतोऽस्मीति महाकायमनुवन्ममार किं । श्रुत्वा महाकायसदृशं सीतापि किं भवेत् ॥ २७ ॥ इति चिंतापरो राम्याम्यामो
हरान्प्रवर्तत । सीतातद्भाषितं श्रुत्वा मारीचस्य दुरात्मनः ॥ २८ ॥ भीतातिदुःखसंविग्ना लक्ष्मणं त्विदमब्रवीत् । गच्छ लक्ष्मण वेगेन
भ्राता तेऽसुरपीडितः ॥ २९ ॥ हा लक्ष्मणेति वचनं भ्रातुस्तेन श्रुणोषि किं । सामाह लक्ष्मणो देवि रामस्त्वां कं ननु तद्भवेत् ॥ ३० ॥ यः क
श्चिद्राक्षसो देवि म्रियमाणो ब्रवीद्वचः । रामस्त्रैलोक्यमपि यः क्रुद्धो नाशयति क्षणात् ॥ ३१ ॥ सकं पूर्वं हीनवचनं भाषाते मरपूजितः । क्रु
द्धा लक्ष्मणमालोक्य सीता बाष्पविलोचना ॥ ३२ ॥ हा लक्ष्मण दुर्बुद्धे भ्रातुर्मरणमिच्छसि । प्रेषितो भरतेनैव रामनाशाय राघवः सो
त्वं भोगीर्हरणो तत्र हि रामहन्ये नस्त्वं मामितो वाभरतमेववा ॥ ३५ ॥ इत्युक्त्वा वध्यमाना सा स्वबाहुभ्यां रुरोद ह । तच्छ्रुत्वा लक्ष्मणः
कर्णौ पिधाय तातीव दुःखितः ॥ ३६ ॥ मामेवं भाषसे चण्डि धिक् त्वां नाशमुपैष्यसि । इत्युक्त्वा वनदेवीभ्यः समर्प्य जनकात्मजां ॥ ३७ ॥

यद्वा स्मामापासीता त्वात्मायुर्यैव वाक्त्वा भीतिः २९ ततराम नाकं न तस्य भयलेशाभावात् किंतु म्रियमाणस्य राक्षसस्येदं वचः तदेवाह
मर्शत ३० ३१ ३२ ३३ ३४ ३५ स्वबाहुभ्यामात्मानं वध्यमाना ताडयमाना रुरोद कर्णौ पिधाय इदं पापमेषा वदतीति तत्स्य श्रवणायोग्य
त्वात्कर्णापिधानं ३६ नाशमदर्शनं ३७ ॥ ३८

३८ ३९ ४० तेप्रियंत्वयोग्यानिष्यकरोमीतिशेषः ४१ ततःत्वहृत्तांतश्रवणानंतरं ४२ ४३ ४४ ४५ त्वंगुहंस्वनगरंलंकाख्यंनेतुमा

यद्येोदुःखानिमेविरोरामपेवशनैःशनैः ततोंतरंसमालोक्यरावणोभिक्षुवेषधृक् ३८ सीतासमीपमगमत्स्फुरद्दंडक
मंडलुः सीतातमवलोक्याशुनत्वासंपूज्यभक्तितः ३९ कंदमूलफलादीनिदत्त्वास्वागतमब्रवीत् मुनेभुंक्ष्वफलादी
निविश्रमस्वयथासुखं ४० इदानीमेवभर्तामेत्यागमिष्यतितेप्रियं करिष्यतिविशेषेणातिथिस्त्वंयदिसेव्यते ४१ भिक्षुरुवा
च कात्वंकमलपत्राक्षिकोवाभर्त्तातवानघे किमर्थमत्रवसतिवनेराक्षससेविते ब्रूहिभद्रेततःसर्वंस्ववृत्तांतंनिवेदय ४२ सी
ताउवाच अयोध्याधिपतिःश्रीमान्राजादशरथोमहान् तस्यज्येष्ठःसुतोरामःसर्वलक्षणलक्षितः ४३ तस्याहंधर्मतः
पत्नीसीताजनकनंदिनी तस्यभ्राताकनीयांश्चलक्ष्मणोभ्रातृवत्सलः ४४ पितुराज्ञांपुरस्कृत्यदंडकेषुसमागतः चतुर्दश
समास्त्वांतुज्ञातुमिच्छामिमेवद ४५ भिक्षुरुवाच पौलस्त्यतनयोहंतुरावणोराक्षसाधिपः त्वत्कामपरितप्तोहंत्वांनेतुमिहआगतः
४६ मुनिवेषेणरामेणकिंकरिष्यसिमांभज भुंक्ष्वभोगान्मयासार्धंत्यजदुःखंवनोद्भवं ४७ श्रुत्वातद्वचनंसीताभीताकिंचि
दुवाचतं यद्येवंभाषसेमांत्वंनाशमेष्यसिराघवात् ४८ आगमिष्यतिरामोपिक्षणांतिष्ठमहाभुजः मांकोधर्षयितुंशक्तोहरे
र्भार्यांशशोयथा ४९ रामबाणैर्विभिन्नस्त्वंपतिष्यसिमहीतले इतिसीतावचःश्रुत्वारावणःक्रोधमूर्छितः ५० स्वरूपंदर्श
यामाससमहापर्वतसन्निभंदशास्यंविंशतिभुजंकालमेघसमप्रभं ५१ ॥ ५१ ॥

गतइत्यन्वयः ४६ ४७ यत्स्माद् एवंभाषसेतत्तोराघवान्नाशमेष्यसि ४८ महाभुजोरामस्त्वागमिष्यतीत्यन्वयः हरेःसिंहस्यशशकःक्षुद्रमृगः

ततस्तु रावणः स्वरूपेण रथेन वैदेहीं विदार्य भूमिं हा पापस्त्वामपि तु मशक्तः तां तां बाहुभिर्नाम पुरुहूतमुखः सकाशादुपरि तादुपरि त्वरात् ५२ तोलयित्वा बाहुभ्यां मारमनुमाय
५३ पश्यन्ती च्यासा क्षितिशेषः ५४ ५५ सद्यः पुत्रे प्रश्नं पृष्टा पुनः स्वलोकनाथस्य रामस्य भार्यां हृत्वा मम मागतः को गच्छतीत्यन्वयः ५६ ५७ स्वमर

ततः हस्ताव वनदेव्यश्च भूतानि च तत्रसुः ततो विदार्य धारणीं नखैरैव हृत्वा बाहुभिः ५२ तोलयित्वा रथे क्षिप्त्वा मध्ये सिंध्य विहायसा हा राम हा
लक्ष्मणेति तत्र रती जनकात्मजा ५३ भयेङ्गि न्नममादीना पश्यन्ती भुवमेव सा कृत्वा नतकं दितदिनं सीता पाप पक्षिसत्तमः ५४ जटायुः कृस्थितः
श्रीघ्रं नग्ना तीक्ष्णतुंडकः तिष्ठ तिष्ठेति तं प्राह को गच्छति ममाग्रतः ५५ भुषित्वा लोकनाथस्य भार्यां सूक्ष्मा हृत्वा लयमान् पुनः को मे वृषसंतं त्वपुरोभाग
मिवाधरे ६ इत्युक्त्वा तीक्ष्णा तुंडेन तत्रसीराम मासनं दृश्य विहाव विभेद पादाभ्यां चूर्णा [illegible] पाशमासनं हनुः ५१ ततः सीता
परित्यज्य रावणः खड्गमादद्दे चिच्छेद पक्षौ सामर्षः पक्षिराजस्य धीमतः ५८ पपात किंचिच्छेषैः प्राणो न तु विपक्षिराट् पुनः स्वरथेनाशु
सीतामादाय रावणः ५९ क्रोशंती राम रामेति त्रातारं नाधिगच्छति हा राम हा जगन्नाथ मां न पश्यसि दुःखिता ६० रक्षसा नीयमानां त्वां
भार्यां मोचय राघव हा लक्ष्मण गुणाभागत्वा क्षिमामयराधिनी ६१ वाक्शरेणाहतं त्वं मे क्षंतुमर्हसि देवर इत्येवं क्रोशमानां तां समागमनं
कया ६२ जगाम वायुवेगेन सीतामादाय सत्वरः विहायसा नीयमाना सा सीता पश्यद्धो मुखी ६३ पर्वताग्रे स्थितान्पंच वानरान्वारिजा
नना उत्तरीयार्धखंडेन विमुच्याभरणादिकं वर्ध्वविक्षेपरामाय कथयंतीति पर्वते ६४ ततः समुद्रमुल्लंघ्य लंकां गत्वा स राक्षसः स्वा
तःपुरे रहस्येतामशोकविपिने क्षिपत् ६५ ॥ ६५

येनमायाकल्पितेन सीतामादायागच्छदिति शेषः ५९ को हि सीतां मां न पश्यसि मां किं
न पश्यसीत्यर्थः ९ वं विललापेति शेषः ६० ६१ ६२ जगाम रावण इति शेषः ६३ स्त्राभरणादिकं विमुच्य उत्तरीयार्धखंडेन बध्वा रामाय कथयंतीति निप
वेते विक्षेप च्यवने नस्त्रीचरित्रस्य रामवक्तृत्वमता सूचिता ६४ रहसि रक्षांते गुप्तदेशे ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥

अनुपालयत अन्वपालयदित्यर्थः अद्भुभावआर्षः ६६ परिकर्मशरीरसंस्कारादिः ६७ इतिटीकायांसप्तमःसर्गः ७ ॥ ७ ॥ रामस्मृतिंगतेसीतारक्षकत्वेनस्व
यंस्थापितेलक्ष्मणामित्यर्थः १ आत्मनिस्वचित्ते २ ननुलक्ष्मणोपर्यपिनज्ञानातितयापितंज्ञानासेवतत्राहतथापीति ३ तादृशशोकफलमाहपद्यद्वयमिति ४ अ

राक्षसीभिःपरिहृतांपापात्बुध्यानुपालयत् ६६ कृशातिदीनापरिकर्मवर्जितादुःखेनशुष्यद्वदनातिविह्वला हारामेतिविलपमानासीताऽपि
राक्षसहृदमध्ये ६७ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेसप्तमःसर्गः ७ रामोमायाविनंहत्वाराक्षसंकामरूपिणं
।प्रतस्थेस्वाश्रमंगंतुंततोदूराद्ददर्शनं १ आयांतंलक्ष्मणंदीनंमुखेनपरिशुष्यता राघवश्चिंतयामासस्वात्मन्येवमहामतिः २ लक्ष्मणास्त
त्जानातिमायासीतांमयाकृतां ज्ञात्वाप्येनंवंचयित्वाशोचामितोयथा ३ यद्यहंविरतोभूत्वातूष्णीस्यांस्वमंदिरे तदाराक्षसकोटीनांवधोपा
यःकथंभवेत् ४ यदिशोचामितांदुःखसंतप्तःकामुकोयथा तदाक्रमेणानुचिन्वन्सीतांयास्येसुरालयं रावणंसकुलंहत्वासीता
मग्नोस्थितांपुनः ५ मयैवस्थापितांनीत्वायास्यामितोध्यामग्नंतद्विजः अहंमनुष्यभावेनजातोस्मिब्रह्मणार्थितः ६ मनुष्यभा
वमापन्नःकिंचित्कालंवसामिको ततोमायामनुष्यस्यचरितेमेनुम्हृरवतां ७ मुक्तिःस्यादप्रयासेनभक्तिमार्गानुवर्तिनां
निश्चित्यैवंतदाहस्यान्लक्ष्मणंवाक्यमब्रवीत् ८ ॥ ८ ॥

सुरालयंलंकां ५ नीतागाम्यअयोध्यांयातांगत्वा। एतत्किमर्थंतत्रानुगोपुनः तत्राहब्रह्मणाप्रार्थितोहंमनुष्यभावेनजातोस्मि एवंचतत्रावसंत
सत्यांमेतदितिभावः ६ ननुरावणंवधोत्तरंपुनरयोध्यागमनेनतत्रस्थानेनवानफलंतत्राहमनुष्यभावेमिमितिभक्तमुक्तिरेवतत्फलमितिभावः ७ ८

नीतावेतिस्थाने वयोरसंमानिच्छेत्रद्रक्ष्येऽस्मनवस्थां प्राप्नोमीति भावः ९ १० मयासांत्विता मां प्रीणयेचेत्यर्थः यद्युक्तं सीतये तिशेषः ११ तथापि स्त्रीस्वभावादेवं तद्दुक्तावपि १३ सत्यं कृत्वा सत्यम् यद्यस्मान बांतमत्कान्ताऽसमेतेन तदनुचितं कृतमित्यन्वयः १४ १५ महिहार्यममामोहार्यं कक्कचित् विलीयसे किमित्यर्थः १६ आविन्त्य

किमर्थमागतोसि निनांसत्कामममप्रियां नीता वा भक्षिता वापि राक्षसैर्जनकात्मजा ९ लक्ष्मणः प्रांजलिः प्राह सीतायाः दुर्वचो रुदन् हा लक्ष्मणेति वचनं राक्षसेनोक्तमक्षतेतया त्वद्दासदृशं श्रुत्वा मां गच्छेति त्वराब्रवीत् १० रुदंती सा मया प्रोक्ता देवि राक्षसभाषितं नेदं रामस्य वचनं स्वस्था भव शुचिस्मिते ११ शृण्वेवं सांत्विता साध्वी मया प्रोवाच मां पुनः यदुक्तं दुर्वचो राम न वाच्यं पुरतः स्तव १२ कर्णौ पिधाय निर्गत्य यातोऽहं त्वां समीक्षितुं रामस्तं लक्ष्मणं प्राह तथाप्यनुचितं कृतं १३ त्वया स्त्रीभाषितं सत्यं कृत्वा त्यक्त्वा शुभाननां नीता वा भक्षिता वापि राक्षसैर्नात्र संशयः १४ इति चिंतापरो रामः स्वाश्रमं त्वरितो ययौ तत्राहृष्ट्वा जनकजां विललापाति दुःखितः १५ हा प्रिये क्व गतासि त्वं नासि पूर्ववदाश्रमे अथवा मद्विमोहार्थं लीलया क्व विलीयसे १६ इत्याविन्वन्वनं सर्वं नापश्यज्जानकीं तदा वनदेवाः कुतः सीता ब्रूवंतु मम वल्लभां १७ मृगाश्च पक्षिणो वृक्षा दर्शयंतु मम प्रियां इत्येवं विलपन्नेव रामः सीतां न कुत्रचित् १८ सर्वतः सर्वथा क्वापि नापश्यद्रघुनंदनः आनंदोप्यन्वशोचत्तां अचलोप्यनुधावति १९ ॥ १९ ॥ १९

अन्वेषयन् कुतः कुत्रेत्यर्थः कचित्कुत्रेत्यपपाठः १७ मृगादयो मादिसंबोधनानि कुत्रचित्तदर्शनेतिशेषः १८ सर्वथा सर्वप्रकारेण पश्यन्न पि क्वापि देशे नापश्यत् पश्यंतं दृष्ट्वान्यः सर्वशक्तिसमृद्धो दानामन्वशोचन्नचलोप्यनुधावतीति न कर्तृकः शोकोऽचलकर्तृकं धावनं महदाश्चर्यमिति भावः १९ ॥ १९ ॥

निर्ममत्वादिगुणोपि ममजायेति विललाप मायागृहीतमनुष्यत्वस्य लोकानुसारित्वेन प्रमायमितुमिति भावः अतिदुःखितःसद्व २० तदेवाह एवमिति असक्तोपि आ
सक्तिरहितोपि २१ छत्रचापमित्यत्र भग्नमित्यनुकर्षः २२ नीयमानां जनकजां दृस्वाऽन्यं जित्वा तां जहार तच्चिन्हमिदं पश्येत्यन्वयः २३ पर्वतसन्निभं तत्सदृशांक

निर्ममो निरहंकारोप्यखंडानंदरूपवान् ममजायेति सीतेति विललापाति दुःखितः १० एवं मायामनुचरन्नसक्तोपि रघूत्तमः आ
सक्त इव मूढानां भाति तत्वविदां नहि २१ एवं विचिन्वन् सकलेषु वनेषु रामः सलक्ष्मणः भग्नं रथं छत्रचापं कूबरं पतितं भुवि २२ दृस्वाल
क्ष्मणमाहेदं पश्य लक्ष्मण केनचित् नीयमाना जनकजा तं जित्वान्यो जहार तां २३ ततः किंचिद्दूरो भागं गत्वा पर्वतसन्निभं रुधिराक्त
क्तवपुर्दृस्वा रामो वाक्यमथाब्रवीत् २४ एष वै भक्षयित्वा तां जानकीं शुभदर्शनां शेते विविक्ते तिष्ठन्तः पश्य हन्मि निशाचरं २५ चा
पमानय शीघ्रं मे बाणं च रघुनंदन तच्छ्रुत्वा रामवचनं जटायुः प्राह भीतवत् २६ मां न मारय भद्रं ते त्वित्प्रियं मा राघव कर्मणा अहं जटायु
स्ते भार्यां हारितां मम बधूनः २७ रावणं तत्र युद्धे मे बभूवातिविमर्दनं तस्य वाहान् रथं चापं छित्वाहं तेन घातितः २८ पतितोस्मि जगन्नाथ
प्राणांस्त्यक्ष्यामि पश्य मां तच्छ्रुत्वा राघवो दीनं कंठप्राणं ददर्श ह हस्ताभ्यां संस्पृशन् रामो दुःखाश्रुवृतलोचनः ३० जटायो ब्रूहि मे भार्या केन
नीता शुभानना मत्कार्यार्थं हतोसि त्वं मत्तो मे प्रियबांधवः ३१ जटायुः स्खलया वाचा वक्त्राद्रक्तं समुद्वमन् उवाच रावणो राम राक्षसो भीम
विक्रमः ३२ ॥ ३२ ॥

रिद
१६७

रुधिराक्तवपुरिति कर्मधारयः २४ विविक्ते एकांते २५ २७ रावणमिति पूर्वार्धेन्वयि छित्वा स्थितास्मि तेनाहमित्यन्वयः २८ २९ ३० ३१ ३२

३३ म्रियमाणेन मेऽनघेत्यर्थः ३४ पुनः स्पर्शेन त्वत्प्रसादेन स्पर्शेन ते पदं यास्यामीत्यन्वयः ३५ स्मयन् पक्षिराजोऽप्येवंपराक्रमः एवं ज्ञानमित्याश्चर्यवान्
३६ बंधुवदनुशोचित्वा अनेन तिरश्चामपि श्रीरामदासानां चित्तसाम्राज्यं चित्रमिति दर्शितं ३७ ३८ भक्षंतु भक्षयंतु ३९ इत्युक्त्वेति सार्धैकल्पम् ४० ४२

आदाय मैथिलीं सीतां दक्षिणाभिमुखो ययौ इतो वक्तुं न मे शक्तिः प्राणांस्त्यक्ष्यामि तेऽग्रतः ३३ दिष्ट्या दृष्टोऽसि राम त्वं म्रियमाणेन मेऽनघ परमात्मासि विष्णुस्त्वं मायामनुजरूपधृक् ३४ अन्तकालेऽपि दृष्ट्वा त्वां मुक्तोऽहं रघुसत्तम हस्ताभ्यां स्पृश मां राम पुनर्यास्यामि ते पदं ३५ तथेति रामः पस्पर्श तदङ्गं पाणिना स्मयन् ततः प्राणान्परित्यज्य जटायुः पतितो भुवि ३६ रामस्तमनुशोचित्वा बंधुवत्साश्रुलोचनः लक्ष्मणेन समानाय्य काष्ठानि प्रददाह तं ३७ स्नात्वा दुःखेन रामोऽपि लक्ष्मणेन समन्वितः हत्वा वने मृगं तत्र मांसखण्डान्समन्ततः ३८ शाद्वले प्राक्षिपद्रामो ऽस्य कृत्यस्य नैकधा भक्षन्तु पक्षिणः सर्वे तृप्तो भवतु पक्षिराट् ३९ इत्युक्त्वा राघवः प्राह जटायो गच्छ मत्पदं मत्सारूप्यं भजस्वाद्य सर्वलोकस्य पश्यतः ४० ततोऽनन्तरमेवासौ दिव्यरूपधरः शुभः विमानवरमारुह्य भास्वरं भानुसन्निभं ४१ शङ्खचक्रगदापद्मकिरीटवरभूषणैः द्योतयन्स्वप्रकाशेन पीताम्बरधरोऽमलः ४२ चतुर्भिः पार्षदैर्विष्णोस्तादृशैरभिपूजितः स्तूयमानो योगिगणैः राममाभाष्य सत्वरः कृताञ्जलिपुटो भूत्वा तुष्टाव रघुनन्दनं ४३ जटायुरुवाच अगणितगुणमप्रमेयमाद्यं सकलजगत्स्थितिसंयमादिहेतुं उपरमपरमं परात्मभूतं सततमहं प्रणतोऽस्मि रामचंद्रं ४४ ॥

द्योतयन् आकाशमिति शेषः ४२ राममाभाष्य रामं संबोध्य ४३ अगणितगुणं अनंतशक्तित्वात् अप्रमेयं देशकालापरिच्छेद्यं संयमो ना
जन्म उपरमः शान्तिरेव परमा शोभा यस्मिन्तं ४४ ॥ ४५ ॥ ४५ ॥

निरवधिसुखमिन्दिरेति सुखं सा अवधिका यस्मिन्भावः इंदिरा लक्ष्मीः तस्याः कटाक्षस्तस्मिन्क्षपितो नाशितो येन तत्तदीयदुःखं क्षपितमिन्द्रार्थः ४५ इं
हितप्रदानेन कं हितदानस्वभावं सुरागमूले शोभनो रागः प्रीतिस्तस्य मूलमाद्यप्रवर्तितं तत्र कृतं तस्यान्ते ४६ भवविपिनस्य दवाग्निभूते नामधे
यं यस्य तं रचितनयाय सुनाततत्समदर्शनं दुर्गतिहरं ४७ अविरतं भवस्य संसारस्य भावना येषां तत्स्वभावनायेषां तेषामतिहरः भवसमुद्रस्य सु

निरवधिसुखमिन्दिराकटाक्षं क्षपितसुरेन्द्रचतुर्मुखादिदुःखं नरवरमनिशं नतोऽस्मि रामं वरदमहं वरचापबाणहस्तं ४५ त्रिभुवन
कमनीयरूपमीड्यं रविशतभासुरमीहितप्रदानं शरणदमनिशं सुरागमूले कृतनिलयं रघुनंदनं प्रपद्ये ४६ भवविपिनदवाग्नि
नामधेयं भवमुखदैवतदैवतं दयालुं दनुजपतिसहस्रकोटिनाशं रचितनयाम सदृशं हरिं प्रपद्ये ४७ अविरतभवभावनातिदूरं भवविमु
खैर्मुनिभिः सदैव दृश्यं भवजलधिसुतारणाङ्घ्रिपोतं शरणमहं रघुनंदनं प्रपद्ये ४८ गिरिशगिरिसुतामनोनिवासं गिरिवरधारिणमी
हिताभिरामं सुरवरदनुजेन्द्रसेविताङ्घ्रिं सुरवरदं रघुनायकं प्रपद्ये ४९ परधनपरदारवर्जितानां परगुणभूतिषु तुष्टमानसानां परहितनि
रतात्मनां सुसेव्यं रघुवरमंबुजलोचनं प्रपद्ये ५० स्मितरुचिरविकासिताननाब्जमतिसुलभं सुरराजनीलनीलं सितजलरुहचा
रुनेत्रशोभं रघुपतिमीशगुरोर्गुरुं प्रपद्ये ५१ ॥

तारणे अङ्घ्रिरूपः पोतो यस्य तं ४८ गिरिशः शिवः गिरिसुता पार्वती तयोर्मनसि निवासो यस्य तं गिरिवरधारिणं च यमेव कृष्णो मा भिति भावः
ईहितैः चेष्टितैः अभिरामं अभिरामचेष्टितमिति यावत् सुरवरदं ४९ परगुणादिषु तुष्टमीर्ष्यारहितमानसं येषां ५० स्मितेनेषद्धासेन रुचिरं
विकासितमाननाब्जं यस्य सुरराजनीलं इन्द्रनीलमणिः ईशगुरोर्ब्रह्मणः ५१

यंध्येकोपिशक्नुवन्तिस्तेष्वनेकदृष्टमेकोपित्वगुणाभेदाद्रूपादिसंज्ञकः स्मरणनिरिक्तस्यकृतिपाशंतत्कृतस्कृतिविषयइत्यर्थः प्रियारतिपतिः कामस्ततोपिशतको
टिगुणासुंदरमंगयस्यशतमयोमाधुर्यादिनानादाहरणंगुरामचन्द्रचरणकमलत्याभावनयास्वचित्तेतल्लम्भमितिपावनतनेदेवाद्रूपनिपतीत्यादि ५३ ५४ ५५ ब्रह्म

हरिकमलजशंभुरूपभेदान्त्वमिहविभासिगुणत्रयानुवृत्तः रविरिवजलपूरितोदपात्रेष्वमरपतिस्तुतिपात्रमीशमीडे ५२ रतिपतिशतकोटिसुंदरांगं शतपथगोचरभावनाविदूरं यतिपतिहृदयेसदाविभान्तं रघुपतिमार्तिहरंप्रभुंप्रपद्ये ५३ इत्येवंस्तुवतस्तस्यप्रसन्नोभूद्रघूत्तमः उवाचगच्छभद्रंतेममविष्णोःपरंपदं ५४ शृणोतियइदंस्तोत्रंलिखेद्वानियतःपठेत् सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् ५५ इतिराघवभाषितंतदा श्रुतवान्हर्षसमाकुलोद्विजः रघुनंदनसाम्यमास्थितःप्रययौब्रह्मसुपूजितंपदं ५६ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेआरण्यकांडेअष्टमःसर्गः ८ ततोरामोलक्ष्मणेनजगामविपिनान्तरं पुनर्दुःखंसमाश्रित्यसीतान्वेषणतत्परः १ तत्राद्भुतसमाकारोराक्षसःसमदृश्यत वृक्षमेवमहावक्त्रःशुष्कौरामलक्ष्मणौ ददर्शतुर्महासत्त्वंनहाद्रूपरिवेष्टितौ ४ रामःप्रोवाचविहसन्पश्यलक्ष्मणराक्षसं शिरः
९४ दृष्टिविवर्जितं २ बाहूयोजनमात्रेणव्याप्तौतस्यरक्षसः कबंधोनामदैत्येंद्रःसर्वसत्वविहिंसकः ३ तद्बाहुमध्यदेशेनोचरंतौ ५ पादवि
हीनायस्यवक्षसिचाननं ५ बाहुभ्यांलभतेपश्चान्नरक्षसन्स्थितोध्रुवं आवामप्येतयोर्बाह्वोर्मध्येसकलितौध्रुवं ६ गंतुमप्यत्रमार्गोनदृश्यतेर
घुनंदन किंकर्त्तव्यमितोस्माभिरिदानींमस्यपेत्सनो ७ ॥ ७ ॥

सुपूजितपदंवैकुंठ ५६ इत्यष्टमःसर्गः ८ विपिनांतरमन्वयहन्नदुःखंसमाश्रित्यसमिनीय १ अद्भुतसमाकारः शास्वर्मोश्वर्याकृतिःम
हद्वक्त्रपसमः २ आप्तौमापरावेतौ ३ संकलितोप्राप्तौ ४ ५ ६ ७ ॥

७२

श्री·रा·अ·ला·
२१

छिंधाछिधावृस्मर्थः आर्षमेकवचनं ८ ९ छाद्भक्षेऽस्समर्थौ लोके कृतः अस्मं भाविता वेवनया दिवि विद्यमानेषु देवऋषिश्चसंभाविता तपुवाका
वितथाश्रेषेशाप्रश्नः १० ११ अहं हे राम मम स्य पुत्रः इत्यन्वयः १२ मृगयया मृगयासक्तया पातोऽहं याताविसन्वयः रक्षसा नीतासी नातिन्विता विसन्वे

लक्ष्मणास्तमुवाचेदं किंचित्रोषेण राघव आगामिकैकमत्यौ विग्रासौ भुजोछ्रूतं ८ तयेति रामः खड्गेन भुजं दक्षिणमच्छिनत् तथैव लक्ष्मणो
वामं विच्छेद भुजं मंजसा ९ ततो विविस्मितो दैत्यः कोपुवाप्तुरपुंगवो महोद्रुक्षेदकौ लोके दिवि देवेषु वा कृतः १० ततो ब्रवीद्रू मत्तेर्गमोरा
जिवलोचनः आयोध्याधिपानीः श्रीमान् रामो दशरथो महान् ११ रामोहं तस्य पुत्रोसी भ्राता मे लक्ष्मणः सुधीः मम भार्या मनवकज्ञामीता वैलोक
सुंदरी १२ आगं मृगमपातीतदाकेनापि रक्षसा नीतासीता विचिन्वंतौ वागतो घोरकानने १३ बाहुर्म्यां वेष्टितावत्त तवप्राशारिक्ष्याच्छित्रौ तव भु
जौ त्वं च को वा विकटरूपधृक् १४ कबंधश्चवाच धन्योहं पदि राम स्त्वमागतोसि ममांतिके पुरा गंधर्वराजो हं रूपयौवनदर्पित १५ विचरन्
लोकमखिलं वरनारीमनोहरः तपसा ब्रह्मणोऽलब्धमवध्यत्वं रघूत्तम १६ अष्टावक्रं हस्त्वाकदाचिद् हसंपुरा क्रुद्धो मामाह दुष्टत्वं राक्षसो भव
दुर्मते १७ अष्टावक्रः पुनः प्राह वेदितो मे दयापरः शापस्यांतं च मे प्राह तपसा योऽतितेजसं विष्णुमिययापुरा इतिशप्तोहमद्रा संशसमीन
नुमात्मनः २० कदाचिद्वेवराजानमभ्यद्रवमहं तथा सोपिवज्रेणमामाशमशिरो दशोष्यताडयत २१ ॥ २१ ॥ २१ ॥ २१
+ १८ वेतायुगे दाशरथिर्भूत्वा नारायणः स्वयं आगमिष्यति ते बाहू छिंधते यो जनायतौ १९ तेन शापाद्विनिर्मुक्तो + २

यः १३ अत्र तव बाहुभ्यां वेष्टितौ ज्ञानाशिरक्षयातत्र भुजौ छिन्नौ स्वहंतानंतरकृतिस्त्वं च क इति १४ १५ वरनार्यः उत्तमस्त्रियः अवध्यत्वं लब्धं मयेति शे
षः १६ १७ १८ तेन मयस्ते वाबुछिंधेनेतदाशापाद्विनिर्मुक्तो भविष्यसीति संबंधः १९ २० कदाचिदिति इति ससतंत्र प्राप्य नेत्राभिति शेषः २१

श्री·राम·
२१

तदा वज्रेण ताडनेन शिरः कुक्षिं गतं पादौ च गतौ न नष्टावित्यनुकर्षः २२ २३ इतो व्रजेति उरुभ्यामेव वीरं गच्छितिशेषः २४ बाहुभ्यां गृहीत्वेतिशेषः २५ भु
भास्वता नीपरिभागे व्यंग्रीधनाहते व्यग्निपुक्तेश्वनाहते २६ भार्गीमार्गे भार्यालो मोयाय २७ लोकुंहसुर्यतेमहाणा इत्यमानादेहादित्यर्थः कंदर्पसहृशः पुरु त२
षउत्थितः तदृश इत्यर्थः २८ २९ ज्ञानिनं समाप्तमस्य दशान्तस्य अनंतं देशापरिच्छेद्यं यनाद्यंतरहितं तेन कालापरिच्छेद्यत्वमुक्तं मनोवाचामिति मनोवाचोनिवर्तंतेन इ

तदा शिरोगतं कुक्षिं पादौ चरघुनंदन । वज्रस्यन्नवरान्मृत्युकर्नोभून्मे वज्रेण ताडनात् २१ मुखबाधावे कथं जीवेदयमिति समराधिप । कृतुःस
वैदृष्ट्वाविलोक्यास्यवर्जितं २३ ततो मां प्राह मघवा जठरे ते मुखं भवेत् बाहू ते योजनायामौ भविष्यत इतो व्रज २४ इत्युक्तोहं वसन्निसेवा
हुभ्यां वनगोचरान् भक्षयाम्यधुना बाहू खंडितौ मे त्वयानघ २५ इतः परं मां श्वभ्रेस्मिन्निक्षिप्याग्नी धनाहते आग्निना दह्यमानोहं त्वया रघु
कुलोत्तम २६ सर्वं रूपमनुप्राप्य भार्गीमार्गे व्रजामि ते इत्युक्तो लक्ष्मणेनाशु श्वभ्रं निर्माय तत्र तं २७ निक्षिप्य प्रादहत्काष्ठैस्ततो देहा
त्समुत्थितः कंदर्पसदृशाकारः सर्वाभरणभूषितः २८ रामं प्रदक्षिणीकृत्य साष्टांगं प्रणिपत्य च कृतांजलिरुवाचेदं भक्तिगद्गदया गि
रा २९ गंधर्व उवाच स्तोतुमुत्सहे तेपि पदमनोरमातिसंभ्रमात् त्वामनंतमनाद्यंतं मनोवाचामगोचरं ३० सूक्ष्मं ते रूपमव्यक्तं देहद्वय
विलक्षणं दृश्यं पिजरस्त्रं देहद्वयं जडं मनोनाम कनेत्कथं त्वां विजानीयाद्व्यतिरिक्तं मनः प्रभो ३१ ॥ ३२ ॥

प्राप्य मनसा महेति शेषः ३० देहद्वयं हिरण्यगर्भविराड्रूपस्थूलं सूक्ष्मं वा ततो विलक्षणं स्वरूपं केवलज्ञानरूपं ते सूक्ष्मरूपं तद्व्यक्तं सर्वेषामयोगि
भिर्दुर्ज्ञेयं इतरत्सर्वं जडं यतो देहद्वयं जडं ज्ञानं द्रष्ट्रत्वादिसमनुमानमनेन सूचितं विस्तरस्तस्मात् बुद्धिमनोभ्यामदृश्यत्वे त्वाय पचितः व्यतिरिक्तं जडत्वात् ततो भिन्नं
मनस्त्वां कथं जानीयादित्यर्थः ३१ ॥ ३२

बुद्धिस्थितं तत्रात्माभासश्चेति विविक्तयोर्द्वयोरैक्यं भेदाग्रहादैक्यमेव ज्ञानवशात्कल्पितमेव जीवः बुद्ध्यादीनां ज्ञाता साक्षी अन्तर्यामी ब्रह्मैव शुद्धं चैतन्यं यत्तन्निर्विषये वाङ्म
नःसोरगोचरे तस्मिन्नहमिति लिङ्गं जगत् ३२ अज्ञानवशान्निर्विकारेऽपि आरोप्यते हिरण्यगर्भः सूक्ष्मदेहः सकललिङ्गदेहसमष्टिरूपत्वात्तस्येति भावः सकल
स्थूलसमष्टिर्विराडिति भावः ३३ ध्यानरूपं मंगलं स्वपदप्रदत्वादतः सूक्ष्मं भावनाविषयः हृदयपुंडरीकादौ ध्येयमिति यावत् यद्विषयभावनया समष्टिरूपा भूतभ
विष्यद्वर्तमानसर्वपदार्थज्ञानं भवतीत्याह भूतमित्यादि समं वर्तमानं ३४ अण्डकोशरूपो भगवतो विराड्देहः तत्र महदादिभिरावृते इति अत्रैवं परोक्षाशिक संस्कारात्सम

बुध्यात्माभासयोरैक्यं जीव इत्यभिधीयते । बुध्यादिसाक्षी ब्रह्मैव तस्मिन्निर्विषयेऽखिलं ॥ ३२ आरोप्यतेऽज्ञानवशान्निर्विकारेऽखिलात्म
नि । हिरण्यगर्भस्तत्सूक्ष्मं देहः स्थूलं विराट् स्मृतं ॥ ३३ भावनाविषयो राम सूक्ष्मं ते ध्यानमंगलं । भूतं भव्यं भविष्यच्च दृश्यते देहरूपते जगत् ३४
स्थूलेऽण्डकोशे देहे ते महदादिभिरावृते । सप्तभिरुत्तरगुणैर्वैराजो धारणाश्रयः ३५ ॥

नाप्रक्रियास्त्व आण्डं हेकारावरणाद्दशगुणितं तत्र महत्तत्वाख्यमावरणं तन्मध्ये हेकारावरणं तदपि तस्मात् आण्डकोशो मावरणाद्दशगुणं तन्मध्ये व्योमावरणं तत्
स्माद्दशगुणितं तस्य मध्ये वाय्वावरणं तस्मादपि दशगुणितं तस्य मध्ये तेजआवरणं तेजसो दशगुणितं तस्य मध्ये जलावरणं जलस्माद्दशगुणं तस्य मध्ये पृथिव्यावरणं त
तस्मादपि दशगुणं तस्य मध्ये पृथिव्यावरणं जोद्भूतं तस्मादपि दशगुणं सोऽस्य मध्ये चतुर्दशभुवनात्मकं स्वर्भुवः स्थूलशरीरं स्वर्गः स्वयं भूः सकलो देवजापतेर
मितदाहसप्तभिरुत्तरगुणैरिति उत्तरोत्तरं दशगुणैः स्वस्वान्तर्गतापेक्षयेत्यर्थः संधारणाश्रयः धूमध्यादिदेशेषु भावनाश्रयः इत्यर्थः ३५ ॥ ३५

न्ते देवविराड्रूपं ध्यानयोग्यं प्रदर्शयति त्वमेवेति सर्वैकैवल्यं सर्वस्यैकैवत्वं मनेप्राप्यं वस्त्वित्यर्थः लोकास्तेऽवयवा इति सप्तसप्त उत्क्रान्ते देवविशेषेणाह
। पातालमित्यादि पातालं सप्तमोऽधोलोकः ३६ तलातलमितीर्यते इत्यस्य गुल्फोर्ध्वं जान्वधोभाग इति शेषः ३७ अतलं चेत्यस्य ऊर्ध्वं जघनाधोभाग
इति शेषः नाभेरधोभागं जघनं तन्मही पृथ्वीत्यर्थः नभो भुवर्लोकोऽन्तज्योतिषि स्वर्गलोकः महर्महर्लोकः ३८ तपस्तपोलोकः ३९ श्रुतीस्त्रोत्रे

त्वमेव सर्वकैवल्यं लोकास्तेऽवयवाः स्मृताः । पातालं ते पादतलं पार्ष्णिस्तव महातलम् ३६ रसातलं ते गुल्फौ तु तलातलमितीर्यते । जा-
नुनी सुतलं राम ऊरू ते वितलं तथा ३७ अतलं च मही राम जघनं नाभिगं नभः । उरस्यालं ते ज्योतिर्ग्रीवा ते महरुच्यते ३८ वदनं ज-
नलोकस्ते तपस्ते शंखदेशगम् । सत्यलोको रघुश्रेष्ठ शीर्षण्यास्ते सदा प्रभो ३९ इन्द्रादयो लोकपाला बाहवस्ते दिशः श्रुती । अश्विनौ नासि-
के राम वक्त्रं तेऽग्निरुदाहृतः । ४० चक्षुस्ते सविता राम मनश्चन्द्र उदाहृतः । भ्रूभंग एव कालस्ते बुद्धिस्ते वाक्पतिर्भवेत् ४१ रुद्रोऽहंकाररूपस्ते वा-
चश्छंदांसि तेऽव्यय । यमस्ते दंष्ट्रदेशस्थो नक्षत्राणि द्विजालयः ४२ हासो मोहकरी माया सृष्टिस्तेऽपाङ्गमोक्षणम् । धर्मः पुरस्तेऽधर्मश्च पृष्ठभाग
उदीरितः ४३ निमिषोन्मेषणे रात्रिर्दिवा चैव रघूत्तम । समुद्राः सप्त ते कुक्षिर्नाड्यो नद्यस्तव प्रभो ४४ रोमाणि वृक्षौषधयो रे-
तो वृष्टिस्तव प्रभो । महिमा ज्ञानशक्तिस्ते एवं स्थूलं वपुस्तव ४५ यदस्मिन्स्थूलरूपे ते मनः संधार्यते नरैः । अनायासेन मुक्तिः स्यादतोऽन्य-
न्न हि किंचन ४६ ॥ ४६

४० कालो निमेषादिपरार्धान्तः वाक्पतिर्बृहस्पतिः ४१ अहंकाररूपस्त्वं छंदांसि वेदास्ते वाचः वाणीत्यर्थः दंष्ट्रदेशे हि दंष्ट्रादेशस्य इत्यर्थः द्वि-
जास्त्वार्थः द्विजालयो दन्तपंक्तयः ४२ मोहकरी सकलजनमोहकरी ४३ निमिषो रात्रिरुन्मेषणं दिवा सप्तसमुद्राः कुक्षिस्तव नद्यस्तव नाड्यः
४४ वृष्टिस्तव रेतः ज्ञानशक्तिस्तव महिमा सर्वत्र व्याप्तिरूपत्वं तत्तुल्यज्ञानशक्तिर्नान्यत्रेति भावः ४५ अतो विकमन्यत्किंचन नहि किमपि नेत्यर्थः
४६

मेरोमपुलकः इत्यनेन प्रेमरसस्य लक्षणमुक्तं येन गात्रे सरोमपुलकता स प्रेमरसः इदं प्रेमपूर्वात त्वद्ध्यानमत्र तितीक्षाप्रेमेत्याह ४७ अयं जीवनोपदा मे स्थूलरूपभावको भवति तदैव तस्य मुक्तिः स्यादेवेति शेषः तत्स्थूलभावनमप्यास्तां यद्यशक्यं तदापि सततं तवैव तद्रूपमेवाहं विचिंतयिष्यामि ४८ तद्रूपमाह धनुरिति अपीच्यवयसं सुंदरवयस्कं ४९ एतद्रूपध्यानप्रार्थने हेतुमाह सर्वज्ञ इत्यादिना एवं त्वद्रूपं ध्यायन्नुपदेशं च करोतीत्याह मुमूर्षूणामित्यादि एवं च शंकरः स्वप्रसादेन

अतोऽहं राम रूपं ते स्थूलमेवानुभावये यस्मिन्ध्याने प्रेमरसः सरोमपुलको भवेत् ४७ तदैव मुक्तिः स्याद्राम यदा ते स्थूलभावकः तदप्यास्तां तवैवाहं सततं रूपं विचिंतये ४८ धनुर्बाणधरं श्यामं जटावल्कलभूषितं अपीच्यवयसं सीतां विचिन्वंतं सलक्ष्मणं ४९ इदमेव सदा मे स्यान्मानसे रघुनंदन सर्वज्ञः शंकरः साक्षात्पार्वत्या सहितः सदा ५० त्वद्रूपमेवं सततं ध्यायन्नास्ते रघूत्तम मुमूर्षूणां सदा काश्यां तारकं ब्रह्मवाचकं ५१ राम रामेत्युपदिशन्सदा संतुष्टमानसः अतस्त्वं जानकीनाथ परमात्मा सुनिश्चितः ५२ सर्वे ते मायया मूढास्त्वां न जानंति तत्त्वतः नमस्ते रामभद्राय वेधसे परमात्मने ५३ अयोध्याधिपते तुभ्यं नमः सौमित्रिसेवित त्राहि त्राहि जगन्नाथ मां माया नाहरोतु ते ५४ राम उवाच तुष्टोऽहं देवगंधर्व भक्त्या स्तुत्या च तेनघ याहि मे परमं स्थानं योगिगम्यं सनातनं ५५ ॥

तद्रूपध्यानप्रार्थनमिति भावः ५० ननु मयि सर्वमप्यस्ति किमेतत्प्रार्थ्यते इत्याशंकायां तस्य परमात्मत्वं युक्त्या साधयति मुमूर्षूणामिति तारकं ब्रह्मतत्त्वमस्यादि प्रतिपाद्यं तस्य वाचकं प्रतिपादकं ५१ इमं ते योगिनो ब्रह्मनिष्ठा मुक्तास्यंतीति भावः ५३ त्वां न जानंति परमात्मत्वेन तत्त्वतः ५३ योगिभिरनेनैव देहेन योगबलात् गम्यं स्वलोकं ५५ ॥

नित्यानुभवानुमेयं निरस्यापोनुभवो ज्ञानेन तत्त्वेनेहहस्तकविषयं तेनानुमेयमतदुक्तं भगवद्गीतायां सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति ५६ इतिश्री
कार्णं नवमः सर्गः ९ अथास्य नत्वस्यानामितिशेषः पुरोभागे दृश्यमाने आश्रमे तच्चरणा भक्तिमार्गविशारदा शबरी आश्रमे प्राप्ते सर्वं भीता गस्थितिस्थाने तत्रा

नित्यानुभवानुमेयमिति त्वां ये निषेवन्ति नित्यमनन्यबुद्ध्या भक्त्या त्वदुक्तं तत्त्वमागमोक्तं तेऽज्ञानसंभूतभवं विहाय मां प्राप्नुवन्ति नित्यानुभवानुमेयं ५६ इति
श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे आरण्यकाण्डे नवमः सर्गः ९ लब्धवरः स गन्धर्वः प्रयास्यन् राममब्रवीत् शबर्यास्ते पुरोभागे आश्रमे रघु
नंदन १ भक्त्या त्वत्पादकमले भक्तिमार्गविशारदा तां प्रयाहि महाभाग सर्वं ते कथयिष्यति २ इत्युक्त्वा प्रययौ सोऽपि विमानेनार्कवर्चसा वि
ष्णोः पदं रामसंस्पर्शात् फलमीदृशं ३ त्यक्त्वा तद्विपिनं घोरं सिंहव्याघ्रादिदूषितं शनैरथाश्रमपदं शबर्या रघुनंदनः ४ शबरी राममालोक्य
लक्ष्मणेन समन्वितं आयांतमाराद्धर्षेण प्रत्युत्थायाचिरेण सा ५ पतित्वा पादयोरग्रे हर्षपूर्णाश्रुलोचना स्वागतेनाभिनंद्याथ स्वासनेनोप
वेशयत् ६ रामलक्ष्मणयोः संगृहीतानि दिव्यानि रामार्थं शबरी मुदा ८ ✗ सम्यक् पादौ प्रक्षाल्य भक्तितः तज्जलेनाभिषिच्याङ्गमथार्घ्या
दिभिरादृता ७ संपूज्य विधिवद्रामं ससौमित्रिं सपर्यया ✗ फलान्यमृतकल्पानि ददौ रामाय भक्तितः पादौ संपूज्य कुसुमैः सुगन्धैः सानुलेपनैः
९ कृतातिथ्यं रघुश्रेष्ठमुपविष्टं सहानुजं शबरी भक्तिसंपन्ना प्राञ्जलिर्वाक्यमब्रवीत् १० अत्राश्रमे रघुश्रेष्ठ गुरवो मे महर्षयः स्थिताः
शुश्रूषणं तेषां कुर्वती समुपस्थिता ११ ॥ ११ ॥

पुष्पापंवेत्यर्थः १ २ विष्णोः पदं स्वर्गलोकं ३ ४ अचिरेण शीघ्रं ५ पादयोरग्रे नंदत्य ^
भागे स्वासनेनासने ६ आदृता अर्घ्यादिभिः सत्कृतया ७ सपर्यया पूजासामग्र्या ८ संपूज्य रामार्थं संगृहीतानि दिव्यानि ८ ददावित्यन्वयः ९ १० तेषां
शुश्रूषणं कुर्वती अहं सम्यक् उपजेषां समीपे स्थिता ११ ॥ ११ ॥

म२

श्रि·रा·ऋ·स्रा·
२४

बहुवर्षसहस्राणीति शून्यं विगतास्तेऽस्मत्स्य इदानीमित्यादि: गमिष्यंतस्ते तमं त्रैव समाहिता तमेति मामब्रूवन् ११ १२ आगमिष्यति अत्राश्रमे इति शेषः
अत्रेऽरकाग्रपयामवति तथाविधपर्णातस्मं चाऽरहितमिति पावत्तस्मान्निशा अत्र स्थिराभवेत्यर्थः तेषां गमनकालमाह इदानीमिति इत्यस्मात्ते ऽनेन गताः इत्यर्थः १४
१५ तेऽत्रागमनं प्रतीक्ष्य स्थितान्अहं तथैव यथा गुरुभिरुक्तं तथा करं वसत्वे गुरुभाषितं तामोत्रापातीस्मितंतस्य घसफलं जातं १६ हे राम नतैव तद्रूपस्य दर्शनं मे

बहुवर्षसहस्राणि गतान्येव ब्रह्मणः पदं गमिष्यंतो वनमात्वं वसोऽत्रैव समाहिता ११ रामो दाशरथिर्जातः परमात्मा सनातनः राक्षसा
नां वधार्थाय पक्षीणां रक्षणाय च १२ आगमिष्यति चेत्कानने ध्याननिष्ठा स्थिरा भव इदानीं चित्रकूटाद्रावाश्रमे वसति प्रभुः १४ यावदा
गमनं तस्य तावद्रक्ष कलेवरं दृष्ट्वैवं राघवं दग्ध्वा देहं यास्यसि तत्पदं १५ तथैवाकरवं राम मतत्ध्यानैकपरायणा प्रतीक्ष्यागमनं तेऽद्य सफलं
गुरुभाषितं १६ तव संदर्शनं राम गुरूणामपि मे नहि योषिन्मूढाप्रमेयात्मन्हीनजातिसमुद्भवा १७ तव दासस्य दासानां शतसंख्योत्त
रस्य वा दासीत्वे नाधिकारोऽस्ति कुतः साक्षात्तवैव हि १८ कथं रामाद्य मे दृष्टस्त्वं मनोवागगोचरः स्तोतुं न जाने देवेश किं करोमि प्रसीद
मे १९ राम उवाच पुंस्त्वे स्त्रीत्वे विशेषो वा जातिनामाश्रमादयः न कारणं मद्भजने भक्तिरेव हि कारणं २० ॥ २० ॥ २०

गुरूणामपि न जाने हे ऽप्रमेयात्मन्नहं योषित् अनेन सर्वर्णोनर्हत्वं तत्रापि हीनजा तस्मद्गदा सतद्दासेस्से वं क्रमेशा शतसंख्या उत्तरस्यापि दा
सीत्वे नाधिकारः साक्षात्तव दास्ये तु सुतरामनधिकारः १७ १८ इति हेतोः योगिनामपि मनोवागगोचरस्त्वं मया कथं दृष्ट इति प्रश्नः
स्तोतुमित्यादि विनयः १९ पुंस्त्वस्त्रीत्वकृतो विशेषो वा जातिनामाश्रमादयः न तत्कृता विशेषा वा न मद्भजने कारणं किं तु भक्तिरेव न तु पुंस्त्वो
ब्राह्मणत्वे नैवाधिकार इत्यर्थः २० ॥

श्री·राम·
२४

नदेवोपपादयन्निपज्ञेत्यादिवेदाध्ययनकर्मभिः वेदाध्यापनेन वेदोक्तकर्मानुष्ठानेनेत्यर्थः २१ मत्संगएवप्रथमेमुख्यंसाधनमित्यर्थः २२ मत्क
थालापः मच्चरितंमिथःकथालापइत्यर्थः मद्गुणाशंसामद्गुणकीर्तनंमहत्त्वसामहत्त्वमामस्तुतिपाठकवचसा उपनिषद्रूपाणामारभ्यातत्त्वं २३ अमायया अ
छलेनमद्बुध्या ईश्वरबुध्यागुरुसेवा पुत्रापत्नीलतापुत्राद्यविषयेलाशसिकीप्रवृत्तिः यमादिअहिंसाऽस्तेयब्रह्मचर्यापरिग्रहायमाः आदिनाप्राण
नधारणायामप्रत्याहाराः नियमादिशौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाः आदिनाधारणाध्यानसमाधयः २४ मत्स्तवेनेनिष्ठानस्मरताम

यज्ञदानतपोभिर्वाविद्याध्ययनकर्मभिः नैवद्रष्टुमहंशक्योमद्भक्तिविमुखैःसदा २१ तस्माद्भामिनिसंक्षेपाद्वक्ष्येहंभक्तिसाधनं सतांसंगति
रेवात्रसाधनंप्रथमंस्मृतं २२ द्वितीयंमत्कथालापस्तृतीयंमद्गुणेरणं व्याख्यातृत्वंमद्वचसांचतुर्थंसाधनंभवेत् २३ आचार्योपासनंभद्रेमद्बुध्या
ऽमायया सदा पंचमंपुण्यशीलत्वंयमादिनियमादिच २४ निष्ठामत्पूजनेनित्यंषष्ठंसाधनमीरितं ममंमंत्रोपासकत्वंसांगंसप्तममुच्य
ते २५ मद्भक्तेष्वधिकापूजासर्वभूतेषुमन्मतिः बाह्यार्थेषुविरागित्वंशमादिसहितंतथा २६ अष्टमंनवमंतत्त्वविचारोममभामि
नि एवंनवविधाभक्तिःसाधनंयस्यकस्यवा २७ स्त्रियोवापुरुषस्यापितिर्यग्योनिगतस्यवा भक्तिःसंजायतेप्रेमलक्षणाशुभलक्षणे
२८

चतुर्थपा० २

मयेमंत्रास्तदुपासकत्वंतदुपासनंतत्सांगंतंत्रमंत्रकल्पोक्तांगसहितं २५ अधिकामतोप्यधिकेत्यर्थः पुत्रदारस्थापितृरिक्ततदादारस्थेभ्यमाधि
कंसंतोषहत्वादितिभावः मन्मतिःसर्वात्मपामीभवानितिसर्वभगवद्विवर्तंइतिवामतिः विरागित्वंवैराग्यंशमोंतरिंद्रियनिग्रहः आदिनाबाह्येंद्रि
यनिग्रहस्तोदमः २७ मत्तत्वविचारःस्वस्यतत्वेशुद्धब्रह्मणतद्विचारः तत्वमस्यादिवाक्यतः २७ यस्यकस्यजनस्यैवश्वपचः स्त्रियइतियस्येतन्नवविधंसा
धनंजायतेतस्यप्रेमलक्षणाभक्तिःसंजातेममायंभूयान्मूलोचमानस्यानित्येवमिश्वाप्रेम ॥ २८ ॥ २८ ॥ २८ ॥ २८ ॥ २८

श्री·रा·स्व·व्या·
२५

मन्नत्वज्ञस्य त्वनुभवसिद्धस्येति द्वितीयासमासः मुक्तिः स्यादित्यन्वयः ३० सर्वं नवविधं साधनं ततो भक्तिस्ततो मुक्तिरित्यन्वयः ३१ इतो मद्दर्शनात् अस्मादेव मद्दर्शनादित्यर्थः ३२ ३३ सर्वज्ञा नासीत्यत्र हेतुगर्भं विशेषणं सर्वज्ञेति यत्तच्छब्देन लोकाननुसृतो सीत्यत्रान्वेतीति शेषः ३४ ततो यतस्त्वं लोकाननुसृतस्ततस्त्वयेत्यर्थः ३५ तत्त्वात्सुयायमम्पाहस्त्विति ३६ भीतभीतः भीतेभ्योपि भ्रतिभीतः इत्यर्थः कस्मद्भयादेवं भीतस्तत्राह वालिनइति भ्रा

भक्त्यै संजातमात्राणां मत्तत्वानुभवस्तदा मदानुभवसिद्धस्य मुक्तिस्तत्रैव जन्मनि २९ स्यात्तस्मात्कारणं भक्तिर्मोक्षस्येति सुनिश्चितं प्रथमसाधनं यस्य भवेत्तस्य क्रमेण तु ३० भवेत्सर्वं ततो भक्तिरेव मुनिश्चितं यस्माद्भक्तियुक्ता त्वं ततो हं त्वामुपस्थितः ३१ इतो मद्दर्शनान्मुक्तिस्तव नास्त्यत्र संशयः यदि जानासि मे ब्रूहि सीता कमललोचना ३२ कुत्रास्ते केन वा नीता प्रिया मे प्रियदर्शना ३३ शबर्युवाच देव जानासि सर्वज्ञ सर्वं त्वं विश्वभावन तथापि पृच्छसे यन्मां लोकाननुसृतः प्रभो ३४ ततो हं सम्भिधास्यामि सीता यत्राधुनास्थिता रावणेन हृता सीता लंकायां वर्तते धुना ३५ इतः समीपे रामास्ते पम्पानाम सरोवरं ऋष्यमूकगिरिर्नाम तत्समीपे महानगः ३६ चतुर्भिर्मन्त्रिभिः सार्धं सुग्रीवो वानराधिपः भीतभीतः सदा तत्र तिष्ठत्यतुलविक्रमः ३७ वालिनस्तद्भयात्तत्रानुक्तस्य मम शापतः वालिनस्तत्र गच्छ त्वं तेन सख्यं कुरु प्रभो ३८

तुर्वालिनो भयादित्यर्थः ननु तत्र वासेन कथमभयमतस्त्राह ऋषेर्भयात् तद्वालिनो ऽगम्यत्वं एषचार्थो वाल्मीकिना सविस्तरं दर्शितः अन्ये त्वाचापिदर्शि यिष्यतीति तेन सुग्रीवेण सख्यं कुरु तस्यापि विपद्युक्तत्वात्तेन सख्यं सुलभं न तु वालिनेति भावः ३८ ॥ ३८ ॥ ३८ ॥ ३८

श्रीराम·
२५

३९ विष्णोस्तत्परं पदं ब्रह्मलोकं ४० अविद्याकृतबंधनसंसारः ४१ विशेषसामान्यमयोंतरमस्यतिकिमितिश्रीरामेप्रसन्नेकिंदुर्लभं तमे
वविशेषसामान्योपपारकत्वेनाह। पदं ध्रुवजन्माशबर्यपिरामेप्रसन्नेमुक्तिमाप ४२ मुक्तिंप्राप्नोतीतिकिंपुनर्वक्तव्यमित्यन्वयः यतस्तभक्तिरेवअन्नेनरूप
रूपकेणरामवेद्यातस्मान्मुक्तिजनकत्वेनवर्णयति ४३ यतोरामचंद्रस्यभक्ति दाम्नतोरामस्यकांदुर्घेचरणपद्मयुगलेसेवध्वंतद्विषयेऽस्तुस्तुकास्य

मुग्रीवेरामसर्वंतेकार्यंसंपादयिष्यति अहमग्निप्रवेक्ष्यामि
पास्यामिभगवन्रामतवविष्णोःपरंपदं ४० इतिरामसमा
तंवधने ४१ रामप्रसादाच्छबरीमोक्षंप्रापापिदुर्लभम्
धमजन्मापिशबरीमुक्तिमापसा किंपुनर्ब्राह्मणा
द्विजमुक्तिरेवनसंशयः ४३ भक्तिर्मुक्तिविधा
पद्मयुगलेसेवध्वमत्यंतुकाः नानाज्ञानविशेषमं
येभांतंभजध्वंबुधाः ४४ इतिश्रीमदध्यात्मरामायणे
कांडेरण्ये अध्यात्माल्मेमार्गो हिमेचपरिशिष्टाः पंचशन्ता



नवाग्रेरघुनंदन ३९ मुहूर्तंतिष्ठराजेंद्रयावद्गच्छाकलेवरं
मंत्वप्रक्लिवेशे ऊरुणाशनं स्त्रीणांविद्वत्स्वकुलमविघाकृ
किंदुर्लभंजगन्नाथेश्रीरामेभक्तवत्सले ४२ प्रसन्नेः
मुख्याःपुण्याःश्रीरामचिंतकाः मुक्तिंयांतीतितिन
पिनीभगवतःश्रीरामचंद्रस्येहलोकाः कामदुघापि
त्रवितितिसत्काशुहूरेभूतरामस्थापमतनुस्मरारिरह
उमामहेश्वरसंवादेन्यारण्यकांडेदशमःसर्गः १०
विष्णोकाःपापहराःपार्वतीशोक्ताः

स्फत्कटेष्ठावंतःसंतःनानाप्रकारंज्ञानविशेषभूतांश्च स्वा नसेवतन्मूलमसारस्येवजनिकोमत्रवितितिपंचसमहेस्म
क्तोभूशमितिशिपेरामभंडो नुतवेहेतुगुर्भविशेषणांस्मरारिरहस्येभांतस्मरारिरिवः ४५ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेत्वा
रण्यकांडेदशमःसर्गः १० कांडेरण्येऽध्यात्मरामायणेसमाप्तः

इतिआरण्यकांडसंपूर्णपत्रं २६

श्रीबालकांडस्मा[illegible]

श्री बालकांड

अध्यात्मरामायण

युद्ध कांडादि

॥ श्रीगणेशाय नमः ॥ श्रीरामचंद्राय नमः ॥ विसेनवं
विसु [illegible] भूषणः कौस्तुभोपरः ॥ अत्रविस्नुभूष
णास्यध्वनिता ॥ १ ॥ नाम्नाहिम्मतिवर्मा भूत धैर्येण
यासमः ॥ २ ॥ पराक्रमेर्जुनः साक्षात्तेजसा भानुमा
३ ॥ यंदृष्ट्वार्थिसमूहस्यजातेयं निश्चितामतिः ॥ हि
तस्माज्जातोरामदत्तश्चंद्राच्चंद्र इवापरः ॥ मित्राणां
[illegible] ॥ आसमुद्रक्षमादेवी
वे ताः सत्त्वापि चाचला ॥ ६ ॥ यद्दानांबुप्रवाहेण मेघो
त्तिर्दिनेदिने ॥ ७ ॥ तेन श्रीरामभक्तेन सर्वविद्याः प्र
प ॥ अर्थिनां कल्पवृक्षेण विद्वज्ज्ञानसभासदा ॥ भ
न्यज्ञानकीजानिं रामं कामातिसुंदरं ॥ चापबाणध
तयेध्यात्मरामायणांबुधौ ॥ सुज्ञाब्धमणिभिः स्व

श्रुजलधौ पूर्णैः शीतकरोपरः ॥ प्रजाल्हादकरो
पत्वेन यरमभ्रक्रतयासदाभ्रगवद्भद्रय रूप
हिमवानिव ॥ रूपेण जितकंदर्पः क्षमायां क्षम
निव ॥ स्त्रियानांभ्रष्टराज्यानां पुनाराज्यप्रदायकः
त्वापस्तुतं स्त्रीत्वं च कामधुक्रूम मिमागता ॥ ४
चरिपूणांच मानदः प्रथितः प्रभुः ॥ ५ ॥
यत्कीर्त्यां धवलीकृता ॥ हिमाचलेन समतां नी
दस्यानपेक्षकाः कृषीवलाः ॥ प्रतिदिशं प्रहृष्य
जानता ॥ शृंगवेरपुरे शेनीरपुकस्तदवाग्निनां
हनागेशशिखेण बध्यते रामवर्मणा ॥ ९ ॥ प्रण
रं देवं मायामानुषविग्रहं ॥ १० ॥ सेतुः परोपक
ष्ठे ॥ प्रीयतां तेन राघवः ॥ ११ ॥ श्रीमताबाल्मी

श्री

किनालोकोद्धारायचक्रेतेरामचरित्रवर्णनरूपेरामायणाख्यकाव्येभगवतोलीलावतारस्यरामस्यरावणादीनांहृदमनुष्यत्वबुद्ध्येनरवदात्मस्वरूपगोपनेनव्यवहर
तः स्वरूपंवाल्मीकिनागुप्तमेवतत्रतत्रनिरूपितंतदेतत्परमदयालुर्भगवान्साक्षाद्वेदव्यासोलोकानांस्फुटंबोधयितुंनारदब्रह्मसंवादरूपेणब्रह्मांडपुराणेऽध्या
त्मरामाय[illegible]णाख्यांसंहितांचक्रेतस्याश्चवाल्मीकिसूचितार्थज्ञापकत्वंबोधयितुंवाल्मीकिरामायणवदेवकांडसर्गोपेततांकृतवानंतायथामतिस्वमतिदोषशुद्धयेव्या
चक्ष्महेतामेनांसंहितांनैमिषारण्येनैमिषीयानृषीन्श्रावयतिस्मसूतइत्याह॥ अप्रमेयेति॥ अप्रमेयंयत्त्रयंमायाजीवेश्वररूपंतदतीतंतस्मात्तोधिकश्चासौनिर्मलंयज्ज्ञा

श्रीरामायनमः अप्रमेयत्रयातीतनिर्मलज्ञानमूर्त्तये॥ मनोगिरांविदूरायदक्षिणामूर्त्तयेनमः॥१॥ सूतोवाच॥ कदाचिन्नारदोयोगीप
रानुग्रहवांछया॥ [illegible]र्यटन्सकलान्लोकान्सत्यलोकमुपागमत्॥२॥ तत्रदृष्ट्वामूर्त्तिमद्भिश्छंदोभिः परिवेष्टितं॥ बालार्कप्रभयासम्यक्भासयं

तंसभागृहं॥३॥ ॥३॥

नंतत्स्वरूपायनमः॥ मनोगिरांविदूरायइतिवाङ्मनसोरगोचरायेत्यर्थः॥१॥ सूतउवाचेति॥ कदाचिदिति॥ योगीयोगपक्क
कषायतयाविदितवेदितव्यः॥ नारदस्यपर्यटनंविफलंतत्राह्परेति॥ यैरेषांतत्तल्लोकवासिनांधर्मज्ञानाद्युपदेशेनयोनुग्रहस्तदिच्छयेत्यर्थः॥ सत्यलोकंब्रह्मलो
कं॥२॥ तत्रसत्यलोके॥ मुनिपुंगवोनारदउच्यमानगुणंचतुर्मुखंदृष्ट्वातुष्टावेतिअग्रिमतृतीयश्लोकस्थेनसंबंधः॥ मूर्त्तिमद्भिः गृहीतविग्रहैः॥ छंदोभिर्वेदैः परि
तोवेष्टितंतत्तद्देहाध्येतृमुखेनतत्तद्वेदमूर्त्तिवत्स्थानादितिभावः॥ बालार्कप्रभया॥ बालार्कसदृश्यास्वप्रभया॥३॥ ॥३॥ ॥ छ॥ ॥ छ॥

॥छ ९॥ ॥ ९॥ ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥ छ॥ ९॥

सर्वार्थगोचरत्वात्मानं अतीतानागतवर्तमानरूपायेसर्वेर्थास्तद्विषयज्ञानयुक्तं ॥ बहुव्रीहिसमासः ॥ अतएवतत्तद्ज्ञानरूपयासरस्वत्याख्यशक्त्यायुक्तं ॥ ४ ॥
जगन्नाथंजगत्स्रष्टारं ॥ सक्तासीष्टफलप्रदत्वेनप्रश्नयोग्यतासूचनं ॥ ५ ॥ स्वयंस्तु इत्यनेनानाहततत्ज्ञानंत्वंस्तु विंतेवेस्मावोत्तमं सर्वेष्वेतेषुयः पश्येतभगवन्स्त
वमात्मनः स्तुतानिभगवत्यात्मन्येषभागवतोत्तमइत्युक्तलक्षणंतत्प्रष्टुंवस्त्वित्यर्थः ॥ ६ ॥ सुमंत्रविहितमग्रसंनिविष्टं ॥ ७ ॥ एकमेव पुण्यहीनानांपरलोक

मार्कंडेयादिमुनिभिः ॥ स्तूयमानंमुहुर्मुहुः ॥ सर्वार्थगोचरज्ञानंसरस्वत्यासमन्वितं ॥ ४ ॥ चतुर्मुखंजगन्नाथंभक्ताभीष्टफलप्रदं ॥ प्रणम्य
दंडवद्भक्त्यातुष्टावमुनिपुंगवः ॥ ५ ॥ संतुष्टंतंमुनिंप्राहस्वयंपद्मभवोत्तमं ॥ किंप्रष्टुकामस्त्वमसितद्वदिष्यामितेमुने ॥ ६ ॥ इत्याकर्ण्यव
चस्तस्यमुनिर्ब्रह्माणमब्रवीत् ॥ त्वत्तः श्रुतंमयासर्वंपूर्वमेवसुखाशुभं ॥ ७ ॥ इदानीमेकमेवास्तिश्रोतव्यंसुरसत्तम ॥ तद्रहस्यमपि
ब्रूहियदितेनुग्रहोमपि ॥ ८ ॥ प्राप्तेकलियुगेघोरेनराः पुण्यविवर्जिताः ॥ दुराचाररताः सर्वेसत्यवार्तापराङ्मुखाः ॥ ९ ॥ ॥ ९ ॥

प्राप्नुमायद्रूपं ॥ तद्रहस्यमपिमत्स्पष्टंब्रूहि ॥ अनुग्रहः परोपकारजपुण्येनायंप्रज्यतामित्येवंरूपाप्रयायदिमयीत्यर्थः ॥ ८ ॥ दुराचाररताः निषिद्धकर्मनिरताः
तेस्येवप्रयंचः ॥ सत्यवार्तेति ॥ नानृतंवदेदितिनिषिद्धानृतभाषणशीलाइतिपावत् ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ९ ॥ ॥ ६ ॥ ॥ ९ ॥ ॥ ६ ॥

॥१०॥ सर्वपापस्यमूलकारणमाह। देहात्मदृष्टयइति। देहएवात्माइतिदृष्टिर्येषांतेइत्यर्थः। एवंचदेहनाशेनात्मनाशात्। पापपुण्यफलभोक्तुरभावात्तयोर्दृष्टिं विहिताकरणनिषिद्धकरणयोः प्रवृत्तिरितिभावः। स्थूलोहंगौरोहमितिप्रतीतिरस्य शुक्तौरजतप्रतीतिवद्भ्रमइतितत्वं। देहस्यपरिणामित्वंतुप्रतिक्ष णोपचयापचयाभ्यांप्रत्यक्षसिद्धमात्मनोः विनाशित्वंतु अविनाशीवाऽरेयमात्मेतिश्रुतिसिद्धं अतएवनास्तिकानास्तिपरलोकइतिबुद्धिर्मतः। पशुबु द्धयः आहारविहारमात्रपराविधिनिषेधानभिज्ञाश्चेत्यर्थः। स्त्रीदेवाः स्त्रीजिताइत्यर्थः। तेषामन्नत्याऽ भोज्यत्वंचस्मृतिषूक्तं। कामकिंकराः। काम्यकर्ममात्र

परापवादनिरताः परद्रव्याभिलाषिणः॥ परस्त्रीसक्तमनसः परहिंसापरायणाः॥१०॥ देहात्मदृष्टयोमूढानास्तिकाःपशुबुद्धयः॥ मा तापितृकृतद्वेषाः स्त्रीदेवाः कामकिंकराः॥११॥ विप्रालोभग्रहग्रस्तावेदविक्रयजीविनः॥ धनार्जनार्थमभ्यस्तविद्यामदविमोहि ताः॥१२॥ त्यक्तस्वजातिकर्माणः प्रायशः परवंचकाः॥ क्षत्रियाश्चतथावैश्याः स्वधर्मत्यागशालिनः॥१३॥ १३ ॥ ॥

परा॥१२॥ लोभग्रहपग्रहेणभूतादीनायस्ताः। वेदविक्रयजिविनः भृतकाध्यापकाधनार्जनफलकतयाऽभ्यस्तायाविद्यातन्मदेनतद्गर्वेणविमोहिताः। इ तरावज्ञाशीलाः॥१२॥ त्यक्तेति। अत्रविप्राइत्यनुवर्त्ततेत्यक्तंस्वजातिकर्मब्रह्मणजात्युचितंकर्माध्ययनादियैस्तेपरवंचकाः। परवंचनाएवधर्मोनुष्ठा ये नवंतः। क्षत्रियादयोप्येवमेवेत्याह। क्षत्रियाइति। स्वधर्मत्यागरूपंशीलंयेषांनतुकदाचिदपिधर्मशीलाइत्यर्थः॥ १३ ॥ १३ ॥ १३ ॥

अध्या॰ बा॰
३

ब्रह्मणाचारतत्पराइत्यनेनधर्मसंकरोदर्शितः स्त्रियश्चेत्यनेनवर्णसंकरोदर्शितः सर्तुवस्त्रानेनिर्भयानिःशंकाः सर्तुवस्त्रानेतिपाठेवधिरागुरिरित्यनेना
वस्मादेरकारस्यलोपः ॥ १४ ॥ १५ ॥ परलोकगतिः स्वर्लोकोर्ध्वस्थलोकाहिब्रह्मलोकांतगमनं। तच्चदुराचारादिजान निवृत्तिंविनाचित्तशोधकसकलधर्थ
र्मेविनाचदुःखापमितिभावः ॥ १६ ॥ नन्वीदृशोपायज्ञानंममकर्णस्पारितिचेत्तत्राह सर्ववेत्तीति नीयतोभवान्सर्वज्ञइतिभावः ॥ ऋषेर्नारदस्यवाक्यमाक

तदधद्रूपस्त्र्येकेचितब्राह्मणाचारतत्पराः ॥ स्त्रियश्चपापशीलाश्चसर्तुवस्त्रानिर्भयाः ॥ १४ ॥ श्वशुरद्रोहकारिण्योभविष्यंतिनसंशयः ॥ सतेषांनष्टबुद्धीनांपरलोकःकथंभवेत ॥ १५ ॥ इतिचिंताकुलंचित्तंजायतेममसंततं ॥ लघूपायेनयेनैषांपरलोकगतिर्भवेत् ॥ १६ ॥ तमुपायमुपाख्याहिसर्ववेत्तीयतोभवान् ॥ ऋषेर्वाक्यमाकर्ण्यप्रत्युवाचांबुजासनः ॥ १७ ॥ साधुपृष्टंत्वयासाधोवक्ष्येतच्छृणुसादरं ॥ पुरात्रिपुरहंतारंपार्वतीभक्तवत्सला ॥ १८ ॥

र्ण्यांबुजासनोब्रह्माप्रत्युवाचेतिसूतोक्तिः ॥ १७ ॥ साधुसर्वजनहितंयतः पृष्टमतः सादरंव
क्ष्येतदुत्तरमितिशेषः ॥ तच्छृणुतदेवाहपुरेतित्रिपुरहंतारंशिवं। भक्तवत्सलेत्यनेनपार्वत्याअपिस्वस्यभक्तसकलजनकरुणयातदुद्धारार्थइतिसु
चितं ॥ १८ ॥ श्रीराम ॥ ॥ ॥ ॥ ॥ ५ ॥ ॥

राम॰
३

गूढं स्वातिरिक्ताज्ञातं च स्वमाणं च कत्वा व्याख्यातवान् कथितवानित्यर्थः ॥ १९ ॥ ननु किं तत्राह पुराणोत्तममिति । पुराणमनादि तच्च तत् उत्तमं च श्रवणेन सर्व
धर्मजनकत्वाच्चित्तशुद्धिद्वारा तत्वज्ञानकरत्वाच्चेति भावः । अध्यात्मरामायणमित्यन्वर्थं ग्रंथनाम । आत्मनीत्यध्यात्मं आत्मनि चिन्वंतं पीमितयावर्त्तमानो योरामो
रमंते योगिनो चेति सुप्रसिद्धर्यमिति स्वायमर्थं चित्तशुद्धिद्वारा प्रापकं तत्वमिति पादकत्वादिति । तत्र अध्यात्मरामायणं उत्तरश्लोकस्य [illegible] आलोचने इदमेव कर्म

श्रीरामतत्वं जिज्ञासुः पप्रच्छ विनयान्विता ॥ प्रियायै गिरिशः स्वस्यै गूढं व्याख्यातवान्स्वयं ॥ १९ ॥ पुराणोत्तमम् अध्यात्मरामायणमिति
स्मृतं ॥ तत्पार्वती जगद्धात्री पूजयित्वा दिवानिशं ॥ २० ॥ आलोचयंती स्वानंदमग्ना तिष्ठति सांप्रतं ॥ प्रचरिष्यति तल्लोके प्राणशुद्ध
वरा घदा ॥ २१ ॥ तस्याध्ययनमात्रेण जनानामस्यं तिसद्गतिं ॥ तावद्विजृंभते पापं ब्रह्महत्यापुरःसरं ॥ २२ ॥ यावज्जगति नाध्या
त्मरामायणमुदेष्यति ॥ तावत्कलिर्महोत्साहो निःशंकं संप्रवर्त्तते ॥ २३ ॥ यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ तावद्यम
भटाः शूरास्संचरिष्यंति निर्भयाः ॥ २४ ॥ ॥ २४ ॥ ॥

॥ २० ॥ स्वानंदमग्ना स्वस्वरूपानंदमग्ना तिष्ठति प्रत्यक्षं सांप्रतं युक्तं । एतदालोचनेन
स्वस्वरूपानंदस्य [ज]गदंतर्यामिरूपस्य सम्य[ग्ज्ञा]नादिति भावः ॥ २१ ॥ २२ ॥ जनेभ्य इति शेषः ॥ २३ ॥ निर्भयाः संचरिष्यंति । सर्वेषां पापग्रस्तत्वात्कलौ
विति भावः ॥ २४ ॥ २४ ॥ २४ ॥ ॥

अध्या॰ वा॰
४

शास्त्राणि न्यायादीनि विविदंते विवादं कुर्वंते आत्मविषये इत्यर्थः। कर्त्ता भोक्ता ज्ञानाश्रय आत्मा परस्परं भिन्न इति काणादयोगेतमाध्वघोऽज्ञादि पदार्थानां परस्पर मा त्मनि भेदज्ञानान्मुक्तिरित्यादि च। ज्ञानस्वरूपा अनेके जीवास्तेषां प्रकृत्यादिभ्यो भेदज्ञानान्मोक्ष इति सांख्यादयः। एक एव चेतन उपाधिभेदान्नानात्वं शास्त्र नि षेधज्ञानान्मुक्तिरित्यादि च। तत्त्वमस्यादिवाक्यजन्यश्रवणमनननिदिध्यासनेन ब्रह्मैवाहमिति ज्ञानादुपाधिविलये स्वस्वरूपेणावस्थानमेव मोक्ष इत्यौपनिषदसिद्धांत अध्यात्मरामाय

तावत्सर्वाणि शास्त्राणि विवदंते परस्परं। यावज्जगति नाध्यात्मरामायणमुदेष्यति ॥ २५ ॥ तावत्त्वद्रूपं राम स्पष्टं बोधं महतामपि ॥ याव ज्जगति नाध्यात्मरामायणमुदेष्यति ॥ २६ ॥ अध्यात्मरामायणसंकीर्तनश्रवणादिजं ॥ फलं वक्तुं न शक्नोमि कार्त्स्न्येन मुनिसत्त म ॥ २७ ॥ तथापि तस्य माहात्म्यं वक्ष्ये किंचित्तवानघ ॥ शृणु चित्तं समाधाय शिवेनोक्तं पुरा मम ॥ २८ ॥ अध्यात्मरामायणतः श्लोकं श्लोकार्द्धमेव वा ॥ यः पठेद्भक्तिसंयुक्तः स पापान्मुच्यते क्षणात् ॥ २९ ॥ यस्त्वध्यात्मरामायणमनन्यधीः यथाशक्ति वदेत्सत्या(?) स जीवन्मुक्त उच्यते ॥ ३० ॥ ११ ॥ ३० ॥

णोदये स्फुटो भविष्यतीति तत्र शास्त्रवासनाजन्यो वादो लयमेष्यतीति भावः। रघुनाथस्य स्वस्वरूपं । स ष्टं [illegible] तानाासिः ॥ २५ ॥ अध्यात्मरामायणतः सार्वविभक्तिकः श चिदानंदाद्वयब्रह्मस्वरूपं महतामपि शास्त्रज्ञानामपि दुर्बोधं भवतीति शेषः ॥ २६ ॥ २७ ॥ २८ ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते इत्यादिना गीतायामुक्तः। वासिष्ठेऽपि निद्रोऽसौ जीवन्मुक्त इति तल्लक्षणं चतुः खेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः। जाग्रत्यस्थाने योऽस्य वपद्यते तेनैषा वंशावयना म जीवन्मुक्तः सदा भवेति ॥ ३० ॥ ॥ ३० ॥ ॥ ॥

राम॰
४

२। अनादरात् यदृच्छयापि न तु पुराणश्रवणविध्युक्तनियमेनेत्यर्थः ॥ ३२ ॥ ३३ ॥ ३४ ॥ अधीतेति सांगवेदाध्ययने शास्त्रार्थाध्ययने च यत्पुण्यं दुर्लभं तत्फलं तस्याध्या
त्मरामायणपुस्तकदातुः संभवेदित्यर्थः ॥ ३५ ॥ ३६ ॥ ३७ ॥ जागरिणः कृतजागरणाः ॥ ३८ ॥ आत्मतुल्यं धनं । अतिप्रियं वस्त्वित्यर्थः । सर्वतोमुखे जलेऽस्थि नइभि

यो भक्त्यार्चयते ध्यात्मरामायणमतंद्रितः । दिने दिनेऽश्वमेधस्य फलं तस्य भवेन्मुने ॥ ३१ ॥ यदृच्छयापि यो ध्यात्मरामायणमनादरात् । अन्यतः
शृणुयान्मर्त्यः सोपि मुच्येत पातकात् ॥ ३२ ॥ नमस्करोति यो ध्यात्मरामायणमहर्दृतः । सर्वदेवार्चनफलं संप्राप्नोति न संशयः ॥ ३३ ॥ लिखि
त्वा पुस्तके ध्यात्मरामायणमशेषतः । यो ददाति रामभक्तेभ्यस्तस्य पुण्यफलं शृणु ॥ ३४ ॥ अधीतेषु च वेदेषु शास्त्रेषु व्याकृतेषु च । यत्फलं
दुर्लभं लोके तत्फलं तस्य संभवेत् ॥ ३५ ॥ एकादशीदिने ध्यात्मरामायणमुपोषितः । यो रामभक्तः सदसि व्याकरोति नरोत्तमः ॥ ३६ ॥ त
स्य पुण्यफलं वक्ष्ये शृणु त्वं मुनिसत्तम । अनेकाक्षरं तु गायत्रीपुरश्चर्याफलं भवेत् । उपवासव्रतं कृत्वा श्रीरामनवमीदिने ॥ ३७ ॥ रात्रौ
जागरितो ध्यात्मरामायणमनन्यधीः । यः पठेच्छृणुयाद्वापि तस्य पुण्यं वदाम्यहं ॥ ३८ ॥ कुरुक्षेत्रादि निखिलपुण्यतीर्थेष्वनेकशः ।
आत्मतुल्यं धनं सूर्यग्रहणे सर्वतोमुखे ॥ ३९ ॥ ॥ ३० ॥ ॥ ३९ ॥ ७ ॥ ॥ ॥

शेषः पुष्करं सर्वतोमुखमिति त्रिपर्यायेष्वभिधानात् ॥ ३९ ॥ ॥ ३९ ॥ ॥ ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥ राम

अध्या० बा०
५

व्यासतुल्येस्य इति अनेन देशप्रदेयवक्तृकालसंप्रदानविशेषाणां पुण्यातिशयजनकत्वं सूचितं ४० गायते इति पाठे तदर्थः योगी यतिर्मुद इति पाठस्तु युक्त एव ४१ अनुव्रतः नतस्य ततः स्वस्य क्रियमाणकर्मणः ४२ तत्राध्यात्मरामायणमध्ये समाहितः स्थिरचित्तः ४३ प्रतिमांतिके प्रतिमासमीपे ४४

विप्रेभ्यो व्यासतुल्येभ्यो दत्वा यत्फलमश्नुते । तत्फलं समवेत्तस्य सत्यं सत्यं न संशयः ४० योगी यते[गी ति] मुदाध्यात्मरामायणमहर्निशं आह्लांत स्य प्रीतास्संते देवा इंद्रपुरोगमाः ४१ पठन्नरसहस्रमध्यात्मरामायणमनुव्रतः । यद्यत्करोति तत्कर्म तत्तत्कोटिगुणं भवेत् ४२ तत्र श्रीरामहृदयं यः पठेत्सुसमाहितः । स ब्रह्मघ्नोपि पूतात्मा त्रिभिरेव दिनैर्भवेत् ४३ श्रीरामहृदयं यस्तु हनूमत्प्रतिमांतिके । त्रिः पठेन्मस्पहं मौनी स सर्वे तमाप्नवेत् ४४ पठन् श्रीरामहृदयं तुलस्यश्वत्थयोर्यदि । प्रत्यक्षरं प्रकुर्वीत ब्रह्महत्यां निवर्तयेत् ४५ श्रीरामगीतामहात्म्यं कृत्स्नं जानाति शंकरः । तदर्द्धं गिरिजा वेत्ति तदर्द्धं वेद्म्यहं मुने ४६ तेषां किंचित्तव स्वामिन् कृत्स्नं वक्तुं न शक्यते । यज्ज्ञात्वा तत्क्षणान्नृणां चित्तशुद्धिर्भवा[नु]यात् ४७ ॥ ४७ ॥

श्रि

यत्कलस्यादिसंनिधौ रामहृदयं पठन् । प्रकुर्वीत प्रदक्षिणा इति शेषः सप्तत्यक्षिं प्रत्यक्षरोच्चारणं ब्रह्महत्यात ज्ज्ञनं पापे निवर्तयेत । आत्मनः श्रोतु श्चेति शेषः ४५ अहं ब्रह्मा ४६ यत् रामगीतामाहात्म्यं ४७ ॥

एम०
५

राम‌गीतापठ्यमानेतिशेषः॥ कदाचनारविग्रहादिकालेपिस्नानादिनेतिशेषः॥४८॥मार्गमाणः॥ अन्वेषयन्नपि [illegible] ॥रामगीतातुल्यत्वपापनाशकंवस्तुराम
गीतातिरिक्तंनपश्यामित्यर्थः॥४९॥कार्तवीर्यः सह स्वबाहुरर्जुनः॥५०॥श्रवणोत्तरग्रहणंनारायणकलांनारायणरूपत्वं॥५१॥५२॥दुः प्रतिग्रहइति [illegible]

श्रीरामगीतायस्सापंननाशयतिनारद॥ तन्ननश्यतितिप्पोदेलोकेक्कापिकदाचन॥ तन्नपश्याम्यहंलोकेमार्गमाणोपिसर्वदा॥४८॥रामेणोप
निषत्सिंधुमुन्मथ्योत्पादितांमुदा लक्ष्मणायार्पितांगीतांसुधांपीत्वामरोभवेत्॥४९॥जमदग्निसुतः पूर्वंकार्तवीर्यवधेछया॥ धनुर्विद्यामस्य
सिंतुमहेशस्यांतिकेवसन्॥५०॥अधीयमानांपार्वत्यारामगीतांप्रयत्नतः॥ श्रुत्वागृहीत्वासुपठन्नारायणकलामगात्॥५१॥ब्रह्महत्यादि
पापानांनिःकृतिंयदिवांछति॥ रामगीतांमासमात्रंपठित्वामुच्यतेनरः॥५२॥दुःप्रतिग्रहदुर्भोज्यदुरालापादिसंभवं॥पापंयत्तत्कीर्तनेनरा
मगीताविनाशयेत्॥५३॥शालग्रामशिलाग्रेचतुलस्यश्वत्थसंनिधौ॥ यतीनांपरतस्तद्वद्रामगीतांपठेत्तुयः॥५४॥सतत्फलमवाप्नोतियद्वा
चोपिनगोचरं॥ रामगीतांपठन्सम्यक्त्वायःश्राद्धेभोजयेद्द्विजान्॥तस्यतेपितरंसर्वेयांतिविष्णोःपरंपदं॥५५॥ ५५॥ ५५॥

त

[illegible]दुःप्रतिग्रहस्तिलधेनुर्गजोवाजीप्रेतान्नमजिनंमणिः मणिः शालग्रामः सुरभिः स्वयमानाचघोराः सप्तप्रतिग्रहाइत्यादिस्मृत्युक्तः दुर्भोज्यंनिषिद्ध
भक्षणं॥दुरालापोप्टतसंभाषणादिः॥५३॥ ५४॥ ५५॥ ॥॥ ॥॥॥ ॥॥ ७॥ ॥॥॥ ७॥ ॥

॥ २६ ॥ ततस्तद्दिनमनंतफलं लभेत् । अनंतफलदानादि फलस्यागे तदध्ययनमात्रेण लभेदित्यर्थः ॥ २७ ॥ श्रुतिर्वेदः स्मृतिर्मन्वादिप्रणीता पुराणानि पाद्मादीन्यष्टादशाइतिहासो भारतादिः ॥ आगमाः पंचरात्रादयः ॥ अध्यात्मरामायणस्य तदध्ययनस्य कलां षोडशांशमपि नार्हंति तदध्ययनानीत्यर्थः ॥ सर्वाध्ययनफलद

एकादश्यां निराहारो नियतो द्वादशीदिने ॥ स्थित्वागस्त्यतरोर्मूले रामगीतां पठेत्तु यः ॥ स एव राघवः साक्षान्नरदेवेश्च पूज्यते ॥ २६ ॥ विनादानं विना ध्यानं विना तीर्थावगाहनं ॥ रामगीतां नरोऽधीत्य तदनंतफलं लभेत् ॥ २७ ॥ बहुनाकिमिहोक्तेन शृणु नारदतत्त्वतः ॥ श्रुतिस्मृतिपुराणेतिहासागमशतानि च ॥ २८ ॥ अर्हंति नाल्पामध्यात्मरामायणकलामपि ॥ अध्यात्मरामचरितस्य मुनीश्वरायमहात्म्यमेतदुदितं कमलासनेन ॥ यः श्रद्धया पठति वा शृणुयात्स मर्त्यः प्राप्नोति विष्णुपदवीं सुरपूज्यमानः ॥ २९ ॥ इति श्रीब्रह्मांडपुराणे उत्तरखंडे एकषष्टितमोऽध्यायः ॥ १ ॥ ॥ ॥ १ ॥ ॥ ॥

स्येति भावः ॥ २८ ॥ पठतीत्यत्रत्त्वक्तमाहात्म्याध्यायः कर्म ॥ २९ ॥ इति श्रीमत्सकलराजविरुदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्य हिमतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतोऽध्यात्मरामायणे सेतौ बालकांडे माहात्म्याध्यायः ॥ १ ॥ १ ॥ १ ॥ १ ॥ ॥ ॥ ॥ ॥ १५ ॥

श्रीरामचंद्राय नमः। शिवपार्वतीसंवादरूपमध्यात्मरामायणं वक्तुं भगवान्व्यासो निर्विघ्नार्थं भगवत्स्मरणरूपं मंगलमाचरति। य इति। पृथ्व्या योद्धृराक्षसादिजनितो भरो भारस्तस्य वारणायेत्यर्थः। परित्राणाय साधूनां विनाशाय च दुष्कृतां। धर्मसंस्थापनार्थाय संभवामि युगे युगे इति भगवदुक्तं। दिविजैर्देवैः। रावणपीडितैः संप्रार्थितः सन्। चिन्मयोपि चिद्रूपोपि अजन्योपि पृथ्वीतले मायामनुष्यः संजातः। तत्र देवप्रार्थनया यदयमवतार इत्यर्थो वाल्मीकीये बालकांडे पंचदशषोडशसर्गयोः स्पष्ट एव। अव्ययस्य चिन्मयस्य च कथं जन्म जातस्य च कथमव्ययत्वमुत्पन्नस्य भावस्य नाशावश्यंभावादत उक्तं मायेति।

यः पृथ्वीभरवारणाय दिविजैः संप्रार्थितश्चिन्मयः संजातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः। निश्चक्रं हतराक्षसः पुनरगाद्ब्रह्मत्वमाद्यं स्थिरां कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे १ ॥ ॥ १॥ ॥

मायानाम सत्त्वासत्त्वाभ्यामनिर्वाच्या सत्त्वरजस्तमोगुणा अघटितघटनासामर्थ्यवती काचिदीश्वरशक्तिः। देवात्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेः दैवी ह्येषा गुणमयी मम मम माया दुरत्ययेति गीतोक्तेश्च। एवं च चिन्मयस्याघटितोपि मनुष्यभावो जन्मव्यवहारश्च मायया भूत इति भावः। तदुक्तं रामतापनीयोपनिषदि। चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनेति। निश्चक्रं। निरवशेषं यथा तथा हतराक्षसः जगतां पापहरां स्थिरां कीर्तिं विधाय लोके स्थापयित्वा पुनराद्यं ब्रह्मत्वं निरुपाधिब्रह्मरूपमगात् १ ॥ १ ॥ १॥ ॥ १॥ ॥ १॥ ॥ १५॥

अध्या॰ ७

७

ममस्योक्तंब्रह्मतत्वलक्षणंद्रढयति। विश्वेति। विश्वस्य संसारस्योत्पत्तिलयादिषु एकं हेतुं। यतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशं तीतिश्रुतेः। श्रयंति। यत्रलीनानिभवंतीत्यर्थः। अनेननिमित्तकारणत्वासमानाधिकरणंजगदुपादानकारणत्वंब्रह्मणः सूचितं एकमित्यसहायार्थकंतेननि मित्तकारणभेदः सूचितः। ननुमिथ्याभूतकार्यनिरूपितकारणत्वस्यापिमिथ्यात्वाद्ब्रह्मणा संबंधाभावात्कथमस्यलक्षणत्वमतआह मायाश्रयमिति। मायाश्रयत्वात्तत्कृतमिदमस्यकारणत्वमित्यर्थः मा केनकारणत्वेनमायिकस्यवब्रह्मणः संबंधइतिभावः। श्रुतेोमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमिति। ननु
यि

विश्वोद्भवस्थितिलयादिषुहेतुमेकंमायाश्रयंविगतमायमचिंत्यमूर्त्तिं॥ आनंदसांद्रमम लंनिजबोधरूपंसीतापतिंविदिततत्वमहंनमामि॥ २॥ ॥ २॥ ॥ ॥ २॥ ॥ २॥

आ
मायाश्रयत्वेजीववत्प्रतिस्वस्वरूपमिवस्वंप्रत्यपि एवंमाया आवृणुयात्तत्राह। विगतमायमिति। विगतामाया [illegible]वरणशक्तिरूपा यस्मात्तं एवंप्रतिस्वस्वरूपावरणश क्तिरहितैत्यर्थः। अचिंत्यमूर्त्तिं। यतोवाचोनिवर्त्तंतेअप्राप्यमनसासहेतिश्रुतेः। एवंजगदुत्पत्यादिकारणत्वरूपंतटस्थेनमुक्तंतेनरूपेणानेयत्वात्। अथस्वरू पलक्षणमाह। आनंदसांद्रममलंनिजबोधरूपमिति। सत्यंज्ञानमानंदंब्रह्मेतिश्रुतेः। इदमेवतत्त्वेयेरूपं। अमलंउपाधिकृतदोषरहितंजीवस्तूपाधिकृतक र्तृत्वाद्यभिमानवान्। तथानेश्वरइतिभावः। निजंस्वाभाविकंबोधरूपं [illegible] अनेनरूपांतरंसर्वंमायिकमितिसूचितं। विदिततत्वं। ज्ञातंस्वस्यबोधस्व
लक्ष्म७

हरिमेव हरिसायुज्यमेव ॥३॥ यः शृणुयात्सहस्रगुणितायुतगुणितकोटिसंख्यागोदानादधिकं फलं लभेदित्यन्वयः ॥४॥ पुरारिगिरीति। रामार्णवेति च रूपके
॥ अध्यात्मरामगंगेति अध्यात्मरामशब्देनाऽध्यात्मरामायणापरपर्यायस्त्वं गंगेति। अनेन रूपकेण सर्वमहापातकादीनामपि नाशकत्वं सूचितं। गं गायास्तत्त्रा
याकत्वस्य सर्वश्रुतिस्मृतिसिद्धत्वात् ॥५॥ सकलमलहरवस्तुविषयत्वाद्वाक्यस्य सकलमलहरत्वं। आनंदकंदमिति त्रविशेषणं। एतेस्मैवानंदस्यमात्रसुप

पठंति ये नित्यमनन्यचेतसः शृण्वंति वाध्यात्मिकसंज्ञितं शुभं। रामायणं सर्वपुराणसंमतं निर्धूतपापा हरिमेव यांति ते ॥३॥ अध्यात्मरामाय
णमेव नित्यं पठेद्यदीच्छेद्भवबंधमुक्तिं। गवां सहस्रायुतकोटिदानात्फलं लभेद्यः शृणुयात्स नित्यं ॥४॥ पुरारिगिरि संभूता श्रीरामार्णवसंगता
अध्यात्मरामगंगेयं पुनाति भुवनत्रयं ॥५॥ कैलासाग्रे कदाचिद्रविशतविमले मंदिरे रत्नपीठे संविष्टं ध्याननिष्ठं त्रिनयनमभयं सेवितं सिद्ध
संघैः देवी वामांकसंस्था गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं सकलमलहरं वाक्यमानंदकंदं ॥६॥ नमोस्तु ते देव जगन्निवास स
र्वात्मदृक्त्वं परमेश्वरोसि ॥ ॥

जीवंतीति श्रुतेरस्य सर्वानंदमूलत्वेनानंदकंदत्वं ॥६॥ देवी द्योतनात्। जगन्निवसत्यस्मिन् जगन्निवसतीति वा जगन्निवासस्तत्संबुद्धिः ते तुभ्यं नमः अस्तु। यत
स्त्वं सर्वात्मदृक्। सर्वस्वरूप आत्मा सर्वात्मा ब्रह्म। सर्वं खल्विदं ब्रह्मेति श्रुतेः तमनित्वामात्मरूपतया पश्यतीति सर्वात्मदृक्। अत एव परमेश्वरोसि ॥६॥ ॥

ति

रि

अध्या० ५० ८

भ

अतः पुरुषोत्तमस्य सर्वेभ्यः पुरुषेभ्य उत्तमस्य तस्यैव ब्रह्मणः सनातनं उपाधिरहितं । सोऽपि धिहपस्यज्ञानोत्तरं नाशात्सनातनत्वं । तत्वं प्रच्छामि । नन्वसन्यात
नेन मया कथ्यत इत्युक्तवाक्यमत आह ॥ त्वं च सनातनोऽसि त्वमपि स एवासीति त्वदृत्तान्तं न किंचिदिति भावः ॥ ७ ॥ अत्यंतं गोप्यं । इदं तु ते गुह्यतममिति । गीतो
क्तेः ॥ अनन्यवाच्यं [illegible] क्तान्येषु वक्तुमयोग्यं । अहो तदपि भक्तेषु वदंति अतो मे प्रष्टं यत्नतु निश्चयेन वद । हे देव यतोऽहं तव भक्तात्वं कुतस्तत्राह । यतस्त्वं मे प्रियो
सि ॥ ८ ॥ ज्ञानमिति । येन ज्ञातेन जना स्तरंति पुनर्जन्मादि संसारं न प्राप्नुवंति तत्सविज्ञानं ज्ञानं ब्रूहि ॥ वि[ज्ञा]नं निदिध्यासन परिपाकजमपरोक्षज्ञानं तत्सहितं

पृच्छामि तत्त्वं पुरुषोत्तमस्य सनातनं त्वं च सनातनोऽसि ॥ ७ ॥ गोप्यं यदत्यंतमनन्यवाच्यं वदंति भ[क्ते]षु महानुभावाः । तदप्यहो ऽहं तव देव भक्तः प्रियो
सि मे त्वं वद यत्नु पृष्टं ॥ ८ ॥ ज्ञानं सविज्ञानमथानुभक्तिं वैराग्ययुक्तं च मितं विभास्वत् । जानाम्यहं योषिदपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ॥ ९ ॥

तत्फलमिति यावत् ज्ञानश्रवणमननजं परोक्षं ब्रह्मैवसंवेद्यं ब्रह्मैवाहमिति च । तरति शोकमात्मविदिति श्रुतेः ॥ तद्ब्रूहि तज्जनकवाक्यं ब्रूहीत्यर्थः ॥ तत्ज्ञानं च न
वैराग्यं विना वैराग्यं च न भक्तिं विनेत्यत आह । अनुभक्तिं वैराग्ययुक्तं चेति प्रश्नोक्तेः ॥ पश्चादनुभक्तिं ज्ञायमानं यद्वैराग्यं तन्न[यु]क्तं । तदुपायबोधकवाक्ययुक्तं चेत्य
र्थः । तथा च पातंजलसूत्रं । दृष्टानु[श्र]विकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति । अनुश्रवो वेदस्तद्बोधितः स्वर्गादिरानुश्रविकः ॥ भक्तिरीश्वरानुरागः
। तथा मितं ज्ञात्वा वत विभास्वत् विशेषेण भास्वत् ताः स्फुरति मात्रेण सहितं मित्यर्थः । बोधजनकवाक्ययुक्तं ब्रूहि यथा योषिदप्यहं त्वदुक्तं जानामि ॥ ९ ॥ ॥

श्री

ध्रु

राम० ८

अथेष्वयमतः। इहाभक्तिः प्रसिद्धा नोर्भवति भवसागरतारणायेति शेषः॥ १०॥ नन्वेवाह भक्तिरिति। ततोऽन्यत्तत्साधनं नास्ति॥ अन्यद्धर्मादि तत्साधनं भव मोक्षज
नकं तत्वज्ञानसाधनं नास्तीत्यर्थः। सामग्र्यन्तरापेक्षितत्वात्। भक्तिः परानुरक्तिरीश्वरे इति भक्तिमीमांसाकृच्छांडिल्यसूत्राभ्यां। इतरेषां ज्ञानेन तत्साधनत
यापेक्षितत्वात्साभक्तिर्मुख्येत्याद्यसूत्रार्थः॥ भक्तिलक्षणपरं च द्वितीयसूत्रं। हंसत्रायं बध्यं न हृद्गतसंशयविषयं रामस्यानीश्वरत्वं॥ ११॥ निरस्तसमस्तकोमायागु
णं सत्वादिकृतो रागद्वेषादिसंप्रवाहो येन तं। अत्र मन्त्राः प्रमादे। ज्ञानं तद्गृहीता। प्रमादं वै मृत्युमहं ब्रवीमीति। सनत्सुजातीये प्रोक्तेः। तत्र हि मृत्योर्वैत महति

इच्छामि चान्यच्च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष॥ श्रीरामचंद्रे खिलतत्वसारे भक्तिर्दृढा नोर्भवति प्रसिद्धा॥ १०॥ भक्तिः प्रसिद्धा भव मोक्ष
णायनान्यत्ततः साधनमस्ति किंचित्॥ तथापि हृत्संशयबंधनं मे विभेत्तुमर्हस्यमलोक्तिभिस्त्वं॥ ११॥ वदंति रामं परमेकमाद्यं निरस्तमा
यागुणसंप्रवाहं॥ भजंति चाहर्निशमप्रमत्ताः परं पदं यांति तथैव सिद्धाः॥ १२॥ वदंति केचित्परमोऽपि रामः स्वाविद्यया संवृतमात्सच्छा त्मसंज्ञं
जानाति नात्मानमतः परेण संबोधितो वेद परात्मतत्वं॥ १३॥

श्रुतेर्मृत्यु यदेनात्मानमिति बोध्यं। तथैवातिनप्रकारेण भजनेनैव सिद्धा अस्तत्वज्ञाः संतः परं
पदं मोक्षं यांति॥ १२॥ परमोऽपि रामः स्वाविद्यया संवृतमात्मावृते आत्मसंज्ञं ब्रह्मसंज्ञं आत्मानं स्वस्वरूपं न जानाति अतः परेण ब्रह्मणा संबोधितः परा(त्म)त्मा ईश्वरस्तद्रूपं
स्वतत्वं वेद जानातीति केचिद्वदंतीति। तथा च वाल्मीकीये रावणवधानंतरं ब्रह्मवाक्यं॥ तमुवाच ततो देवः स्वयंभूरमितद्युतिः॥ प्रगृह्य रुचिरं बाहुं स्मारयन्पूर्वदे
हिकं भवान्नारायणः साक्षाद्देवश्चक्रायुधः प्रभुरित्यादि। उपदेशमाह [illegible] भगवत्यौ हेरमुक्तं। ब्रह्मादयश्चारष्टर्य हड्डकेवायानुहन्नमः तस्मा विमुक्तसंबोधे
न यत्नान्तरमास्थितमिति। वदंति केचित्परमोऽपि रामः स्वाविद्यया संवृतमात्मसंज्ञं जानाति नात्मानमतः परेण संबोधितो वेद परात्मतत्वं॥ १३॥
स्यां २

अध्या॰ वा॰
॥९॥

सीताकृते सीतानिमित्तं। विलापः सत्त्वारण्यककांडकिष्किंधाशोरो वाल्मीकीये स्पष्ट एवकेन सेव्यः अज्ञस्य जीववत्तेयत्तामाव इत्यर्थः ॥१४॥ ॥१५॥ परात्मनो ब्रह्मणः ॥१६॥ एवं पार्वत्या पृष्टः शिवो रामस्वरूपमाह। राम इति। रामः परमात्मा ब्रह्मैवे त्यर्थः। प्रकृतेरित्यस्यान्य इति असंसर्गीति चच्छेदः प्रकृतितत्कार्यैर्स्यान्यत्वोत्तेर संसर्गोच्च रामः परमेश्वर एवेत्यर्थः जीवस्तु ते रुपाधिभिः संसृष्टस्त्वहं मे कर्त्तेत्याद्यभिमानवानिति भावः। अत एवानादिरेक आनंदः कार्यानंदव्यावृत्तये नादिरिति एवं चानंदं ब्रह्म एव मेवाद्वितीयं ब्रह्मेति श्रुति सिद्धं ब्रह्मेत्यर्थः। अत एव पुरुषोत्तमः पुरुषेभ्यो जीवेभ्य उत्तमो हि। प्रसि

यदि स सर्वज्ञानाति कुतो विलापः सीताकृते तेन कृतः परेण॥ जानाति नैवं यदि केन सेव्यः समो हि सर्वैरपि जीववत्सोतः ॥१४॥ अत्रोत्तरं किंचिदितोत्तवस्मि स्तत्त्वं मे संशयच्छेदि वाक्यं ॥१५॥ श्री महादेव उवाच ॥ धन्यासि भक्तासि परात्मनस्त्वं यज्ज्ञातुमिच्छा तव राम तत्त्वं ॥ पुरानकेनाप्यभिचोदितोहं वक्तुं रहस्यं परमं निगूढं ॥१६॥ त्वयाद्य भक्त्या परिनोदितोहं वक्ष्ये नमस्कृत्य रघूत्तमं ते॥ रामः परात्मा प्रकृतेरनादिरानंद एकः पुरुषोत्तमो हि ॥१७॥ स्वमायया कृत्स्नमिदं हि सृष्ट्वा नभोवदंतर्बहिरास्थितो यः। सर्वांतरस्थोपि निगूढ आत्मा स्वमायया सृष्टमिदं विचष्टे ॥१८॥

दृश्यमेतदित्यर्थः ॥१७॥ नन्वीदृशस्य मनुष्यादिदेहधारणं कथं कृतमत आह। स्वमाययेति। अघटितघटनाशक्तिरूपा माया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतेरिति सिद्धांतयोरैक्यं कृत्स्नं दृश्यं सृ[illegible]तर्बहिरास्थितो यः तत्सृष्ट्वा तदेवानुप्राविश[illegible]दिति श्रुतेः। तादृशस्य मनुष्यशरीर[illegible] परिग्रहो नास्वर्योयतद्भक्तगीताशाप्रेक्ष्मतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोपि स्वमायया देहवानिव ज्ञानदृढचलोकानुग्रहं कुर्वन्नस्य ते सत्प्रयोजनाभा

ध्रुवं) वात्स्वतानुजिघृक्षयेति ॥१८॥

श्री

राम॰
९

नन्वेवंसर्वगतत्वेसर्वत्र[illegible]ःकिंनेत्यतआह।सर्वांतरस्थोपिनिगूढआत्मेति।यःपृथिव्यांतिष्ठन्पृथिव्याअंतरइत्यादिश्रुत्यासर्वांतरस्थत्वेनोक्तोपिगूढः।
एषसर्वेषुभूतात्मानप्रकाशतेदृश्यतेत्वग्र्ययाबुद्ध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतेः।तादृशस्यसतोव्यवहारकालिकमपिमानमाहस्वमाययेति।स्वा
ज्ञानकल्पितयामाययेत्यर्थः।अयंभावः नित्यशुद्धादिरूपेब्रह्मस्वरूपाज्ञानेनतस्याघटितघटनासामर्थ्यव[illegible]यामायाख्यात्रिगुणात्मशक्तिरूपा ती
धिकल्पितावच्छेदैस्तत्त्वरूपेजीवैःकल्पितासाचस्वसजातीयमेवसंसारंसुखावचंप्रसूतेअतएवतत्त्वरूपज्ञानेसकार्यायास्तस्यानाशः।र[illegible]हा ऽज्ञ
नेनेवरज्जुकल्पितभुजंगस्यभयकंपादिकार्यसहितस्य।नचजीवैस्तत्कल्पनातत्तदुपाधिभिन्नजीवेनेत्यन्योन्याश्रयः अनादित्वेनापरिहारा
त्।नन्वेकस्यतत्त्वज्ञानेनतन्नाशेसंसारोच्छेदापत्तिः।एकरज्ज्वांयुगपदुत्पन्नदृष्टानांसर्पभ्रमेएकस्यरज्जुज्ञानेनतस्यसर्पभ्रमेतत्कार्येभयकंपादीनि
वृत्तेपिअन्येषांतद्दर्शनेनतदनिवृत्तिवदुपपत्तेरितितयासृष्टमिदंविश्वंदृश्यतइतिएवंचदृष्टत्वेनतत्सिद्धिः।नान्योतोस्तिद्रष्टेतिश्रुतेः।एकेनैवाका
शेनोपाधिभेदात्घटाकाशादिव्यवहारवदेकेनैवचेतनेनोपाधिभेदादनेकजीवव्यवहारोपपत्तौचेतनानेकत्वेमानाभावात्दृष्टत्वेनतत्सिद्धिरि
तिभावः।नचतत्तद्ज्ञानरूपोपाधिविशिष्टस्यैवजीवत्वेजीवस्याज्ञानमितिव्यवहारा[illegible]नापत्तिः।सार्वविशिष्टस्यैवग्रहस्यत्वेपिग्रहस्यस्व
स्थार्येतिवदुपपत्तेरितिदिक्॥१८॥ १२॥ ॥ ७॥ ७॥ ॥॥१२॥ ॥ ॥७॥

अध्या० वा०
१०

चेतनस्वीकारे मानांतरमाह। जगंतीति। जगंति जगदंतः करणानि यत्संनिधेर्नित्यं यरिरितो मंतिस्वचेष्टां कुर्वंति। अन्यथा सर्वस्य जडत्वाच्चेतनाभावे जगद्
व्यवसंगरतिभावः। ननु निष्कलं निष्क्रियं शांतमिति श्रुतेस्तस्य निष्क्रियत याकथं तेनान्येषां व्यापारसंपादनमत आह। चुंबकलोह वदिति यथा निष्क्रि
योपि चुंबकमणिर्लोहं शक्तिविशेषात्संनिधिमात्रेण चालयति तथा चेतनो निष्क्रियोपि स्वमायावैचित्र्याद्देवतानि संनिधिमात्रात् व्यापारयतीत्यर्थः। तदुक्तमा
चार्यैरनाथसंविकारसत्त्वयस्कांतवदेव यः बुध्यादीश्चालयेत्प्रत्यक् सोहमित्यवधारयेति। एतत्तमायागुणास्पृष्टत्वादिरूपं परमात्मरूपं येजीवर्न जानंति। अत्रा

॥ जगंति नित्यं परितो भ्रमंति यत्संनिधौ चुंबकलोहवद्धि ॥ एतन्न जानंति विमूढचित्ताः स्वाविद्यया संवृतमानसा ये ॥ १९ ॥ स्वा
॥ ज्ञानमप्यात्मनि शुद्धबुद्धे स्वारोपयंतीह निरस्तमाये ॥ संसारमेवानुसरंति ते वै पुत्रादिसक्ताः पुरुकर्मयुक्ताः ॥ २० ॥ ॥

नेहेतुर्विमूढचेतसः विमूढचेतस्त्वे हेतुः स्वाविद्यया संवृतमानसा इति स्वीयाधिष्ठतया अविद्यया विद्याविरोधिन्या वदादर्यरूपया संवृतांतः करणाः १९
अतस्ते जीवाः शुद्धबुद्धे शुद्धत्वे मायादोषानाक्रांतत्वं बुद्धे ज्ञानस्वरूपे। निरस्तमाये स्वज्ञानवतां निरस्ता माया येन तादृशेमामेव ये यत्र पश्यंते मायामेतां
तरंति ते इति गीतोक्तेः। ईदृशे रामे स्वाज्ञानं स्वतरामारोपयंति त्वयमहात्वा ममहमिति जानंतीत्यायाशयः तेषां दुष्टफलमाह। संसारमिति ते पुत्रादि
सक्ताः पुरुकर्मयुक्ताः स्त्रियस्तादिकर्मयुक्ताः संसारमेवानुसरंति ॥ २० ॥ ॥ २० ॥ ॥ २० ॥ २० ॥ २० २०

एम
१०

यतस्तेयथाऽऽज्ञाः कंठगतंचामीकरंस्वर्णालंकारंयथानजानंतिएवंहृदयेस्थितंरामंतेनजानंतिअतः संसारमेवानुसरंतीत्यर्थः किंचपरात्मन्यज्ञानासं
भवइतिदृष्टांतेनाह। यथेति। अप्रकाशस्तमोयथारवेर्ज्योतिः स्वभावज्योतिः स्वरूपेनविद्यतेतथाविशुद्धविज्ञानेननिर्विशेषापरोक्षज्ञानेनघनेनेनिबि
डेपरतः परात्मनिउत्कृष्टेस्योत्कृष्टेरामेऽविद्याकथंस्यात्नतादृशेवस्तुन्यविद्यानवकाशादितिभावः। तदुक्तमाचार्यैः अप्रकाशोयथादित्येनास्तिज्यो
तिः स्वभावतः नित्यबोधस्वरूपत्वान्नाज्ञानंनद्ब्रह्मणीति २१ ननुस्वाज्ञानेनराममहंव्यवहरतिजनइत्यतआहसगतंअन्यो नस्यान्यचारोपासंभवादि
दृगा

जानंतिनैवंहृदयेस्थितंवैचामीकरंकंठगतंयथाज्ञाः यथाऽप्रकाशोनतुविद्यतेरवौज्योतिःस्वभावेपरमेश्वरेतथा विशुद्धविज्ञानघनेरघू
त्तमेऽविद्याकथंस्यात्परतःपरात्मनि २१ यथाहिचाक्ष्णाभ्रमताग्रहादिकंविनष्टदृष्टे मतीवदृश्यते तथैवदेहेंद्रियकर्तुरात्मनःकृतंपरेऽध्य
भ्र ((स्यजनोविमुह्यति २२ २२

स्यात्रांक्षसदृष्टांतंतथामोहंजीवेउपपादयति। यथाविनष्टदृष्टेर्दोषयुक्तदृष्टेःपुरुषस्यभ्रमताक्ष्णाग्रहादि
कंभ्रमतीवेत्येलेधभ्रमतीवेतिदृश्यतेतेनैवनष्टदृष्टिनापुरुषेणेतिशेषः तथैवदेहेंद्रियावच्छिन्नस्यकर्तुरात्मनोंतःकरणस्याहंकाराख्यस्यकृतंपरे
सर्वधर्मातिरिक्तेतदवच्छिन्नचेतनेध्यस्यजनोजीवोमुह्यतिअहंकर्तेतिमोहंप्राप्नोतिएवंच प्रासिगतभ्रमणस्यग्रहादावारोपः यथाचांतःकरण
धर्मस्यकर्तृत्वादेरात्मन्यारोपस्तथास्वाज्ञानस्यरामेआरोपइत्याशयः २२ २२ उ २२ २२ २२ २२

अध्या॰ रा॰
११

भगवति रामे स्वतः ज्ञानमंशतो(वी)त्यपि पुनरपि हादर्शी यो क्त युक्त्येवाह। नाहेति। सूर्ये यथा निरात्रिदिवं विभागाभावे हेतुः प्रकाशरूपाव्यभिचारतः क्वचित्कापि तत्र यथेः
ज्ञानाज्ञानयोर्भगवत्यनवस्थितौ हेतुः शुद्धचिद्घनत्वं २३ उपसंहरति तस्मादिति परानंदमये। सर्वश्रेष्ठे तेरेतदानंदमात्रायाप्युपजीवनात्। विज्ञानरूपे। निर्वि
कल्पकज्ञानरूपे तमोऽज्ञानरूपं तमोऽसंबंधे हेतुद्वयमज्ञानसाक्षित्वं। मायाधिष्ठानत्वरूपं मायाश्रयत्वं च मोहकारणं तमोऽज्ञानं। यो यन्मायाधिष्ठाता स त
द्विषयाज्ञानहीन इति लोके दर्शनादिति भावः। नन्वेवं सति श्रीसीताहरणादौ सेयं हर्षकैर्वाप्यानुदत्तम इत्याद्याचार्योक्तेः। का गतिरिति चेत् शृणु। रावणवधा

नाहो न रात्रिः सवितुर्यथा स्यात् प्रकाशरूपाव्यभिचारतः क्वचित्। ज्ञानं तथाज्ञानमिदं द्वयं हरौ रामे कथं स्थास्यति शुद्धचिद्घने ॥२३॥ तस्मात्परा-
नंदमये रघूत्तमे विज्ञानरूपे हि न विद्यते तमः। अज्ञानसाक्षिण्यरविंदलोचने मायाश्रयत्वान्न हि मोहकारणं ॥२४॥ अत्र ते कथयिष्यामि रहस्य-
मपि दुर्लभं। सीतारामम(रु)त्सूनुसंवादं मोक्षसाधनं ॥२५॥ पुरा रामायणे रामो रावणं देवकंटकं। हत्वा रणे रणश्लाघी सपुत्रबलवाहनं ॥२६॥
सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः। अयोध्यामगमद्रामो हनुमत्प्रमुखैर्वृतः ॥२७॥ ॥ ॥ ॥

र्थं मनुष्यत्वनाट्यनाय भगवता संकल्पपूर्वं वृत्तस्य स्वमाहात्म्याच्छादनस्य तत्र तमः शब्देनाक्तेर्दोषात्। उक्तं हि संक्षेपशारीरके संकल्पपूर्वकमसद्ग्रहणं
दनस्य नाहं विज्ञान इति कंचन कालमेतत्। ब्रह्मोपदेशाद्युपलक्ष्यनिमित्तमात्रेण तच्चोत्ससर्ज सकृतेसत्तिदेवकार्य इति। भागवतेप्युक्तं स्त्रीसंगिनां गतिरिति
प्रथमां चकारेति २४ महत्सूनुर्वायुपुत्रो हनुमान् २५ रामायणे। रामायणप्रवर्तकेत्र मावतारकाले इत्यर्थः। देवकंटकं देवद्रोहिणं २६ ॥ २७ ॥

राम॰
११

परिवृतः सीताद्विभिरितिशेषः २८ पुरतः स्थितं अग्रेस्थितं। अनेनगुरुरूपसदनंदर्शितं। निराकांक्षं। ज्ञानेतरधनादिनिरपेक्षं। २९। तत्वं। मत्स्वरूपतत्वं। निष्कल्मषोयमित्यनेनज्ञानाधिकारित्वंसूचितंनो। आवयोः ३० रामस्यतत्वंश्रोतुर्निश्चितंयथाभवतितथाप्राह। लोकविमोहिनीत्यनेनबंधनकर्त्रीत्वंबंधविमोकेसामर्थ्यमितिदर्शितं। राजाहयावद्देहोहितदाहयैवमुच्यतइतिलोकेप्रसिद्धं। एवंचभगवतीस्वरूपेवमुख्यंमोक्षकारणमितिदर्शितं ३१

अभिषिक्तः परिवृतोवसिष्ठाद्यैर्महात्मभिः। सिंहासनेसमासीनःकोटिसूर्यसमप्रभः २८ दृष्ट्वातदाहनूमंतंप्रांजलिंपुरतःस्थितंकृतकार्यंनिराकांक्षंज्ञानापेक्षंमहामतिः २९ रामःसीतामुवाचेदंब्रूहितत्वंहनूमते। निःकल्मषोयंज्ञानस्यपात्रंनोनित्यभक्तिमान् ३० तथेतिजानकीप्राहतत्वंरामस्यनिश्चितं। हनुमतेप्रपन्नायसीतालोकविमोहिनी। ३१ सीतोवाच। रामंविद्धिपरंब्रह्मसच्चिदानंदमद्वयं॥ १

जानकीप्राहेत्युक्तंतदाह। राममिति। रामंपरंब्रह्मविद्धि। रमंतेयोगिनोनंतेनित्यानंदेचिदात्मनि। इतिरामपदेनेदंपरंब्रह्माभिधीयतेइतितापनीयेपाठश्रुतेः। सर्वबाधरहितं। सत्यत्वंबाधराहित्यंजगद्बाधैकसाक्षिणः। बाधः किंसाक्षिकोब्रूहिनत्वसाक्षिकइष्यते। चित्ज्ञानस्वरूपंआनंदं तद्रूपंअद्वयं ए

कमेवाद्वितीयमितिश्रुतेः॥ ५ ॥ ॥ ७

सर्वोपाधिविनिर्मुक्तं। स्थूलसूक्ष्मकारणसकलोपाधिनिर्मुक्तं। विराड्हिरण्यगर्भस्वकारणं चैत उपाधयः। ईशस्यपश्चिमार्धेहीनं तुरीयं तत्त्वं विदुरिति वार्त्तिकं। किंच सर्वोपाधिविधर्मैर्विनिर्मुक्तमस्पृष्टमित्यर्थः। सत्तामात्रं। वस्तुमात्रे सदिति व्यवहारनियामकमित्यर्थः। एतत्संबंधादेव सर्वत्र सदिति व्यवहार इति भावः। अगोचरं। मनोवचसोरप्यविषयमित्यर्थः। यतो वाचो निवर्त्तंते अप्राप्य मनसा सहेति श्रुतेः। ३२। आनंदं। तत्त्वं तेन विपुलत्वमुपलक्ष्यते यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति श्रुतेः। निर्मलं। रजोहीनं शांतं। सोपशमत्वात्। प्रपंचोपशमं शिवं शांतमिति श्रुतेः। निर्विकारं। जायतेऽस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकाररहितं। न जायते म्रियते वेति गीतोक्तेः। अनेनापरिणामित्वं सूचितं। निरंजनं। अविद्या तत्कार्यरूपतमो

सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं ३२ आनंदं निर्मलं शांतं निर्विकारं निरंजनं ॥ सर्वव्यापिनमात्मानं स्वप्रकाश ॥ ॥ ॥ ॥
मकल्मषं ॥३३॥ ॥३३॥ ॥३३॥ ॥३३॥
॥

हीनं। आदित्यवर्णं तमसः परस्तादिति श्रुतेः। सर्वव्यापित्वादेवात्मानं अतति व्याप्नोतीत्यात्मा। सर्वव्यापि सर्वभूतांतरात्मेति श्रुतेः। स्वप्रकाशं। अत्रायं पुरुषः स्वयंज्योतिरिति यस्य भासा सर्वमिदं विभातीति च श्रुतेः। अकल्मषं। आत्मापहतपाप्मेति श्रुतेः। सदादिशब्दानां कल्पितप्रवृत्तिनिमित्तद्वारा पर्यायत्वेन सहप्रयोगः। यानि त्वभावमुखेन बोधकानि तेषु न काप्यनुपपत्तिः। एवं चायातः कल्पितप्रवृत्तिनिमित्तप्रकारकबोधे तत्त्वाद्यविशेषोक्तेः सर्वधर्मरहितत्वेन ब्रह्मोक्त्या धर्मांशेऽकल्पिततत्त्वग्रहे शुद्धं निर्धर्मकं ब्रह्मबोधः सर्वैः पदैर्भवतीति बोध्यं तत्र दुर्बोधस्यात्मतत्त्वस्य बोधार्थं पुनः पुनः शब्दतोऽर्थतश्च परमकारु
ण

नन्वेवंविधोरामएवजगत्कारणत्वाद्यसंभवस्तस्मिन्नितिकुतोजगदुत्पादीत्यतआह।मामिति।मूलप्रकृतिंसर्वजगदुपादानकारणमित्यर्थः।प्रकृतित्वाद्यस्योपादा
नकारणेप्रसिद्धेः।तत्तदुपादानकारणानांमहदादीनामप्युपादानकारणत्वान्मूलप्रकृतित्वमस्याः।मांमायांतुप्रकृतिंविद्यादितिश्रुतिप्रसिद्धेः।ब्रह्मणप्यव्यक्तात्ततोप्र
हास्मद्दृश्यासत्त्वासत्त्वाभ्यांचानिर्वचनीयामनादिमेश्वरीमायांशरीरत्वंचास्याईश्वरस्वरूपात्तानरूपत्वेनेतिबोध्यं।एषाचजीवाश्रितेवेश्वरसंनिधानात्तद्रूपेणविव
र्ततेइतिबोध्यं।मूलप्रकृतित्वमेवस्फुटयतिसर्गस्थित्यंतकारिणीमिति।उत्पत्तिस्थितिप्रलयकर्त्रीनन्वेवंतत्तदैक्षतबहुस्यांप्रजायेयेतिश्रुतेर्येनोवाइमानिभूता
निजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीतिब्रह्मप्रकरणस्थश्रुतेश्चब्रह्मणोजगत्कारणत्वंलक्ष्यतेतत्तद्विरुध्येतेत्यत्राह।तस्यसंनिधीति।यथेंद्रजा

॥मांविद्धिमूलप्रकृतिंसर्गस्थित्यंतकारिणीं।तस्यसन्निधिमात्रेणसृजामीदमतंद्रिता॥३४॥

लिकमायाशक्तेस्तत्तन्मंत्रनिष्ठायाऐंद्रजालिकंविनानस्वकार्येसामर्थ्यंतथास्याशक्तेः।तत्सन्निधानेनैवजगत्स्रष्टृत्वमितितत्रतदुपचारः।यद्वागृहिणीवैचि
त्र्येणैवसिद्धस्वरूपस्यगृ[illegible]स्यस्वसंबंधजसंकल्पवशवर्त्तिनिगृहिणी।तथामायायोवैचित्र्येणैवसिद्धस्येश्वरस्यस्वसंगततत्संकल्पवशवर्तिन्यहमित्याह।
अतंद्रितातत्संकल्पितेर्थेनिरालस्येत्यर्थः।तदुक्तंवाल्मीकीयेरामंप्रतिकालवचनेनत्वंसिसृक्षुर्ह्यरान्लोकानेकस्त्वंमाययासहसार्धंयाश्रमयादेव्यामांत्वंपूर्व
मजीजनइति।एवंचमदुक्तंजगत्सृष्ट्यादेस्तत्त्वारोपइतिभावः॥३५॥

अ॰या॰ वा॰
१३

यद्यपि माया शबलेईश्वरे एव जगदुपादानत्वं निमित्तत्वं च। जगतस्तूपादानं मायामाहायतामसीं। निमित्तं शुद्धसत्वां तामुच्यते ब्रह्मतद्धिरेति अभियुक्तोक्तेस्तथापि अ
विशिष्टस्य विशेषणविशेष्योभयानतिरेकेण मायागतस्य तत्स्वरूपगतत्वारोपेणैव तथाव्यवहार इत्याह। नरिति। यतस्तत्स्मानिध्यान्मयास्टष्टमतस्तत्र सृष्ट्यादि
न धे सतत्वरूपान सृष्टितस्त आरोप्यते रज्जौ सर्पइवेति भावः। एतदेव द्रढयितुं कानिचि कृतानि तत्रारोप्याणि दर्शयति अयोध्येत्यादि। ३५। ३६। ३७ मायामा

तत्सान्निध्यान्मयासृष्टं तस्मिन्नारोप्यतेबुधैः। अयोध्यानगरे जन्म रघुवंशेऽतिनिर्मले। ३५। विश्वामित्रसहायत्वं मखसंरक्षणं ततः। अहल्या
शापशमनं चापभंगो महेशितुः। ३६। मत्पाणिग्रहणं पश्चात्भार्गवस्य मदक्षयः। अयोध्यानगरे वासो मया द्वादशवार्षिकः। ३७। दंडका
रण्यगमनं विराधवध एव च। मायामारीचमरणं मायासीताहृतिस्तथा। ३८। जटायुषो मोक्षलाभः कबंधस्य तथैव च। शबर्याः पूज
नं पश्चात्सुग्रीवेण समागमः। ३९। वालिनश्च वधः पश्चात्सीतान्वेषणमेव च। सेतुबंधश्च जलधौ लंकायाश्च निरोधनं। ४०। रावणस्य
वधो युद्धे सपुत्रस्य दुरात्मनः। बिभीषणे राज्यदानं पुष्पकेण मया सह। ४१। ॥

रीचमरणं मायया गृहीतमृगरूपमारीचमारणमित्यर्थः। मायासीता
हृतिरिति। तदुक्तं। कूर्मपुराणे उत्तरखंडे चतुस्त्रिंशोऽध्याये। रामस्य सत्यसंगो भार्यो रावणो राक्षसेश्वरः। सीतां विशालनयनां चकमे कालनोदितः गृहीत्वा मायया वेषं
चरंतीं विजने वने समाहर्तुं मनश्चक्रे तापसः किल कामिनीं। विज्ञाय सा च तद्भावं स्मृत्वा दाशरथिं पतिं जगाम शरणं वह्निमावसथ्यं शुचिस्मिता। ॥ ७ ॥

सम॰
१३

भू म्र१

प्रपेदे पावकं देवं साक्षिणं विश्वतोमुखं आत्मानं रक्षस्व पुंसं सर्वं तद्दृष्ट्वा स्मितं मिस्रायघृश्रो लोकानुत्कार इति च ष्टकं जप्त्वा रामपत्नी यशस्विनी ध्यायंती म
नसा तस्थौ राममुन्मीलितेक्षणा । अथावसथ्यान्भगवान्हव्यवाहो महेश्वरः । आविरासीत्सुदीप्तात्मा तेजसा निर्दहन्निव । सृष्ट्वा मायामयीं सीतां स रा
वणवधेच्छया । सीतामादाय धर्मिष्ठां पावकोंतरधीयत तद्दृष्ट्वा तु रावणवधं रामो लक्ष्मणसंयुतः । समादायाभवत्सीतां शंकाकुलितमानसः । सा च मायाय
हृता नासीत्ता मायामयी पुनः । विवेश पावकं दीप्तं ददाह ज्वलनोपि तां दग्ध्वा मायामयीं सीतां भगवानुग्रदीधितिः रामायादर्शयत्सीतां पावकोसौ
सुरप्रियः । एतत्पतिव्रतानां वै माहात्म्यं कथितं मया स्त्रीणां सर्वाघशमनं प्रायश्चित्तमिदं स्मृतमिति । अनेन स्त्रीणामेवं विधो यदि अग्निप्रवेशो न
दोषाय विपरीत सर्वपापहरश्चेति सूचितं वाल्मीकीयेपि मारीचवधार्थं गते रामे रामहते ननेतेन राक्षसेन रामशब्द सदृश शब्दे रात्रौ शोकाकुलितलक्ष्मण ह्म
स्य रामसहायार्थं गमनप्रेरणावसरे आरण्यकांडे । अपि त्वा सह रामेण पत्न्ये पुनरागतः लक्ष्मणेनैवमुक्ता तु रुदंती जनकात्मजा । प्रत्युवाच
ततो वाक्यं तीव्रं बाष्पपरिप्लुता । गोदावरीं प्रवेक्ष्यामि हीना रामेण लक्ष्मण प्रवेक्ष्यामि हुताशनं । न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे इति सीता
त्यागस्सूचितो यमर्थः । अन्यथैवं प्रतिज्ञाया रावणशरीरस्पर्शे जगन्मातुः प्रतिज्ञाहानिः स्यात् । तस्मात्प्रवेक्ष्यामि हुताशनमित्यनेन तत्स्वकर्तव्या
र्थ एवोक्त इति मंतव्यं एतत्प्रवेशादेव हनुमत्पुच्छसंबद्धाग्निना लंकादाहोपपत्तिः अन्यथा रावणवशीकृतेन लोकपालाग्निना कथं तन्नगरदा
हः स्यात् एतच्छक्तिप्रवेशेन तु तस्य स्वातंत्र्यहान्या तदुपपत्तिरित्यलं ॥ ३८ ॥ ३९ ॥ ४० ॥ ४२ ॥ ४१ ॥ ४२ ॥

प ४७ ॥

एवमादीनि ब्राह्मणेभ्यो दानादीन्यादित्र्याद्याणि॥ निर्विकारे जन्मादिरहिते आरोपयंति। एवंजगत्कर्तृत्वादिकमपि मन्निष्ठमेव रामे आरोपयंतीत्यर्थः। ध्रर
निर्विकारत्वमेव रामस्योपपादयति। रामइतिति निष्कलं निष्क्रियं शांतमित्यादिश्रुतेः। आनंदमूर्त्तिरानंदस्वरूपः अचलः कूटस्थोत एव परिणामहीनः मा
यागुणान्। मायया सृष्टपदार्थाननुगतः तदधिष्ठानत्वेन स्थितस्तथाविभातिस्फटिकरूपो भातियथा रज्ज्ववच्छेदेन सर्पाकारोंतः करणपरिणामइतिरज्जुःस

४२

अयोध्यागमनं पश्चात् राज्ये रामाभिषेचनं॥ एवमादीनि कर्माणि मेयेवाचरितान्यपि आरोपयंति रामे स्मिन् निर्विकारे खिलात्मनि॥४२॥
रामो न गच्छति न तिष्ठति नानुशोचत्याकांक्षते त्यजति नो न करोति किंचित्॥ आनंदमूर्त्तिरचलः परिणामहीनो मायागुणाननुगतो हि त
था विभाति॥४३॥ महादेव उवाच॥ ततो रामः स्वयं प्राह हनुमंतमुपस्थितं॥ शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां॥४४॥ ॥

पोत्मना भाति। एतदेव विवर्त्तोपादानत्वमित्याहुः स्वच्छ सर्पाकारोंतः करणपरिणामः सत्त्वासत्त्वाभ्यामनिर्वचनीय इत्युच्यते। एवं प्रपंचोप्यनिर्वचनीय इति
दिक्॥४३॥ उपस्थितं। आत्मनो द्वितीयत्वे जीवेश्वरादिव्यवस्था कथमिति जिज्ञासयोपसन्नं। आत्मा ईश्वरः अनात्मा चिदाभासो जीवः। परात्मा शुद्धचै

॥ तन्यं॥४४॥ ॥ ५ ॥ ॥४४॥ ॥ ७

तेषांतत्वमेवसदृष्टांतमाह। आकाशस्येति। एकस्याकाशस्यत्रिविधोभेदः। महाकाशोजलाशयावच्छिन्नाकाशः प्रतिबिंबाकाशश्चेतिभेदात्। तदेवाह। महानिति। महाकाशइत्यर्थः। सएवमहाकाशोजलाशयेतदवच्छिन्नएवभवतितत्रैवजलाशये परं प्रतिबिंबाख्यंदृश्यते। एवंनभस्त्रिविधमित्यर्थः॥ ४५॥ एवंदृष्टांतमुपपाद्यदार्ष्टांतिकमाह। बुद्धीति। सर्वबुद्धिसाक्षितयाबुध्युपहितंचैतन्यं। पूर्णउपाधिमंडलस्यविशृंखलादृष्ट्यासकलबुद्धिसमष्टिरेवमायेति। तदवच्छिन्नंचैतं

आकाशस्ययथाभेदस्त्रिविधोदृश्यतेमहान्॥ जलाशयेमहाकाशस्तदवच्छिन्नएवहि॥ ४५॥ प्रतिबिंबाख्यमपरंदृश्यतेत्रिविधंनभः॥
बुध्यवच्छिन्नचैतन्यमेकंपूर्णमथापरं॥ आभासस्तत्वपरंबिंबभूतमेवंत्रिधाचितिः॥ ४६॥ ॥४६॥ ॥४६॥ ॥४६

न्यमीश्वरइत्यर्थः॥ अथापरमाभासस्तत्तद्बुद्धिप्रतिबिंबभूतोजीवइत्यर्थः॥ अपरंबिंबभूतंएवंचितिस्त्रिधाइत्यर्थः॥ आभासस्तत्वपरंबिंबभूतमितिपाठे बुध्यवच्छिन्नं। चैतन्यमेकमित्यंतेनेश्वरः पूर्णमथापरमित्यनेनशुद्धं॥ आभासस्तत्वपरमिविजीवः॥ जीवत्वमेवस्फुटयतिबिंबभूतमिति। बिंबशब्देनजाग्रदवस्थाभिमानी॥ विशतिदेहेंद्रियादिष्विति व्युत्पत्तेः॥ एतत्प्रतिबिंबाकाशस्थानीयमितित्रिधाचितिरित्यर्थः। स्साद्दुः तत्रैकोमिथ्याभूतोउपाध्योर्मिथ्यात्वात्॥ ४६

त्य

नन्वेवं बुद्धेश्चैतन्ये साक्षीति व्यवहारानुपपत्तिः। साक्षाद्द्रष्टरि साक्षी न च बुद्धेश्चैतन्येद्दृष्टृत्वमित्यत आह। साभासेति आभासेन चेतनप्रतिबिंबेन सहितायाबुद्धेरंतःकरणस्येत्यर्थः। तद्गतं कर्तृत्वं दर्शनकर्तृत्वमबुधैः साक्षिणि आरोप्यते तेनायं साक्षिपदवाच्य इत्यर्थः। अयमाशयः जानातीत्यादावंतःकरणवृत्तिविशेषरूपा क्रियाज्ञाधात्वर्थः आश्रयसंविशिष्टश्चतिङर्थआश्रयः यस्य राध्यासेनाभाससबुद्ध्योर्विवेकाग्रहात्। तदुक्तमाचार्यैः आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रियाउभयं चाविवेकेन जानातीत्युच्यते मृषा बुद्धेः कर्तृत्वमध्यस्य जानातीति तदुच्यते तथा चैतन्यमध्यस्य तत्त्वबुद्धेरिहोच्यत इति। आत्माभास इति बहुव्रीहिः धीयोंतःकरणस्य तदेवाहउभयं चेति। मेघेति आभाससबुद्धितत्क्रियापाणां मिथ्यात्वात् अयं व्यवहारोपि मिथ्येत्यर्थः। एवं च साभाससबुद्धिगत द्रष्टृत्वस्याविच्छिन्ने परिच्छिन्नेऽविकारिणि साक्षिणि बुद्धितादात्म्यायन्नाभासतादात्म्याध्यासेनारोपः। तथा जीवो नित्यः संसरतीति व्यवहारात्। जीवत्वमपि तत्रारोप्यते इत्यर्थः। ४७

साभाससबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि। साक्षिण्यारोप्यते भ्रांत्या जीवत्वं च तथाबुधैः ॥ ४७ ॥ आभासमुख्यबुद्धिर्विद्याकार्यमुच्यते। अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः ॥ ४८ ॥ ॥ ४८ ॥ ॥ ४८ ॥ ॥ ४८ ॥ ॥ ७

आभासमाहायत्तुनं न तथा व्यवहारसंभव इत्याह। आभासस्त्विति। तस्य मुख्यात्वाद्विद्याकार्यत्वाच्च न तथा व्यवहारस्य तमाहाय नोपपत्तिरित्यर्थः। न द्वितीयेन मुख्यत्वमित्ति मिथ्यैवाच्च द्वितीयेन मुख्यमन्यादित्येवं सर्वे सिद्धबाधानुभवात् अत एवासा वविद्याकार्यं जीवात्मा मुख्यो। आदृशी त्वंलाध्यासिकं न तु वास्तवमिति बोध्यं आभासमत्यहं चाकरे प्रयंचितं विस्तरभयान्नेहोच्यते। ननु कूटस्थे विच्छिन्नं किं चितेर्वास्तवं नेत्याह। अविच्छिन्नं॥ विच्छेदोस्मिन् इत्यविच्छिन्नं। नन्वेवं त्रिधा चितिरित्यसंगतं तत्राह॥ विच्छेद इति भेद इत्यर्थः॥ विकल्पितः उपाध्यध्यासकृत इत्यर्थः। एवं जीवानां परस्परं भेदोप्यध्यासकृत एवेति बोध्यं॥ ४८ ॥ ॥ ॥ ७॥

२८२

१५

पंच॰
१५

म

नाथ्य

कल्पितभेदसत्वे प्रमाणमाह। अवछिन्नस्येति अवछेदो भेदस्तद्युतः। अध्यासिकभेदवतः साभासस्याहमस्तत्वमस्यादिवाक्यैः पूर्णेनेश्वरेणैकत्वं प्र
तिपाद्यते तत्तथात्वासतिकल्पितभेदसत्तिउपपद्यते इति शेषः सर्वथा भेदाभावे तदानर्थक्यं। वास्तवेपि भेदे तद्धानर्थक्यवास्तवस्य वचनज्ञानेनापि नि
वृत्तेरिति भावः। अत्रावछिन्नस्य साभासस्याहं इत्यनेन त्वं पदार्थो दर्शितः पूर्णेनेत्यनेन तत्पदार्थो दर्शितः ॥४८॥ एतदेव ध्वनयंस्तदुपदेशफलमाह ऐक्ये
ति आत्मनोर्जीवेश्वरयोः ऐक्यज्ञानं अहं ब्रह्मेति ज्ञानं यदेति कर्मानुष्ठानात्पापक्षयसमुत्पन्नैकषायकर्ममभिः पक्षेन ततो ज्ञानं प्रवर्त्तते इति स्मृतेः अयं भावः
जीवेश्वरयोरुपाधिभिन्नयोरैक्यं श्रूयमाणं बाधितं सत् तत्त्वंपदयोरुपाधिरहितलक्षणया बिंबभूतशुद्धब्रह्मैक्यपरतया पर्यवस्यतीति बोध्यं। एतज्ज्ञा

अवछिन्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ॥ तत्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ४८ ॥ ऐक्यज्ञानं यदोत्पन्नं महावाक्ये
न चात्मनोः ॥ तदाविद्या स्वकार्यैश्च नश्यत्येव न संशयः ॥ ५० ॥ ॥ ५० ॥ ॥ ५० ॥ ॥ ५० ॥ ॥ ५० ॥ ॥ ५० ॥

को विस्तरेण वयं चिंतं ब्रह्मैक्यज्ञानफलमाह। तदेति। तादृशज्ञाने सति निर्धर्मकत्वेन चिन्मात्रतया तत्त्वरूपहान रूपाऽविद्या स्वकार्यैः प्रपंचैः सह नश्यत्ये
वनसंशयः। एतेन भ्रष्टबीजवत्कार्यजननसामर्थ्यमेव तस्य ज्ञानेन क्रियत इति। पक्षोयास्तः तदुक्तमाचार्यैः। सोयमित्यादिवाक्येषु विरोधात्तदिदंतयोः
त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा। मायाविद्ये विहायैवमुपाधी परजीवयोः। अखंडं सच्चिदानंदं परं ब्रह्मैव लक्ष्यते। यथा सोयं देवदत्त इत्यादौ देश
वीनुभूतत्वरूपतन्मायाद्धानीमनुष्यमानत्वरूपे तत्ताया ब्रत्यागेन देवदत्तस्वरूपमात्रं लक्ष्यते तथा बुद्धिसमष्टिरविद्याव्यष्टिरूपेति बोध्यं अप ॥ ॥ ५१ ॥

रोक्षतानं मननादिसंस्कृतांतःकरणाद्दिवं दृश्यते त्वग्र्यया बुद्ध्येति स्मृतेः। अध्ययाम मननादिसंस्कृतमनः शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने क
रणमिति गीताभाष्योक्तेश्चेति दिक्॥ उक्तं च नारदीये तत्त्वमस्यादिवाक्योत्थ ज्ञानं मोक्षस्य साधनमिति श्रुतिरपि तमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्य
तेऽयनायेति ५० ईदृशज्ञानस्य मुख्यं साधनमाह। एतदिति। मद्भक्त इति हेतुगर्भं विशेषणं। मद्भावो मत्सायुज्यं भक्तेः कारणत्वदार्ढ्याय भक्तिव्यतिरेकेका

एतद्धि ज्ञात्वा मम भक्तो मद्भावायोपपद्यते मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यतां॥ न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ५१ इदं रह
स्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ मद्भक्तिहीनाय शठाय न त्वया दातव्यमैंद्रादपि राज्यतोधिकं ५२ श्रीमहादेव उवाच
एतत्तेभिहितं देवि श्रीरामहृदयं मया॥ अतिगुह्यतमं हृद्यं पवित्रं पापशोधनं॥ ५३ साक्षाद्रामेण कथितं सर्ववेदांतसंग्रहं यः पठेत्स
ततं भक्त्या स मुक्तो नात्र संशयः॥ ५४ ब्रह्महत्यादिपापानि बहुजन्मार्जितान्यपि॥ नश्यंत्येव न संदेहो रामस्य वचनं यथा॥ ५५ योतिभ्र
ष्टोतिपापी परधनपरदारेषु नित्योद्यतो वा स्तेयी ब्रह्मघ्नमातापितृवधनिरतो योगीवृंदापकारी॥ यः संपूज्याभिरामं पठति च हृदयं रामचंद्र
स्य भक्त्या योगींद्रैरप्यलभ्यं पदमिह लभते सर्वदेवैः स पूज्यं॥ ५६॥ इत्युमामहेश्वरसंवादे प्रथमः॥ १ ॥ ॥ १ ॥ १॥

र्यव्यतिरेकमाह। मद्भक्तीति शास्त्रगर्तेषु शास्त्रबोधितक्रियाकलापरूपगर्तेषु॥ ५१॥ ममात्मनः मद्रूपस्य चेतनस्य॥ ५२॥ ५३ सर्ववेदांतसंग्रहं सर्ववेदां
तप्रतिपाद्यार्थसारसंग्रहरूपं॥ ५४॥ ५५॥ अतिभ्रष्टो पापात्कमतिपापीत्यादि सर्वदेवैः पूज्यं पदं ब्रह्मलोकं स लभत इत्यर्थः॥ ५६॥ इति सकलराजवि
पद्गुरुसामर्थ्यादिविरुदावलिविराजमानस्य हिम्मतिवर्मणः पुत्रस्य श्रीरामवर्मणः कृतौ अध्यात्मरामायणसेतौ बालकांडे प्रथमसर्गः १

अथ पार्वती शिवोक्तमभिनंदति ॥ धन्यास्मीति ॥ अतिसंदेहग्रंथिः यदि रामः परं ब्रह्म तर्हि कथं तस्य शोकादि यदि मर्त्यत्वाज्जीवः कथं तदोपास्यत्वमित्याकं-
रो महान्संदेह रूपो ग्रंथिः ॥ विच्छिन्नः निवृत्तः ॥ १ ॥ भवः संसारस्तमपहंति नाशयतीति तादृशं राम तत्त्वामृतरसायनं रामतत्त्वरूपममृतं जनकं मोक्षजनकं
रसायनं पिबंत्या मे मनो न तृप्यति ॥ २ ॥ पुनर्विस्तरेण रामकथां पृच्छति ॥ श्रीरामस्येति ॥ स्फुटाक्षरमिति क्रियाविशेषणं ॥ ३ ॥ अथ महादेवस्तां कथां विवक्षु-
स्तत्र श्रोतृप्रवृत्तये तन्माहात्म्यमाह ॥ शृण्विति ॥ आत्मन्यधि अध्यात्मं सर्वात्मसु अंतर्यामितया स्थितस्य रामस्य चरितं तद्वर्णनरूपं काव्यं ॥ ४ ॥ तापत्रयं आध्या-

पार्वत्युवाच ॥ धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगत्प्रभो ॥ विच्छिन्नो मेतिसंदेहग्रंथिर्भवदनुग्रहात् ॥ १ ॥ त्वन्मुखाद्गलितं रामतत्त्वामृ-
तरसायनं ॥ पिबंत्या मे मनो देव न तृप्यति भवापहं ॥ २ ॥ श्रीरामस्य कथा त्वत्तः श्रुता संक्षेपतो मया ॥ इदानीं श्रोतुमिच्छामि विस्तरेण
स्फुटाक्षरं ॥ ३ ॥ महादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ॥ अध्यात्मरामचरितं रामेणोक्तं पुरा मम ॥ ४ ॥ तदद्य कथ-
यिष्यामि शृणु तापत्रयापहं ॥ यच्छ्रुत्वा मुच्यते जंतुरज्ञानोत्थमहाभयात् ॥ प्राप्नोति परमामृद्धिं दीर्घायुः पुत्रसंततिं ॥ ५ ॥ गत्वा लोके करुदं
तीव्यसनमुपगांतब्रह्मणे प्राह सर्वं ब्रह्माध्यात्मामुहूर्तं सकलमपि हृदावदंशोपात्मकत्वात् ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

त्मिकाधिभौतिकाधिदैविकाख्यं दुःखत्रयं तत्राध्यात्मं रोगादिजं कामक्रोधादिजं च आधिदैविकं ग्रहादिनिमित्तं ॥ आधिभौतिकं चोरादिनिमित्तं ॥ ५ ॥ कथां प्रशंसति ॥
भूमिरिति ॥ रक्षोगणानां भारेण मग्ना सा धरा जले मग्ना गोरूपं धृत्वा देवादिभिः सह ब्रह्मासनस्य ब्रह्मणो लोकं गत्वा ब्रह्मणे उपगतं स्वीयं स्वच्छासं सर्वं व्यसनं
प्राह स च मुहूर्तं ध्यात्वा सकलं दुःखकारणं तन्निवृत्तिकारणं च हृदा वेत्त ॥ अज्ञानात्तत्र हेतुः अशेषात्मकत्वात् ॥ सर्वसाक्षित्वेन समष्टिरूपत्वात् इत्यर्थः ॥ ६ ॥

तस्मादिति। अनंतरमिति शेषः। तदनंतरं ध्यानानंतरमित्यर्थः। देव्या च भूम्या च सहित इति शेषः। अखिललोकहृत्स्थं सर्वांतर्यामिणमित्यर्थः। स वा एष अजात्मा हृदीति श्रुतेः। अजरं स एष महानात्मा अजर इति श्रुतेः। सर्वज्ञं यः सर्वज्ञः सर्वविदिति श्रुतेः। ईशं एष सर्वेश्वर इति श्रुतेः। हरिं॥ हराम्यघं च देहिनां स्मृत्या हविर्भागं क्रतुष्वहं। वर्णश्च मे हरिर्यस्मात्तस्माद्धरिरहं स्मृत इति स्मृतेः। श्रुतिसिद्धनिर्मलपदैः श्रुतिविस्पष्टप्रतिपदयुक्तैः। पुराणोद्भवैर्वेदोक्तैरित्यर्थः। भक्तिमूलिकैर्वचनैर्गद्गदवाणीम्

तस्मात्क्षीरसमुद्रतीरमगमद्ब्रह्मा ययौ देवैर्वृतो देव्या चाखिललोकहृत्स्थमजरं सर्वज्ञमीशं हरिं॥ अस्तौषीच्छ्रुतिसिद्धनिर्मलपदैः स्तोत्रैः पुराणोद्भवैर्भक्त्या गद्गदया गिरातिविमलैरानंदबाष्पैर्वृतः॥ ७॥ ततः स्फुरत्सहस्रांशुसहस्रसदृशप्रभः। आविरासीद्धरिः प्राच्यां दिशां व्यपनयन्तमः ॥ ८॥ कथंचिद्दृष्टवान्ब्रह्मा दुर्दर्शमकृतात्मनां॥ इंद्रनीलप्रतीकाशं स्मितास्यं पद्मलोचनं॥ ९॥ किरीटहारकेयूरकुंडलैः कटकादिभिः॥ विभ्राजमानं श्रीवत्सकौस्तुभप्रभयान्वितं॥ १०॥ सनकाद्यैः पार्षदैः परिवेष्टितं शंखचक्रगदापद्मवनमालाविराजितं॥ ११॥ स्वर्णयज्ञोपवीतेन स्वर्णवर्णांबरेण च॥ १२॥ श्रिया भूम्या च सहितं गरुडोपरि संस्थितं हर्षगद्गदया वाचा स्तोतुं समुपचक्रमे॥ १३॥ ब्रह्मोवाच॥ नतोऽस्मि ते पदं देव प्राणबुद्धींद्रियात्मभिः॥ यच्चिंत्यते कर्मपाशाद्धृदि नित्यं मुमुक्षुभिः॥ १४॥ ॥ १४॥ ॥ १४॥ ॥ १४॥ ॥

क्तिजत्वाद्वेगानंदबाष्पाणां विमलत्वं॥ ७॥ सहस्रांशुसहस्रं सूर्यसहस्रं॥ ८॥ अकृतात्मनां ज्ञानहीनानां तेजोराशित्वात्कथंचिद्दर्शनं॥ ९॥ १०॥ पार्षदा गणाः॥ ११॥ स्वर्णवर्णांबरं पीतांबरं॥ १२॥ १३॥ प्राणः क्रियाशक्तिः धीर्ज्ञानशक्तिप्रधानेंद्रः तेन कर्मेंद्रियसंग्रहः बुद्धींद्रियाणि श्रोत्रादीनि आत्मा मनः एतैः करणैः ते नतोऽस्मि॥ कर्मपाशान्मुमुक्षुभिर्यत्पदं हृदि चिंत्यत इत्यन्वयः॥ १४॥ ॥ १४॥

गुणमय्यासत्वरजस्तमोगुणयुक्तयामायया सचिवयाजगत्सृजसितेनस्वस्वलादिनातेलेपोऽहं स्वस्वेसाधमिमानोनातत्रहेतुगर्भं विशेषणंआनंदानुभवात्मनः आनंदाभिन्नानुभवरूपआत्मायस्यतस्य। एवंयस्यस्वरूपापरोक्षेण सर्वत्रमिथ्याहस्यातदभिमानरहितइतिभावः १५ दुष्टानांमलिनांतः करणानांशुद्धात्मता शुद्धांतः करणताते यत्रासितवगुणकीर्त्तने १६ सात्वतैर्भक्तैः वृतांतर्हृदयेत्तषादृष्टस्तवांघ्रिर्मेचित्तदोषेर्षपनुत्तयेऽस्त्वितिशेषः २७ स्वार्थसिध्यर्थंस्वकर्त्तव्यस

मायया गुणमय्यात्वं सृजस्यवसिलुंपसि जगन्नेननतेलेपआनंदानुभवात्मनः १५ तयाशुद्धिर्नदुष्टानांदानाध्ययनकर्मभिः शुद्धात्मतातेयत्रासि सद्यशक्तिमतांयथा १६ अतस्तवांघ्रिर्मेदृष्टश्चित्तदोषापनुत्तये सधीतर्हृदयेनित्यंमुनिभिः सात्वतैर्वृतः १७ ब्रह्माद्यैः स्वार्थसिध्यर्थमस्माभिः पूर्वसेवितः अपरोक्षानुभूत्यर्थंयत्नानिभिर्हृदिभावितः १८ तवांघ्रिस्रजानिर्माल्यतुलसीमालयाविभो स्पर्द्धतेवक्षसिपदंलब्ध्वापिश्रीः सपत्निवत् १९ अतस्त्वत्साहमक्तेषुतवभक्तिः श्रियोधिका भक्तिमेवाभिवांछंतित्वद्भक्ताः सारवेदिनः २० अतस्त्वत्पादकमलेभक्तिरेव सदास्तुमे संसारामयतप्तानांभेषजंभक्तिरेवते २१ इतिब्रुवंतंब्रह्माणंबभाषेभगवान्हरिः किंकरोमीतितंवेधाः प्रत्युवाचातिहर्षितः २२ भगवान्रावणोनामपौलस्त्यतनयोमहान् राक्षसानामधिपतिर्मद्दत्तवरदर्पितः २३ ॥२३॥ ॥२३॥ ॥२३॥ ॥२३॥

भ्रमारिसिध्यर्थंधीमानिभिः हृदिनेपुमिः १८ सपत्निवत्आर्वोन्हस्तः सपत्निवदित्यर्थः १९ यतः स्वचरणभक्तेषुतवलक्ष्मीतोप्यधिकाभक्तिः प्रीतिरतः सारवेदिनस्त्वद्भक्तास्त्वच्चरणयोर्भक्तिमेववांछति २० अतइति। यतस्तेभक्तिरेवसंसाररोगभेषजअतइत्यन्वयः २१ ब्रह्माणंहरीः किंकरोमितिवभाषेऽयतेहरिविधाः प्रत्युवाचेतिसंबंधः २२ रावणइति। रावयतिलोकानिमान्तस्माद्रावणउच्यतेइतिस्मारतोक्तेः मयाब्रह्मणादत्तेनवरेणदर्पितोहंकृतः वरश्चमनुष्याविंतिरिक्तावध्यत्वरूपः ॥२३॥

तदेवाह मानुषेणेति २४ कश्यपयैस्यतपसातोषितेनमेमयातस्यैवरोदत्तः। यत्वयाचिष्यसितत्तुभ्यंदास्यामीतिकृतवरदानवतिसैरित्यर्थः। तत्रतेनाहंपुत्रत्वमा
वायथाचितोमयाचतत्तथेत्यंगीकृतमित्यर्थः २५ अहंतस्यपुत्रतामेत्यपुत्रतांप्राप्स्यामितिसंकल्प्यकौशल्यायामित्यर्थः सुमित्रायांकैकेय्यांचाहमेवात्मानंचतुर्धा
चतुःप्रकारावयवसंस्थानैः रामलक्ष्मणभरतशत्रुघ्नेतिचतुःप्रकारनामभिश्चस्त्री[illegible]जामित्यस्यामिवर्तमानसामीप्येलट् २६ २७ योगमायेति

त्रिलोकींलोकपालांश्चबाधतेविश्वबाधकः॥ मानुषेणमृतिस्तस्यमयाकल्याणकल्पिता॥ अतस्त्वंमानुषोभूत्वाजहिदेवरिपुंप्रभो॥ २४ ॥ श्रीभगवानुवाच॥ कश्यपस्यवरोदत्तस्तपसातोषितेनमे॥ याचितःपुत्रभावायतथेत्यंगीकृतंमया॥ २५ ॥ सइदानींदशरथोभूत्वातिष्ठतिभूतले॥ तस्याहंपुत्रतामेत्यकौशल्यायांशुभेदिने॥ २६ ॥ चतुर्धात्मानमेवाहंसृजामीतरयोःपृथक्॥ योगमायापिसीतेतिजनकस्यगृहेतदा॥ उत्पत्स्यतेतयासार्धंसर्वंसंपादयाम्यहं॥ २८ ॥ इत्युक्त्वांतर्दधेविष्णुर्ब्रह्मादेवानथाब्रवीत्॥ विष्णुर्मानुषरूपेणभविष्यतिरघोःकुले॥ २९ ॥ यूयंसृजध्वंसर्वेपिवानरत्वंशसंभवान्॥ विष्णोःसहायंकुरुतयावत्स्थास्यतिभूतले॥ ३० ॥ इतिदेवान्समादिश्यसमाश्वास्यचमेदिनीं॥ ययौब्रह्मास्वभवनंविज्वरःसुखमास्थितः॥ ३१ ॥ देवाश्चसर्वेहरिरूपधारिणस्थिताःसहायार्थमितस्ततोहरेः॥ महाबलाःपर्वतवृक्षयोधिनःप्रतीक्षमाणाभगवंतमीश्वरं॥ ३२ ॥ इतिमध्यात्मरा॰॥ ॥ ॥ ॥ ॥ ॥ छ ॥

योगिमनःसंकल्पतद्वशवर्तिनीमायेत्यर्थः। नाहंपृथक्वाद्याः सर्वस्यपियोगमायासमावृत इतिगीतोक्तेः
तयासार्धं। तांसहकारिणींप्राप्य २८ २९ अंशसंभवान्। स्वस्वांशसंभवान्वानरानित्यर्थः ३० ३१ इतस्ततःपर्वतवर्वनेषु ३२ इतिश्रीमत्सकलराजवि
पदुद्धरणसमर्थेत्यादिबिरुदावलीविराजमानस्यहिम्मतिवर्मणःपुत्रस्यश्रीरामवर्मणःकृतौअध्यात्मरामायणसेतौबालकांडेद्वितीयसर्गः ॥ २ ॥ ॥ २ ॥
व

अथरामादिजन्मसौह्यथेति ॥ १ ॥ ३ ॥ संवेद्गुः खायेतिमनुष्यलोकः सुवेर्णेवजय्योनान्येनकर्मणेतिस्कृते ॥ ३ ॥ ४ ॥ शांताभर्तारं। शांतालोमपादुहद्शरथस्या
गपतेरेतद्दशरथमित्रस्पकन्यानेनराताततोलब्धा खड्गहितत्वेनकल्पितेत्याख्यायिकापुत्रकामायकर्तव्येष्टिः ॥ पुत्रकामेष्टिः ॥ ५ ॥ मुनिंऋष्यशृंगंमुनिसिर्वत्रिषा

महादेव उवाच ॥ अथराजादशरथः श्रीमान्सत्यपरायणः ॥ अयोध्याधिपतिर्वीरः सर्वलोकेषुविश्रुतः ॥ १ ॥ सोनपत्यत्वदुःखेनपीडितोगु
रुमेकदा ॥ वसिष्ठंस्वकुलाचार्यमाहूयेदमभाषत ॥ २ ॥ स्वामिन्पुत्राः कथंमेस्युः सर्वलक्षणलक्षिताः ॥ पुत्रहीनस्यमेराज्यंसर्वंदुःखायक
ल्पते ॥ ३ ॥ ततोब्रवीद्वसिष्ठस्तंभविष्यंतिसुतास्तव ॥ चत्वारः सत्वसंपन्नाः लोकपालाइवापराः ॥ ४ ॥ शांताभर्तारमानीयऋष्यशृंगंतपोधनं
अस्माभिः सहितः पुत्रकामेष्टिंशीघ्रमाचर ॥ ५ ॥ तथेतिमुनिमानीयमंत्रिभिः सहितः शुचिः ॥ यज्ञकर्मसमारेभेमुनिभिर्वीतकल्मषैः ॥ ६ ॥ श्र
द्धयाहूयमानेग्नौतप्तजांबुनदप्रभः ॥ पायसंस्वर्णपात्रस्थंगृहीत्वोवाचहव्यवाट् ॥ ७ ॥ गृहाणपायसंदिव्यंपुत्रीयंदेवनिर्मितं ॥ लप्स्यसेपरमा
त्मानंपुत्रत्वेननसंशयः ॥ ८ ॥ इत्युक्त्वापायसंदत्वाराज्ञेसोंतर्दधेऽनलः ॥ ववंदेमुनिशार्दूलौराजालब्धमनोरथः ॥ ९ ॥ वसिष्ठऋष्यशृं
गाभ्यामनुज्ञातोददौहविः ॥ कौशल्यायैसकैकेय्यैअर्धमर्धंप्रयत्नतः ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥

ध्या

धेः ॥ ६ ॥ तप्तजांबुनदंकृतमलापहरणंस्वर्णंतद्वत्कांतिर्हव्यवाडग्निः ॥ अयमेवप्राजापत्यंनरंविद्धिमामिहागतंनृपेति। वाल्मीकीयेप्राजापत्यशब्देनोक्तः ॥ ७
पुत्रीयंपुत्राप्तिहितं ॥ ८ ॥ मुनिशार्दूलौ ॥ वसिष्ठऋष्यशृंगौ ॥ ९ ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ १० ॥ ॥ ७ ॥

अध्या॰ १०
१९

जरघुः स्मृत्वंश्तन्तरिक्छावतीरघुअश्मिकांक्षायामित्यन्तोयङ् लुगंतादाठमशास्त्रानित्यत्वेन हृगश्चावेत्र सिरधियधिसिथियेक्नुरितिक्नोरूपं पौत्रिकं चरु मिति षष्ठ्य
श्रैशाव आर्षः। पत्रः प्रयोजनमस्यतादृशं चरुमित्यर्थः।। स्वभागार्धं स्वशब्द आत्मीयवाची स्वीयस्यभागः स्वभागस्तदर्धं। स्वदत्तस्य चतुर्थांशमित्यर्थः।।
स्वमग्रेपि। वाल्मीकीये पि कौशल्यायै नरपतिः पायसार्धं ददौ तदा अर्धादर्धं ददौ चापि सुमित्रायै नराधिपः कैकेय्यै चावशिष्टार्धं ददौ पुत्रार्थकारणात्। प्र
ददौ चावशिष्टार्धं पायसस्यामृतोपमं अनुचिंत्य सुमित्रायै पुनरेव महामतिरिति श्लोकयोः कौशल्यायै दत्तार्धस्यार्धादर्धं चतुर्थांशरूपं सुमित्रायै ददौ कौ
शल्ययादापि तवानित्यर्थः।। अर्धादित्यत्र कस्यार्धादित्याकांक्षायामुपस्थिते कौशल्यादत्तपायसार्धान्वयस्यैवोचितत्वात्ज्ञं तदर्धावितणपर्यर्थलेमा

ततः सुमित्रां सप्राप्ता जरघुः पौत्रिकं चरुं कौशल्या तु स्वभागार्धं ददौ तस्यै समुदान्विता ॥ ११ ॥ ६१ ॥

नं चैतत्दृकवाक्यतैव। एवं कैकेय्यै कौसल्यादत्तार्धावशिष्टमर्धं ददौ ततः कौशल्यादत्तावशिष्टस्य कैकेय्यै दत्तस्य यदर्धं विचार्य पुनरपि सुमित्रायै ददौ
दापयामासेत्यर्थः। अत्र चार्धपरावृत्तिर्बोध्या एवं हि एतद्रूपेण तस्यैकवाक्यता भवति। ततश्च भागजन्मस्यतत्त्तपत्राधीनतो चित्येन हृक्रमेणे। चिंत्तं से
व्यमेवकश्चावलाश्रयं तत स्ततो न्यूनांशात्वस्य लक्ष्मणशत्रुघ्नयोरौचित्यात्वाः त्वस स्वभागार्धमिति यथाश्रुतं तव्याख्यातं।। कालिदासोपि सतेजो वैस
वंपत्न्योर्विभेजे चरुं संहितं। द्यावापृथिव्योः प्रत्यग्रमहर्पतिरिवातपं अर्चितातस्यै कौशल्या प्रियाकेकयवंशजा।। अतः संभाविताताभ्यां सुमित्रामे
च्छदीश्वरः।। तेबुद्धुतस्य चित्तं ते पत्न्योपत्न्यो महीक्षितः चरोरर्धार्धभागाभ्यां तामयोजयतामुभसाहि प्राणपवस्यासीत्सपत्न्योरुभयोरपि हृत्याद्दृ। चरोरर्धा
र्धभागाभ्यामितस्यस्वलब्धचरुभागार्धार्धभागाभ्यामित्यर्थः। एवंच राम ॥ ॥ ५ ॥ ६ ॥ ७ ॥

राम
१९७

भरतो चित्रंशो लक्ष्मणशत्रुघ्नावष्टमांशाविति सिद्धं वाल्मीकीयव्याख्यातोरीकतकाचार्यश्रीरामाचार्यैरप्येवमेवोक्तं । अन्येतु तट्टीकाख्यातारः कौशल्यायै संपूर्णपायसार्धं दत्तवान् ततः पात्रस्थादर्धार्धं सर्वपायसचतुर्थांशं सुमित्रायै दत्तवान् स्वयमेव । ततः पात्रे स्थितस्य । चतुर्थांशस्यार्धमष्टमांशं कैकेय्यै दत्तवान् ततः पुनरवशिष्टमर्धमष्टमांशं [illegible] पुनरपि सुमित्रायै दत्तवानिति यथाश्रुतग्राहिणो व्याचक्षते । तेषामेतद्विरोधो रामलक्ष्मणयोरेव स्यात् तत्रात्र श्लोकयोरेवं कवाक्यतायां बीजाः लाभश्चा [illegible] वनिष्ठार्थपदे क्वचित्षष्ठीतत्पुरुषः क्वचित्कर्मधारय इति विवेकः ११ स्वभागार्धमिति प्राग्वत् १२ १३ मधुमासे चे

कैकेयी च स्वभागार्धं ददौ प्रीतिसमन्विता । उपयुज्य चरुं सर्वाः स्त्रियो गर्भसमन्विताः १२ देवता इव रेजुस्ताः स्वस्वासौ राजमंदिरे दशमे मासि कौशल्या सुषुवे पुत्रमद्भुतं १३ मधुमासे सिते पक्षे नवम्यां कर्कटे शुभे पुनर्वस्वृक्षसहिते उच्चस्थे ग्रहपंचके १४ मेषं पूषणि संप्राप्ते पुष्पवृष्टिसमाकुले आविरासीज्जगन्नाथः परमात्मा सनातनः १५ नीलोत्पलदलश्यामः पीतवासाश्चतुर्भुजः जलजारुणनेत्रांतः स्फुरत्कुंडलमंडितः १६ १६

ल चैत्रसिते । शुक्ले । कर्कटे । कर्क[illegible]े । पुनर्वस्वृक्षसहिते पुनर्वसुनक्षत्रसहिते इति कर्कलग्न विशेषणं ग्रहपंचके चंद्रबुधव्यतिरिक्तरविभौमगुरुभृगुशनिरूपे । तदुच्चस्थानानि क्रमेण मेषमकरकर्कमीनतुलाख्यानि १४ सर्वग्रहास्तो र यस्पर्श्यधीनत्वात्तदुच्चस्थानं स्फुटयति मेषमिति तत्र सर्वेषामनलगतत्वस्[illegible]चित्तपुष्पवृष्टिसमाकुलकाले इत्यर्थः १५ तत्रैकौशल्यानुग्रहाय प रूपमस्येत्यरूपेण प्रादुर्भूतस्तद्रूपमाह । नीलोत्पलेति १६ १६

ने

अध्या०वा
२०

स्थ

१७ अनुग्रहहास्येतिस्मक्तानुग्रहहास्योपोहृदय[illegible]दुल्लस्यस्मचिकास्मितरूपाचंद्रिकायस्यसः। स्मितंचेषद्विकसितंगण्डैःकपोलैःसौष्ठवान्वितैः। अलक्षि
तद्विजंधीरमुत्तमानांस्मितंस्मृतंइतिलक्षितं १८ १९ परमात्माशुद्धबुद्धमुक्तस्वभावः अच्युतः स्वस्वरूपात्कदापिनच्युतः शाश्वतंशिवमच्युतमिति
श्रुतेः अनंतः अनंतगुणः। नित्यत्वादंतरहितइतिवा। पूर्णः देशकालाद्यपरिच्छेद्यः पुरुषेषूत्तमः सर्वाधिष्ठानत्वात् २० वाचांबुध्यादीनामिंद्रियाणांवा

सहस्रार्कप्रतीकाशः किरीटांकुंचितालकः शंखचक्रगदापद्मवनमाला विराजितः १७ अनुग्रहहास्यहृल्लेंदुल्लसच्चकास्मितचंद्रिकः
करुणारससंपूर्णविशालोत्पललोचनः श्रीवत्सहारकेयूरनूपुरादिविभूषणः १८ दृष्ट्वातंपरमात्मानंकौशल्याविस्मयाकुला
हर्षाश्रुपूर्णनयनानत्वाप्रांजलिरब्रवीत् १९ कौशल्योवाच देवदेवनमस्तेस्तुशंखचक्रगदाधर परमात्माच्युतोनंतः पूर्णस्त्वंपु
रुषोत्तमः २० वदंत्यगोचरंवाचांबुद्ध्यादीनामतींद्रियं त्वांवेदवादिनः सत्तामात्रंज्ञानैकविग्रहः २१

गोचरंवदंति। यतोवाचोनिवर्तंते अप्राप्यमनसासहेत्यादिश्रुतयः। वागादिसर्वेंद्रियस्थूलत्वात्त्वन्नतासांविषयः नहिघटादिप्रकाशकोदीपोघटादिविषयोभवति
अतएवत्वामतींद्रियंवेदवादिनोवेदज्ञावदंति। तेत्वांसत्तामात्रंसर्वत्रस्वसंबंधात्सदितिव्यवहारोयथास्यात्सर्वाः प्रजाः सदायतनाइतिश्रुतेः ज्ञानैक
विग्रहं। सत्यंज्ञानमितिश्रुतेःवदंति २१ २१ २१ २१ ५

भू

राम०
२०

श्लो

त्वमिति। त्वमेव मायया सत्त्वादित्रिगुणसंयुक्तः तत्तद्गुणयुक्तं ब्रह्मविष्णुरुद्रात्मकः सन्सृष्ट्यादिकरोषि तत्र रजःप्रधानो ब्रह्मा सत्त्वप्रधानो विष्णुः तमःप्रधा
नो रुद्रः वि[illegible]ईत्यादिसंहृतत्वमपि पालनार्थमेव बहुमूर्तिग्रहं विना विभुपालनायोगात्। परमार्थतस्तु निर्गुण एव त्वमित्याह। तुर्य एवेति। तत्तद्गुणसंयु
क्तोक्तमूर्तित्रयापेक्षया चतुर्थ इत्यर्थः यद्वा जाग्रत्स्वप्नसुषुप्त्यवस्थरूपविश्वतैजसेभ्यस्तुर्य इत्यर्थः। न बहिःप्रज्ञं नान्तःप्रज्ञं नोभयतःप्रज्ञमि
ति श्रुतेः इयं हि क्रमेण जाग्रत्स्वप्नसुषुप्त्यवस्थानिषेधति अत एव सदा अमलः मायागुणास्पृष्टत्वादित्यर्थः २२ अमलत्वमुपचिन्तं निर्विकारत्वमेव स्फुट
यति। करोषीवेति। मायया गतिस्थित्यादिनिमित्तत्वादिव भासि। वस्तुतो विकारहीनत्वान्न करोषीत्यादि। अकुर्वन्सर्वकृच्छुद्ध तिष्ठन्प्राण इति। हिम्यात्वमूर्तेः

त्वमेव मायया विश्वं सृजस्यवसि हंसि च सत्त्वादित्रिगुणसंयुक्तस्तुर्य एवामलः सदा २२ करोषीव न कर्तात्वं गच्छसीव न गच्छसि न शृणोषि
शृणोषीव पश्यसीव न पश्यसि २३ अप्राणो ह्यमनाः शुभ्र इत्यादि श्रुतिरब्रवीत् समः सर्वेषु भूतेषु तिष्ठन्नपि न लक्ष्यसे २४ अज्ञा
नध्वान्तचित्तानां व्यक्त एव सुमेधसां जठरे तव दृश्यन्ते ब्रह्माण्डाः परमाणवः २५ २५ २५ २५ ॥

पुरुषः स बाह्याभ्यन्तरो ह्यजः अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः पर इति मुण्डकश्रुतिः प्राणाद्युपाधिरहितः अत एव कृतिगत्यादिरहित इति भावः। अ
क्षरमत्र मायातत्तः परतः तद्गुणास्पृष्टः सर्वतः परस्तत्स्थ इति श्रुत्यर्थः सर्वभूतेषु समः सन्घट इत्यादिप्रतीतेः सर्वत्रानुस्यूतत्वात् अतः सर्वत्र निष्ठमपि
२४ अज्ञानध्वान्तचित्तानां अज्ञानरूपान्धकारवच्छिन्नैः रोषित्वमीत्येन लक्ष्यसे। सुमेधसां तत्त्वज्ञानां व्यक्त एव दृश्यते त्वं अग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिरिति श्रुतेः यस्य तव जठरे ब्रह्माण्डाः परमाणवइव दृश्यन्ते २५ ॥ ॥ ॥ ॥

सत्वं ममोदरसंभूतः रति लोकान्मम माहात्म्यं विडंबसे ख्यापयसि। एतत्सर्वं भक्तिपारवश्यादित्याह। भक्तेरिति २६ यद्यपि ते मायया पत्यादिषु मग्ना तद्विषयोत्कटेच्छावती संसारसागरे भ्रमामि तथाप्यद्य ते पादमूलमागता तरिष्यामीति मन्मनसि इति शेषः २७ एतद्रूपं शंखचक्रगदाधरत्वविशिष्टं रूपं। आशास्यांतरमाह। आवृणोत्विति २८ उपसंहारे हेतुरलौकिकमिति सर्वलोकैर्द्रष्टुमशक्यं तेजोमयत्वादित्यर्थः २९ ननु त्वत्कारणार्थमेवं रूपपरिग्रह इति चेत्तत्रा

त्वं ममोदरसंभूतः रति लोकान्विडंबसे भक्तेष्वत्त पारवश्यं ते दृष्टं मे रघूत्तम २६ संसारसागरे मग्ना पतिपुत्रधनादिषु भ्रमामि मायया तेऽद्य पादमूलमुपागता २७ देव तद्रूपमेतन्मे सदा तिष्ठतु मानसे आवृणोतु न मां माया तव विश्वविमोहिनी २८ उपसंहर विश्वात्मन्नेतद्रूपमलौकिकं दर्शय त्वं महानंदबालभावं सकोमलं २९ ललितालिंगनालापैस्तरिष्याम्युत्कटं तमः श्रीभगवानुवाच यद्यदिष्टं तवास्त्यंब तत्तद्भवतु नान्यथा ३० अहं तु ब्रह्मणा पूर्वं भूमेर्भारापनुत्तये प्रार्थितो रावणं हंतुं मानुषत्वमुपागतः ३१ त्वया दशरथेनाहं तपसाराधितः पुरा मत्पुत्रत्वाभिकांक्षिण्या तथा कृतमनिंदिते ३२ रूपमेतत्त्वया दृष्टं प्राक्तनतपसः फलं मद्दर्शनं विमोक्षाय कल्प्यते त्वन्यदुर्लभं ३३

ह। ललितेति। तमः अज्ञानमूलं संसारः ३० त्वदिष्टरूपस्य नेहेतुमाह। अहं त्विति। मानुषत्वमुपागतः मानुषत्वं प्राप्तः कृतमतिः ३१ तर्हि प्रथममेव किं तथा रूपं न कृतमत आह। त्वयेति। अहं पुत्रो यस्याः सा मत्पुत्रा तस्या भावो मत्पुत्रत्वं। अतस्तत्र कार्ये किंचिद्गुणं तथा कृतमित्यर्थः ३२ प्राक्तनतपसः फलभूतमेतद्रूपं त्वया दृष्टं। ननु त्वद्दर्शनमात्रेण पुरुषार्थो न त आह। मद्दृशिति एवंरूपस्य मम मद्दर्शनं मन्ये तपोहीनैर्दुर्लभं विमोक्षाय कल्प्यते चित्तशुद्धिद्वारा तत्त्वमस्यादिवाक्यजज्ञानसंपादकत्वेनेति भावः ३३

३४ भक्तानुग्रहार्थंतत्ध्येयंमायिकंभगवतोरूपमाह बालत्वेपीति ३५ लालिताखिललोकपः स्वावतरणेनलालितास्तोषिताअखिललोकपालाइं
द्रादयोयेनसः। पुत्रोद्भवः पुत्रोत्पत्तिस्तद्रूपमुत्सवं ३६ राजीवंकमलं। गुरुणेतिकरणेतृतीयाजातकर्माणि॥ बहुवचनेननामकरणपर्यंतकर्त्तव्यबुद्धी
प्रज्ञादिसंग्रहः ३७ ३८ सुरभीर्गाः ३९ अथनामकरणेनाम्नामन्वर्थत्वंदर्शयतियस्मिन्नितिविद्ययातत्त्वज्ञानेन। अज्ञानविप्लवेअज्ञाननाशेतंन्नि

संवादमावयोर्यस्तुपठेद्वाशृणुयादपि सयातिममसारूप्यंमरणेमत्स्मृतिंलभेत् ३४ इत्युक्त्वानान्तरंरामोबालोभूत्वारुरोदह बालत्वेपी
न्द्रनीलाभोविशालाक्षोतिसुंदरः ३५ बालरूपधरोकाशोलालिताखिललोकपः अथराजादशरथः श्रुत्वापुत्रोद्भवोत्सवं आनंदार्णव
मग्नोसावाययौगुरुणासह ३६ रामंराजीवपत्राक्षंदृष्ट्वाहर्षाश्रुसंप्लुतः गुरुणाजातकर्माणिकर्त्तव्यानिचकारसः ३७ कैकेयीचाथ
भरतमसूतकमलेक्षणं सुमित्रायांयमौजातौपूर्णेंदुसदृशाननौ ३८ तदाग्रामसहस्राणिब्राह्मणेभ्योमुदाददौ सुवर्णानिचरत्नानिवा
सांसिसुरभीःशुभाः ३९ यस्मिन्रमंतेमुनयोविद्ययाज्ञानविप्लवे॥ तंगुरुःप्राहरामेतिरमणाद्रामइत्यपि ४० भरणाद्भरतोनामलक्ष्मणं
लक्षणान्वितं शत्रुघ्नंशत्रुहंतारंएवंगुरुरभाषत ४१ ४१ ४१ ४१ ४१ ४१ ॥

मित्तंयस्मिन्योगिनोरमंतेइत्येकः योगांतरमाह। रमणात्सकलानांवपुःसौंदर्येणरमणाद्रामइत्यपियोगइतिशेषः रमणंरामः प्राचेघञ्तंकरो
तिरामयतितत्करोतीतिणिच्। रमयतीतिरामः णिजंताद्घञ् तथाचभ्रातरान्रमयतीतिफलितोर्थः ४० ४१ ४१

घायसां शानुसारतः कौशल्यायायसां शल्वाल्लक्ष्मणो रामानुचरः। कैकेयीधायसां शलाशत्रुघ्नो भरतानुचर इत्यर्थः ४२ ४३ स्वर्णमयाश्वत्थपर्ण
स्पर्शांते संयुक्तानि या निमुक्ताफलानि तैः प्रभाशोभायस्यै तं रत्नमणीनां व्रातः समूहस्तन्मध्ये वर्तमानं यद्दीपिनखं व्याघ्रनखं तेनोपचितं मंडितं। यत्तु व्या
घ्रव्यालगजान् सिंहाश्वोष्ट्रमहिषान् भूषणेषु तपजेद्देहोपरीक्षितं चिरंजीवितमिति तत् भूषणेषु व्याघ्राद्याकाररत्नविशेषपरं। ननु मुख्यव्याघ्राद्यवयवनि
रोधकमित्याहुः ४४ स्वर्णसंपन्नानि घटितानि रत्नानि यस्मिन् तत् अर्जुनवृक्षस्य सटालुकमपक्वफलं तदाकारं भूषणं यस्य। रत्नार्जुनशलादुकमिति पा

लक्ष्मणो रामचंद्रेण शत्रुघ्नो भरतेन च द्वंद्वीभूय वर्तेते तौ तौ पायसांशानुसारतः ४२ रामस्तु लक्ष्मणेनाथ विचरन् बाललीलया रमयामास
पितरौ चेष्टितैर्मुग्धभाषितैः ४३ भाले स्वर्णमयाश्वत्थपर्णमुक्ताफलप्रभं कंठे रत्नमणिव्रातमध्यदीपिनखांचितं ४४ कर्णयोः स्वर्ण
संपन्नरत्नार्जुनसटालुकं सिंजानमणिमंजीरकटिसूत्रांगदैर्वृतं ४५ स्मितवक्त्राल्पदशनमिंद्रनीलमणिप्रभं अंगणे रिंगमाणं तं तं
र्णकाननुसर्वतः ४६ दृष्ट्वा दशरथो राजा कौशल्या मुमुदे तदा भोक्ष्यमाणो दशरथो राममेहीति चासकृत् ४७ आकारयत्यतिह
र्षेण प्रेम्णा नायाति लीलया आनयेति च कौशल्यामाह सा सस्मिता सुतं ४८ ४८ ४८ ॥

घंटिकं अर्थस्पष्टः सिंजानाः शब्दयुक्ता ये मणयस्तद्युक्तैः मंजीरकटिसूत्रांगदैर्वृतं मंजीरः पादभूषणं अंगदो बाहुभूषणं॥ ४५ स्मितं स्मितयुक्तं वक्त्रं
यस्य स चासावल्पदशनश्च तं। तर्णकान् गोवत्सान् अनु तत्पुच्छप्रांतधरणपूर्वं सर्वतो रिंगमाणं परितो बालगत्या खेलंतं ४६ दृष्ट्वेति तावदृशौ तत्क्रीडामि
त्यर्थः ४७ प्रेम्णा आहूतोऽपि तिरोधः लीलया क्रीडासक्त्या नायातीत्यर्थः ४८

योगिमनोगतिं। योगिमनोविषयां कर्दमांकितपाणिनोउपलक्षितइतिशेषः ४९ ५० प्रशादिकल्याणमुद्दिश्यसप्तशास्त्रोदीपमानस्यविशेषोवायनं।
वायनानिप्रकुर्वतीवभूवेतिशेषः। कर्णशाष्कुलीकर्णपूरादयोभक्ष्यविशेषः। कर्णशष्कुलीकर्णपूरादयोभक्ष्यविशेषाः। वर्षवृद्धिः वर्षारंभदिनकर्तव्यकर्म ५१

धावृत्यपिनशाक्नोतिस्प्रष्टुंयोगिमनोगतिं प्रहसन्स्वयमायातिकर्दमांकितपाणिना ४९ किंचिद्गृहीत्वाकवलंपुनरेवपलायते। कौशल्याजननीतस्य
मासिमासिप्रकुर्वती ५० वायनानिविविधानिसमलंकृत्यराघवं अपूपान्मोदकान्कृत्वाकर्णशष्कुलिकास्तथा कर्णपूरांश्चविविधान्वर्षवृद्धौ
चवायनं ५१ गृहकृत्यंतदात्यक्त्वातस्यचापल्यकारणात् एकदारघुनाथोसौगतोमातरमंतिके ५२ भोजनंदेहिमेमातर्नोकृतंकार्यसक्त
या ततःक्रोधेनभांडानिलक्ष्टेनाहनत्तदा ५३ शिक्यस्थपातयामासगव्यंचनवनीतकं लक्ष्मणायददौरामोभरतायतथाक्रमं ५४
शत्रुघ्नायददौपश्चाद्दधिदुग्धतथैवच सूदेनकथितंमात्रेहास्यंकृत्वाप्रधाविता ५५ आगतांतांविलोक्याथततः सर्वैः पलायितं कौश
ल्याधावमानापिप्रस्खलंतीपदेपदे ५६ रघुनाथंकरेधृत्वाकिंचिन्नोवाचभामिनी बालभावंसमाश्रित्यमंदंमंदंहरोदहा तेसर्वेलालिता
मात्रागाढमालिंग्ययत्नतः एवमानंदसंदोहजगदानंदकारकः ५८ मायाबालवपुर्धृत्वारमयामासदंपती अथकालेनतेसर्वेकौमारं
प्रतिपेदिरे ५९ उपनीतावसिष्ठेनसर्वेविद्याविशारदाः धनुर्वेदेचनिरताः सर्वशास्त्रार्थवेदिनः ६० वभूवुर्जगतांनाथाः लीलयानररूपि
